M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 56

Title: Bhagavata With Bhavartha Dipika

Sate

56

Incomplete

Bhāgawata	: Title
with Bhavartha Dipika	: Author
Com. S'ridhara	: Editor
	: Year, Vols.
	: Publisher
56 SK. IV and XII	: Remarks

Fourth incomplete

भा- च०
१

श्रीगणेशायनमः अथैकत्रिंशताध्यायैर्विसर्गस्तुयर्दीर्यति विसर्गोस्मिन्नीश्वराधीनैर्ब्रह्मन्मन्वादिभिः कृतः १
तत्रतुप्रथमेध्यायेमनुकन्यान्वयाः पृथक् वर्ण्यंतेयत्रयज्ञादिमूर्तिभिः प्रभवोहरेः २ मनुकन्यान्वयंविस्तरेणवक्तु
माह मनोस्त्विति। चकारात्द्वौपुत्रौच। तुशब्दात्अन्यतोपिपुत्रलोभः सूचितः १ तद्दर्शयितुमाह पुत्रिकाधर्ममाश्रि
त्येति। अभ्रातृकांप्रदास्यामितुभ्यंकन्यामलंकृतां। अस्यांयोजायतेपुत्रोसमेपुत्रोभवेदिति। भ्राताबंधेनकन्यादानं
पुत्रिकाधर्मः २ सत्तुअभ्रातृकायांकन्यायांपुत्रार्थिनएवप्रसिद्धः तथापिपुत्रबाहुल्यकामः तथाकृतवानित्याह॥८

मैत्रेयउवाच ॥मनोस्तुशतरूपायांतिस्रःकन्याश्चजज्ञिरे॥आकूतिर्देवहूतिश्चप्रसूतिरितिविश्रुताः १ आ
कूतिंरुचयेप्रादादपिभ्रातृमतींनृपः पुत्रिकाधर्ममाश्रित्यशतरूपानुमोदितः २ प्रजापतिःसभगवान्रुचिस्तस्यामजीज
नत् मिथुनंब्रह्मवर्चस्वीपरमेणसमाधिना॥३॥यस्तयोःपुरुषःसाक्षात्विष्णुर्यज्ञस्वरूपधृक्॥यास्त्रीसादक्षिणाभूते
रंशभूतानपायिनी॥४॥आनिन्येस्वगृहंपुत्र्याःपुत्रंविततरोचिषं॥स्वायंभुवोमुदायुक्तोरुचिर्जग्राहदक्षिणां॥५॥
तांकामयानांभगवानुवाहयजुषांपतिः॥तुष्टायांतोषमापन्नोजनयत्द्वादशात्मजान्॥६॥तोषःप्रतोषःसंतो
षोभद्रःशांतिरिडस्पतिः॥इध्मःकविर्विभुःस्वह्नःसुदेवोरोचनोद्विषट्॥७॥

भ्रातृमतीमपि मिथुनं पुरुषं स्त्रियंच समाधिना ईश्वरध्यानेन ३ भूतेःलक्ष्म्याः अंशभूताअतःतयोःविवाहः
नविरुद्धइतिभावः ४।५ यजुषां यज्ञानां मंत्राणांवापतिः विष्णुः ६ द्विषट् ॥ द्वादश ॥७॥ ८॥ ९॥ १

अथविष्णुरितिश्लोकाः

प्रसंगात् स्वायंभुवमन्वंतरगतंषट्कमाह तुषिताइतिद्वाभ्यां म[illegible] सत्सुपुत्राःसुरेश्वराः ऋषयोंशावताराश्चहरेःषड्विध
मुच्यते इतिवक्ष्यति तत्रस्वायंभुवः मनुः तुषिताःदेवाः मरीचि[illegible] इतियः यज्ञःहरेःअवतारः सएवसुरगणेश्वरः
इंद्रः ८ प्रियव्रतोत्तानपादौमनुपुत्रौ पृथिवीपालकौ तद्व[illegible] षड्विधत्वं तयोःपुत्रपौत्रनप्तॄणांवंशैः अनुवृत्तं
व्याप्तंपालितं तत्मन्वंतरं ९ श्रुतप्रायं बाहुल्येनश्रुतं तत्कन्या[illegible] अश्रुतत्वात् प्रायग्रहणं १०।११ प्रसूतिप्रसवं पु
त्रपौत्रादिभिःविस्तारं १२ ययोःवंशेनआपूरितं १३ कश्यपस्यवंशंषष्ठेवक्ष्यति द्वितीयस्यवंशमाह पूर्णिमेति देवकुल्यां

तुषितानामतेदेवाआसन्स्वायंभुवेंतरे मरीचिमिश्राऋषयोयज्ञःसुरगणेश्वरः ८ प्रियव्रतोत्तानपादौमनुपुत्रौमहौज
सौ तत्पुत्रपौत्रनप्तॄणामनुवृत्तंतदंतरं ९ देवहूतिमदात्तातकर्दमायात्मजांमनुः तत्संबंधिश्रुतप्रायंभवतागदतो
मम १० दक्षायब्रह्मपुत्रायप्रसूतिंभगवान्मनुः प्रायच्छद्यत्कृतःसर्गस्त्रिलोक्यांविततोमहान् ११ याःकर्दमसु
ताः प्रोक्तानवब्रह्मर्षिपत्नयः तासांप्रसूतिप्रसवंप्रोच्यमानंनिबोधमे १२ पत्नीमरीचेस्तुकलासुषुवेकर्दमा
त्मजा कश्यपंपूर्णिमानंचययोरापूरितंजगत् १३ पूर्णिमासूतविरजंविश्वगंचपरंतप देवकुल्यांहरेःपाद
शौचाद्याभूत्सरिद्दिवः १४ अत्रेःपत्न्यनसूयात्रीन्जज्ञेसुयशसःसुतान् दत्तंदुर्वाससंसोममात्मेशब्रह्म
संभवान् १५ विदुरउवाच अत्रेर्गृहेसुरश्रेष्ठाःस्थित्युत्पत्त्यंतहेतवः किंचिच्चिकीर्षवोजाताएतदा
ख्याहिमेगुरो १६

नामकन्यांच हरेःपादप्रक्षालनात् जन्मांतरेयाद्दिवःसरित्गंगाअभूत् १४ आत्मेशब्रह्मसंभवान् वि
ष्णुरुद्रब्रह्मणांअंशैःसंभवान् १५ किंचित् किंचित् १६

भा० च० ऋक्षं नाम कुलाद्रिं तपसि स्थितः सन् १७ तस्मिन् कुलाद्रौ प्रसूनानां स्तबकाः येषु पलाशाशोकेषु तेषां कानने
२ निर्विंध्या नाम नदी तस्याः स्रवद्भिः वार्भिः उद्घुष्टे नादिते १८।२० प्राणायाम एव एधः संदीपकः यस्य तेन मुनेः मूर्ध्नः निर्गतेन अग्निना
तप्यमानं जगत् समीक्ष्य तदाश्रमपदं ययुरित्यन्वयः २१ अप्सरः प्रमुखैः वितायमानं विस्तार्यमाणं यशः तेषां ते० २२ तेषां प्रादुर्भावः

मैत्रेय उवाच ब्रह्मणा चोदितः स्रष्टा वत्ति[?] ब्रह्मविदां वरः॥ सह पत्न्या ययावृक्षं कुलाद्रिं तपसः स्थितः॥१७॥ तस्मिन् प्र
सून स्तबक पलाशाशोककानने॥ वार्भिः स्रवद्भिरुद्घुष्टे निर्विंध्यायाः समंततः॥१८॥ प्राणायामेन संयम्य मनो वर्षश
तं मुनिः॥ अतिष्ठदेकपादेन निर्द्वंद्वोऽनिलभोजनः॥१९॥ शरणं तं प्रपद्येहं य एव जगदीश्वरः प्रजामात्मसमां मह्यं दद्यादि
ति चिंतयन्॥२०॥ तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना॥ निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः॥२१॥ अप्स
रो मुनि गंधर्व सिद्ध विद्याधरोरगैः॥ वितायमानयशसस्तदाश्रमपदं ययुः॥२२॥ तत्प्रादुर्भावसंयोगविद्योतितम
ना मुनिः॥ उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान्॥२३॥ प्रणम्य दंडवद्भूमावुपतस्थेर्हणांजलिः॥ वृषहंससुपर्णस्थान्
स्वैः स्वैश्चिह्नैश्च चिह्नितान्॥२४॥ कृपावलोकेन हसद्वदनेनोपलंभितान्॥ तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी॥
॥२५॥ चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः॥ श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः॥२६॥

प्राकट्यं तस्य संयोगः संनिधिः तेन विद्योतितं मनः यस्य उत्कर्ष[?] ... सन्॥२३॥ अर्हणं पुष्पादिकं अंजलौ यस्य उपतस्थे श्रीरुल्लः
पूजयामास॥ वृषाद्यारूढान् स्वैः स्वैः त्रिशूल कमंडलु चक्र[?] ... कृपावलोकः यस्मिन् हसच्च तद्वदनं तेन उपलं २
भितान्॥ प्रसन्नत्वेन ज्ञापितान् तेषां रोचिषा दीप्त्या २५ ... चक्षुः ६ ... स्या॥ सूक्तया गंभीरार्थया॥ २६॥ ७॥

अनुयुगं कल्पे कल्पे विभज्य गृहीताः देहाः यैः ते प्रसिद्धाः ब्रह्मविष्णुगिरिशाः यूयं तेषु युष्मान् प्रणतोस्मि तेभ्यः सकाशा
त् एक एव मे मया उपहूतः शरणं कं प्रपद्ये इति वस्य ... मुख्यानां ... युष्माभिरेव कथ्यतामित्यर्थः
२७ अस्य प्रपंचः एक इति विविधप्रधानैः उपचारैः ... इति वा पाठः प्रजननाय पुत्रोत्पत्त्यै चित्ती कृतः चि
तेन एव नीतः मनसोपि दूराः अगोचराः संतः कथं तु ... आगताः २८।२९ तेन त्वया कृत संकल्पः तेन तथैवास्मा
यं यतः सत्यसंकल्पस्य ते संकल्पः तर्हि कथं एकस्मिन् ध्यायमाने त्रयः प्रतीतास्य तत्राहुः यत् एकं जगदीश्वराख्यं

अत्रिरुवाच विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः ते ब्रह्मविष्णुगिरिशाः प्र ही २
णतोस्म्यहं वस्तेभ्यः क एव भवतां म इहोपहूतः २७ एको मयेह भगवान्विविधप्रधानैश्चित्तीकृतः प्रजननाय
३।५ कथं नु यूयं अत्रागतास्तनुभृतां मनसोपि दूराद्ब्रूत प्रसीदत महानिह विस्मयो मे २८ मैत्रेय उवाच इति त
स्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः॥ प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो॥२९॥ देवा ऊचुः यथा कृतस्ते सं
कल्पो भाव्यं तेनैव नान्यथा॥ सत्संकल्पस्य ते ब्रह्मन् यद्वै ध्यायति ते वयं॥३०॥ अथास्मदंशभूतास्ते आत्मजा लोक
विश्रुताः॥ भवितारोंग भद्रं ते विस्रप्स्यंति च ते यशः॥३१॥ एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः॥ सभाजितास्त
योः सम्यग्दंपत्योर्मिषतोस्ततः॥३२॥ सोमोभूद्ब्रह्मणोंशेन दत्तो विष्णोस्तु योगवित्॥ दुर्वासाः शंकरस्यांशो निबो
धांगिरसः प्रजाः॥३३॥

तत् त्वं भवान् ध्यायति। ते एते वयं त्रयो पि तदेव एकं तत्त्वं नास्माकं भेदः अस्तीत्यर्थः। ३०॥ विस्रप्स्यंति विस्तारयिष्यंति।
अंतर्भूतणिजर्थस्य सृपॢ गतावित्यस्य रूपं ३१॥ ताभ्यां सम्यक् सभाजिताः पूजिताः संतः ततः स्थानात् प्रतिजग्मुः
३२॥ निबोध। बुध्यस्व॥३३॥

भा०च०
३

ताः कन्या निर्दिशति सिनीवालीति ३४। ३५॥ पुलस्त्यश्च हविर्भुवि पत्न्यामित्यन्वयः दक्षाग्निः जठराग्निः विश्रवाश्च पुलस्त्य
स्य सुत इति शेषः ३६ तस्य विश्रवसः इडविडायां जातः सुतः कुबेरः अन्यस्यां भार्यायां केशिन्यां रावणादयः त्रयः सुताः
३७। ३८

श्रद्धा त्वङ्गिरसः पत्नी चतस्रोऽसूत कन्यकाः॥ सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा॥ ३४॥ तत्पुत्रावपरावा
स्तां ख्यातौ स्वारोचिषेऽन्तरे॥ उतथ्यो भगवान् साक्षात् ब्रह्मिष्ठश्च बृहस्पतिः॥ ३५॥ पुलस्त्योऽजनयत् पत्न्याम
गस्त्यं च हविर्भुवि॥ सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः॥ ३६ तस्य यक्षपतिर्देवः कुबेरस्त्विडवि
डासुतः रावणः कुम्भकर्णश्च तथान्यस्यां विभीषणः॥ ३७॥ पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान्॥
कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते॥ ३८॥ क्रतोरपि क्रिया भार्या वालखिल्यानसूयत॥ ऋषीन् षष्टि
सहस्राणि ज्वलतो ब्रह्मतेजसा॥ ३९॥ ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप॥ चित्रकेतुप्रधानास्ते स
प्त ब्रह्मर्षयोऽमलाः॥ ४०॥ चित्रकेतुः सुरोचिश्च विरजा मित्र एव च॥ उल्बणो वसुभृद्यानो द्युमान् शक्त्या
दयोऽपरे॥ ४१॥ चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतं॥ दध्यञ्चमश्वशिरसं भृगोर्वंशं निबोध मे॥
॥ ४२॥ भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत्॥ धातारं च विधातारं श्रियं च भगवत्परां॥ ४३
आयतिं नियतिं चैव सुते मेरुस्तयोरदात्॥ ताभ्यां तयो[illegible] मृकण्डः प्राण एव च॥ ४४॥ मार्कण्डेयो मृ
कण्डस्य प्राणाद्वेदशिरा मुनिः॥ कविश्च भार्गवो य[illegible]॥ सर्वे ते मुनयः क्षत्तर्लोकान् सर्गैरभावयन्॥ ४५ श्रीकृष्णः ३

ज्वलतः प्रकाशमानान् ३९ चित्रकेतुप्रमुखाः सप्त ते [illegible] ४५ यज्ञ जाता॥ सुतानेवाह चित्रकेतुरिति वसुभृद्यानो
नाम एकः शक्त्यादयः अपरे अन्यस्यां पुत्राः ४१। ४२ ख्यात्यां पत्न्यां [illegible] पुत्रौ पुत्रीं च तानेवाह धातारमिति। ४३ तयोः धातृविधात्रोः ४४
कविश्च भार्गवः भृगोः पुत्रः ४६

पुत्रेभ्यः संयतेभ्यः मौक्तिकेभ्यो वा ४८। ५१। सर्वेषां गुणानां उत्पत्तिर्यस्मात् ॥ ५ [illegible] ५३। उपतस्थुः तुष्टुवुः ५४ निजया मायया यस्मिन् आत्मनि खे
गगने रूपभेदं गन्धर्वनगरमिव इदं विश्वं विरचितं तस्य आत्मनः [illegible] दर्शनाय आत्मानं यः प्रादुश्चकार प्रकटितवान् तस्मै पुरुषाय न
मः केन रूपेण प्रादुश्चकार ऋषेः मूर्तिः आकारः यस्मिन् तेन [illegible]

एष कर्दमदौहित्रसंतानः कथितस्तव शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः ४६ प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः
तस्यां ससर्ज दुहितॄः षोडशामललोचनाः ४७ त्रयोदशादाद्धर्माय तथैकामग्नये विभुः पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छ
छिदे ४८ श्रद्धा मैत्री दया शान्तिस्तुष्टिः पुष्टिः क्रियोन्नतिः बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ४९ श्रद्धासूत शुभं मैत्री
प्रसादमभयं दया शान्तिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत ५० योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत मेधा स्मृतिं ति
तिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतं ५१ मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी ययोर्जन्मन्यदो विश्वमभ्यनन्दत् सुनिर्वृतं ५२
मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः॥ दिव्यवाद्यन्त तूर्याणि पेतुः कुसुमवृष्टयः ५३ मुनयस्तुष्टुवुस्तुष्टा जगुर्ग
न्धर्वकिन्नराः नृत्यन्ति स्म स्त्रियो देव्य आसीत् परममङ्गलं ५४ देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः यो मायया विरचितं नि
जयात्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय एतेन धर्मसदने ऋषिमूर्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै ५५ सोऽयं
स्थितिव्यतिकरोपशमाय सृष्टान् सत्त्वेन नः सुरगणाननुमेयतत्त्वः दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं
क्षिपतारविन्दं ५६

सोऽयं नः अस्मान् सुरगणान् अदभ्रकरुणायुक्तेन विलोकनेन विशिष्टनेत्रेण दृश्यात् पश्यतु कथंभूतेन यत् श्रीनिकेतनम
मलं अरविन्दं तत् क्षिपता तिरस्कुर्वता कथंभूतः अनुमेयं शास्त्रतः विचार्यं न तु अस्माकं अपरोक्षं तत्त्वं यस्य कथंभूतान् अस्मा
न् स्थितेः ऊर्गन्मर्यादायाः व्यतिकरः अन्यथात्वं तस्य उपशमाय सत्त्वेन गुणेन सृष्टान् ५६॥ ७॥ ॥ ७॥ ॥ ७॥ ७

भा०स्क०
४
लब्धः अवलोकः यैः सुरगणैः तैः अभिष्टुतौ पूजितौ च संतौ ययतुः ५८ ॥ भुवः भारस्य व्ययाय नाशाय चकारः एकवाक्यार्थे तौ च
साम्प्रतं इह आगताविसर्थः । तदुक्तं तंत्रे अर्जुनेतु नरावेशः कृष्णस्तु भगवान् स्वयमिति यदूद्वहः श्रीकृष्णः कुरुद्वहः अर्जुनः
उभावपि कृष्णनामानौ । ५९ ॥ अग्न्यभिमानिनः देवान् स्वाहा नाम तस्य भार्या हुतभोजनमिति त्रयाणां विशेषणं ६० पितरः
त्रयः पितामहस्तैः तैः साकं सह ६१ वैतानिके वैदिके कर्मणि यत्तैर्येषां नामभिः अग्निदेवताकाः इष्टयः निरूप्यंते क्रियंते ते एत अ
ग्नयः न लौकिकाः अतः बहूनां नवैय्यर्थ्यमिति भावः ६२
एवं सुरगणैस्तात भगवंतावभिष्टुतौ लब्धावलोकैर्ययतुरर्चितौ गंधमादनं ॥ ५८ ॥ तावुभौ वै भगवतो हरेरंशाविहागतौ भा
रव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ५९ स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् पावकं पवमानं च शुचिं च हुतभो
जनं ६० तेभ्योग्नयः समभवंश्चत्वारिंशच्च पंच च त एवैकोनपंचाशत्साकं पितृपितामहैः ६१ वैतानिके कर्मणि यन्नाम
भिर्ब्रह्मवादिभिः आग्नेय्य इष्टयो यज्ञे निरूप्यंतेग्नयस्तु ते ६२ अग्निष्वात्ता बर्हिषदः सौम्याः पितर आज्यपाः साग्न
योनग्नयस्तेषां पत्नी दाक्षायणी स्वधा ६३ तेभ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा ॥ उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञा
नपारगे ६४ भवस्य पत्नी तु सती भवं देवमनुव्रता आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः ॥ ६५ ॥ पितर्यप्र
तिरूपे स्वे भवायानागसे रुषा अप्रौढैवात्मनात्मानमजहाद्योगसंयुता ६६ इति श्रीभागवते महापुराणे चतुर्थ
स्कंधे प्रथमोध्यायः १॥ ६२॥ ६२॥ ६२॥ ६२॥ ६२॥ ६२॥ ६२॥ ६२॥ ६२॥ ६२॥ ६२
सौम्याः सोमपाः येषां अग्नौ करणं अस्ति ते साग्नयः तद्रहिताः अनग्नयः ६३ तयोस्तु संततिः न अभवत् जीवन्मु
क्तत्वात् इत्याह उभे ते इति ६४ गुणशीलतः आत्मनः सदृशं देवं अनुव्रतापि सती पुत्रं न लेभे ६५ तत्र हेतुः स्वपितरि दक्षे अप्रतिरूपे अनागसे प्रतिकूले सती स्वस्य आत्मनैव देहमजहात् कीदृशी योगसंयुता योगमा ४
श्रितेति ६६ इति श्रीभागवते महापुराणे चतुर्थ[illegible]थमोध्यायः १ ६२॥ ६२॥ ६२
द्वितीये प्रथमाध्याये प्रक्षिप्तमभवद् द्वयोः विद्वेषं वर्ण्यते [illegible] यस्य ध्वंस [illegible] १ सतीं सती नाम्नीं न च असौ कस्यचित् द्वेष्टा
इत्याह कुत इति चराचरगुरुं जगतः दैवतं च कः द्वेष्टि कथं निर्वैरः [illegible] निर्वैरत्वे हेतुः शांतः विग्रहः यस्य कुतः आत्मन्येव आरामः रतिः यस्य तं यद्वा कः प्राति दक्षः कथं [illegible] एवं क्षेतेतस्मिन् द्वेषः अयुक्तः अतः कथमेतदित्यर्थः २
यतः हेतोः विद्वेषः यतः विद्वेषात् प्राणान् तत्याज एतत् आख्याहि ३ तदेव आख्यातुं इतिहासं प्रस्तौति पुरेति समेताः
आसन् ४ प्रविष्टं दक्षमिति शेषः महत् सदः महतीं सभां ५
विदुर उवाच भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीं १ कस्तं चराच
रगुरुं निर्वैरं शांतविग्रहं आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् २ एतदाख्याहि मे ब्रह्मन् जामातुः श्व
शुरस्य च विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान् सती ३ मैत्रेय उवाच पुरा विश्वसृजां सत्रे समेताः प
रमर्षयः तथामरगणाः सर्वे सानुगा मुनयोग्नयः ४ तत्र प्रविष्टमृषयो दृष्ट्वार्कमिव रोचिषा भ्राजमानं विति
मिरं कुर्वंतं तन्महत्सदः ५ उदतिष्ठन् सदस्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः ऋते विरिंचं शर्वं च तद्भासाक्षिप्तचे
तसः ६ सदसस्पतिभिर्दक्षो भगवान् साधु सत्कृतः अजं लोकगुरुं नत्वा निषसाद तदाज्ञया ७ प्राङ्निषण्णं
मृडं दृष्ट्वा नामृष्यत्तदनादृतः उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ८ श्रूयतां ब्रह्मर्षयो मे सह दे
वाः सहाग्नयः साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात् ९ अयं तु लोकपालानां यशोघ्नो निरपत्रपः ११
सद्भिराचरितः पंथा येन स्तब्धेन दूषितः १०
सदसिः तत्र चरितः पंथा येन स्तब्धेन दूषितः तेन अभ्यु
त्थानं [illegible]
स्वाधिष्ण्येभ्यः स्वीयासनेभ्यः ६।७ प्राक्त्वोपवेशनात् पूर्वमेव निषण्णं उपविष्टं मृडं शिवं तदनादृतः तेन अभ्यु
त्थानादिभिः अकृतादरः न अमृष्यत न असहत वामं वक्रं यथा भवति तथा अभिवीक्ष्य ८ मे वचनं श्रूयतां
तां अज्ञानात् मत्सराद्वा न ब्रुवतः स्तब्धेन उचितक्रियाशून्येन ध्वस्तेनेति पाठभेदेन १० श्रीराम श्रीराम

भा० स्कं० ४
५

तदेवाह एष इति यत् यस्मात् विप्राग्निसमक्षं सावित्रीतुल्यायाः मे दुहितुः पाणिं अग्रहीत् ११ मर्कटशावस्य हरिणबाल कस्य अक्षिणी इव अक्षिणी यस्याः प्रत्युत्थानाभिवादार्हे मयि उचितं सन्मानं वाचापि न अकरोत् १२ अनहीयकन्यादत्तेति अनुतप्यमानआह लुप्तक्रियायेति साद्धैश्वर्युगुभिः उशती वेदलक्षणा गिरं १३ प्रेतावासेषु श्म शानेषु सुप्ताः विकीर्णाः केशाः यस्य १४ चिताभस्मना स्नानं कृतं येन प्रेतानां स्रजः माल्यानि सः नृणां अस्थी नि भूषणानि यस्य शिव इति अपदेशः नाममात्रं यस्य १५ तमोमात्रात्मकः केवलमोहमयः आत्मास्वभावः येषां उन्मादाः भूतविशेषाः तेषां नाथाय दुर्हृदे दुष्टचित्ताय बतेति खेदे वास्तवस्त्वयमर्थः लुप्ताः क्रियाः यस्मिन्

एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत् पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत् ११ गृहीत्वा मृ गशावाक्ष्याः पाणिं मर्कटलोचनः प्रत्युत्थानाभिवादार्हे वाचाप्यकृत नोचितं १२ लुप्तक्रियायाशुचये मा निने भिन्नसेतवे अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरं १३ प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः ॥ अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन्रुदन् १४ चिताभस्मकृतस्नानः प्रेतस्रङ्न्रस्थिभूषणः ॥ शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः १५ पतिः प्रमथभूतानां तमोमात्रात्मकात्मनां तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे दत्ता बत मया साध्वी चोदितः परमेष्ठिना १६ श्रीरामकृष्ण

परब्रह्मरूपत्वात् अतएव नास्तिअशुचिः यस्मात् अमा[illegible]भिन्नसेतवे इति वाच्छेदः तस्य परमेश्वरस्य मम कथं मानुषीकन्याकुथं योग्या स्यात् इति लज्जादिना[illegible]न्नापि सतसंबंधेन दत्तवान् अहं इत्याह अनर्हत्व मात्रे दृष्टान्तः नहीनत्वे यदा शुक्र शोक इव सताभिर[illegible]नेष्टः तस्य वेदवाणीकर्मविद्याभिव पूर्वापरस्ववचना विरोधापत्तेः एतदुक्तं भवति यथा कश्चित् भ[illegible]र्थलोभेन ददाति तद्वदिति प्रेतावासेष्वित्यादि सर्वविडंब नमिति स्वयमेवाह उन्मत्तवदिति अन्यथा[illegible] अवक्ष्यन् अशिवः नास्ति शिवः यस्मात् अमत्तः अमत्त

मिति भक्तवात्सल्यमाह सामसानामपि दोषं अपनीयपातीति[illegible]शानामपि शोचं शुद्धिः यस्मात् दृष्टेष्वपि एते मया अनुकंप्या इति हृन् मनः यस्य सः दुर्हृत् तस्मै बतेति हर्षे ब्रह्मणः वाक्यात् [illegible]भयाभयादिकं परित्यज्य दत्तेत्यर्थः १६ अप्रातिरूप्यं अ प्रतिकूलं यथा भवस्येवं अवस्थितमपि विनिंद्य १७ देवानां यज्ञे[illegible]प्यये देवैः सह भागं न लभतां किंतु तेभ्यः पूर्वमेव लभतां अग्रभागित्वात् यद्वा तेषु मुक्तवत्फलं लभतां स[illegible]त्वात् अत्र हेतुः देवगणः अधमः यस्मात् सः १८ सः दक्षः तस्मात् स्थानात् विनिष्क्रम्य जगाम हे कौरव्य १९ गिरिशस्य अनुगानां अग्रणीः मुख्यः ॥ रोष एव कषायः तेन दूषितः आरक्तनेत्रः इत्यर्थः तस्य गिरिशस्य आवाच्यतां वचनानर्हतां निंद्यतामित्यर्थः ॥

मैत्रेय उवाच विनिंद्यैवं स गिरिशमप्रतीपमवस्थितं दक्षोथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे १७ अयं तु देवयजन इन्द्रोपेन्द्रादिभिर्भवः सह भागं न लभतां देवैर्देवगणाधमः १८ निषिध्यमानः सदस्यमुख्यैर्दक्षो गिरित्राय विसृज्य शापं तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनं १९ विज्ञाय शापं गिरिशानुगाग्रणीर्नन्दीश्वरो रोषकषायदूषितः दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्यतां द्विजाः २० य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् २१ गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया कर्मतन्त्रं वितनुते वेदवादविपन्नधीः २२ ॥

तेभ्योपि शापं विससर्ज २० दक्षं शापति सार्द्धैस्त्रिभिः एतत् मर्त्यं दक्षशरीरं उद्दिश्य श्रेष्ठं मत्वा अप्रति द्रुहि प्रतिद्रोहं अकुर्वति पृथक्दृष्टिः भेददर्शी तत्त्वतः परमार्थात् २२ अज्ञत्वमेवाह गृहेष्विति कर्मतंत्रं कर्मपरिकरं वेदस्य अर्थवादाः अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादयः तैः विपन्ना नष्टा धीः यस्य २२

भा॰ च ६

परः देहादिः तमेव आत्मत्वेन अभितःध्यातुं शीलं यस्याः तया बुध्या विस्मृता आत्मनः गतिः तत्वं येन अतः पशु
तुल्यः अतितरं स्त्रीकामः अस्तु इति द्वितीयः शापः बस्तस्य मुखमिव मुखं यस्येति तृतीयः शापः २३ अयं च शापः
अस्य अनुरूप एवेत्याह विद्याबुद्धिः इयमेव तत्वविद्येति बुद्धिर्यस्य अतः असौ ऊड एव द्विजान् शपति संसरं
त्विति द्वाभ्यां शर्वे अवमन्य तद्गतिं तथो तं अमुं दक्षं ये च अनुवर्तंते ते संसरंतु जन्ममरणादि अनुभवंतु इत्येकः शा
पः २४ श्रुतायाः वेदरूपिण्याः पुष्पिणीव अर्थवादाः मनःक्षोभकत्वात् अर्थवादबहुलायाः इत्यर्थः मधुगंधतुल्ये
प्ररोचनेन मथ्यामनःक्षोभकेन उन्मथितः आत्मा मनः येषां ते संमुह्यंतु कर्मसु आसक्ता भवंतु इति द्वितीयः शापः

बुध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः स्त्रीकामः सोस्त्वतितरां दक्षो बस्तमुखोचिरात् २३ विद्याबुद्धि
रविद्यायां कर्ममय्यामसौ जडः संसरंत्विह ये चामुमनु शर्वावमानिनं २४ गिरः श्रुतायाः पुष्पिण्या मधुगंधेन भू
रिणा मथ्ना चोन्मथितात्मानः संमुह्यंतु हरद्विषः २५ सर्वभक्षा द्विजा वृत्त्यै धृतविद्यातपोव्रताः वित्त
देहेंद्रियारामा याचका विचरंत्विह २६
तस्यैवं वदतः शापं श्रुत्वा द्विजकुलाय वै भृगुः प्रत्यसृजच्छापं ब्रह्मदंडं दुरत्ययं २७ भवव्रतधरा ये च ये
च तान्समनुव्रताः पाखंडिनस्ते भवंतु सच्छास्त्रपरिपंथिनः २८ नष्टशौचा मूढधियो जटाभस्मास्थि
धारिणः विशंतु शिवदीक्षायां यत्र दैवं सुरासवं २९ ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिंदथ सेतुं विधा
रणं पुंसामतः पाखंडमाश्रिताः ३० राम ६
२५ सर्वभक्ष्याः भक्ष्याभक्ष्यविचारशून्याः वृत्त्यै देहादिपोषणाय धृतानि विद्यातपोव्रतानि यैस्ते वित्तादिष्वेव आ
रामः रतिः येषां ते याचकाः संतः विचरंतु इति शापः २६ प्रत्यसृजत् प्राहात् शापरूपं ब्रह्मदंडं २७
सच्छास्त्रपरिपंथिनः प्रतिकूलाः २८ सुरा गौडी पैष्टी माध्वी च आसवं तालादिसंभवं मद्यं दैवं देवत्वात् षष्ठं तत्र
यत्र दैवं पूज्यं देवतावत् आदरणीयं इति वा २९ ब्रह्म वेदं कथं भूतं सेतुं मर्यादारूपं तं वेदं वाहा पुंसां वर्णाश्रमाचा
रवतां विधारणं धारकं ३० सेतुत्वं प्रपंचयति द्वाभ्यां

एष एव हि लक्षणएव शिवः पंथाः यं पूर्वे ऋषयः [illegible] आश्रितवंतः यत्र यस्मिन् जनार्दनः प्रमाणं मूलं ३१
भूतानां सामसानां पतिः ३२ अन्योन्यशापेन उभयोः विनाशात् विमना इवेति तथापि भगवदनुगृहीतानां नाशः नस्यादिति
भावः ३३ ऋषभः सर्वश्रेष्ठः हरिः यत्र इज्यः पूज्यः तत सत्रं सम्यक् विधाय हे महेष्वास विदुर ३४ यत्र प्रयागे अन्विता तत्र
अवभृतस्नानं कृत्वा तदुत्थानात् ययुः ३५ इति चतुर्थे द्वितीयः तृतीये तु सती तातयज्ञोत्सवदिदृक्षया गमिष्यति म
हेशेन वारितानीतिहेतुभिः प्रियमाणयोः अवतिष्ठमानयोः षड्भुः अवस्थानेन इत्यस्मात् रुद्रविहीनः यज्ञः नास्त्येव त

एष एव हि लोकानां शिवः पंथाः सनातनः यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः ३१ तद्ब्रह्म परमं शुद्धं सतां वर्त्म
सनातनं विगर्ह्य यात पाखंडं दैवं वो यत्र भूतराट् ३२ मैत्रेय उवाच तस्यैवं वदतः शापं भृगोः स भगवान्भवः॥
निश्चक्राम ततः किंचिद्विमना इव सानुगः ३३ तेपि विश्वसृजः सत्रं सहस्रपरिवत्सरान् संविधाय महेष्वास यत्रे
५ व ज्य ऋषभो हरिः ३४ आप्लुत्यावभृथं यत्र गंगा यमुनयान्विता विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ३५ इति श्री
भागवते महापुराणे चतुर्थस्कंधे दक्षशापो नाम द्वितीयोध्यायः २ मैत्रेय उवाच सदा विद्विषतोरेवं कालो वैध्रि
यमाणयोः जामातुः श्वशुरस्यापि सुमहानतिचक्रमे १ यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना प्रजापतीनां
सर्वेषामाधिपत्ये स्मयोऽभवत् २ इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च बृहस्पतिसवं नाम समारेभे क्रतूत्तमं
३ तस्मिन्ब्रह्मर्षयः सर्वे ब्रह्मर्षिपितृदेवताः आसन् कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ४ राम शरणं

तथापि दक्षस्य रुद्रपरित्यागः द्वेषात् गर्वाच्च तत्र द्वेषे हेतुः उक्तः गर्वे हेतुमाह यदा तु प्रजापतीनां आधिपत्ये अभिषिक्तः
तदा तस्य स्मयः गर्वः अभवत् २ गर्वादेव ब्रह्मिष्ठान् सेश्वरान् अभिभूय तिरस्कृत्य वाजपेयेन इष्ट्वा बृहस्पति
सवं नाम यज्ञं तातिश्रुतः बृहस्पतिसवं आरेभे ३ कृतस्वस्त्ययनाः कृतमंगलाः सभर्तृकाः इति दक्षिणादिभिः प्रथमं अ
र्हितानां आधिपत्यार्हणे पुनः अर्हणं मुक्तं ४

तत् तदा खचराणां प्रजल्पतां सतां पितृयज्ञमहोत्सवं श्रुत्वा ५ तत्र व्रजंतीः उपदेवानां गंधर्वादीनां वरस्त्रियः स्वस्य निलयस्य अभ्या
शे समीपे दृष्ट्वा औत्सुक्यात् पतिं अभ्यभाषतेति त्रयाणामन्वयः कथंभूताः स्त्रियः विमानानि याना नि यासां ताः श्रेष्ठैः स
हिताः निष्काणि पदकानि कंठे यासां ताः शोभनानि वासांसि यासां ताः लोलानि चंचलानि अक्षीणि यासां मृष्टानि उज्व
लानि कुंडलानि यासां ताः ७ निर्यापितः प्रवर्तितः हे भाम शिव ते यदि अर्थिता इच्छा तर्हि वयं च तत्र अभिसराम गच्छामः
न च अद्यापि यागः निर्वृत्तः यतः अमी विबुधाः व्रजंति ८ औत्सुक्यं प्रकटयंती आह तस्मिन्निति बुद्धिः पितृभ्या उपनीतं

तदुपश्रुत्य नभसि खेचराणां प्रजल्पतां सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवं ५ व्रजंतीः सर्वतोऽभ्य उपदेववरस्त्रियः
विमानयानाः सप्रेष्ठा निष्ककंठीः सुवाससः ६ दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुंडलाः पतिं भूतपतिं देवमौत्सु
क्यादभ्यभाषत ७ सत्युवाच प्रजापतेस्ते श्वशुरस्य सांप्रतं निर्यापितो यज्ञमहोत्सवः किल वयं च तत्राभिस
राम वामते यद्यर्थितामी विबुधा व्रजंति हि ८ तस्मिन् भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यंति सुहृद्दिदृ
क्षवः अहं च तस्मिन् भवता च कामये सहोपनीतं परिबर्हमर्हितुं ९ तत्र स्वसॄर्मे ननु भर्तृसंमिता मातृष्व
सॄः क्लिन्नधियं च मातरं द्रक्ष्ये चिरोत्कंठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजं १०

दत्तं परिबर्हं अलंकारादि द्रव्यं भवता सह आर्हितुं स्वीकर्तुं कामये अर्हितामिति पाठे अर्हितं सत्कृतं परिबर्हं इच्छामी
ति ९ स्वसॄः भगिनीः भर्तृभिः संमिताः सदृशीः क्लिन्नधियं स्नेहार्द्रचित्तं चिरउत्कंठं उत्कंठं मनः यस्याः सा अ
हं द्रक्ष्यामि हे मृड उन्नीयमानं प्रवर्त्यमानं अध्वरध्वजं अभिवृद्धं श्रेष्ठं अध्वरं यद्वा उत्क्षिप्यमाणं यज्ञकेतुं यू
पं वा १० अहो किं तत्र आश्चर्यं येन तव एतत् औत्सुक्यमिति चेत् अत आह त्वयीति श्रीरामः शरणं श्रीकृष्णः
७

हे अज एतत् विश्वं आश्चर्यरूपं त्वय्येव त्वन्मायारचितं भाति अतः यद्यपि तव तत्र नाश्चर्यबुद्धिः तथापि अहं यो
षित् उत्सुकस्वभावा तव तत्त्वं न जानामि अतः दीना कृपणा सती हे भव मे भवः क्षितिं जन्मभूमिं दिदृक्षे द्रष्टुमिच्छामि ११
दिदृक्षामेव किमुत किं न्यायेन व्यनक्ति पश्यतिद्वाभ्यां हे भव इति भवेन सह वियोगदुःखं च त्वया न आस्वादितमिति भावः अ
न्यं योषितः संबंधरहिता अपि प्रयांतीः पश्य कांतसखाः भर्तृसहिताः वरूथशः संघशः कथंभूताः आसां वि
मानैः नभः मंडितं हे शितिकंठ नीलकंठेति परानुग्रहाय त्वया विषमपि भक्षितं इति सूचयति १२ तदाह हे सुरश्रेष्ठ

त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकं अथाप्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे
भवक्षितिं ११ पश्य प्रयांतीरभवान्ययोषितोऽप्यलंकृताः कांतसखा वरूथशः यासां व्रजद्भिः शितिकंठ मंडि
तं नभो विमानैः कलहंसपांडुभिः १२ कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेंगते अनाहूता
अप्यभियांति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनं १३ तन्मे प्रसीदेदममर्त्य वांछितं कर्तुं भवान् कारुणि
को बतार्हति त्वयात्मनोऽर्धेऽहमदभ्रचक्षुषा निरूपिता मानुगृहाण याचितः १४

पितृगृहोत्सवं निशाम्य सुतायाः देहं कथं नेंगते इंगं न प्रचलति तथापि अनाहूताः संतः कथं गच्छामः तत्राह
सौहृदं सुहृदः केतनं तथा भर्त्रादीनां च गृहं अनाहूता अपि अभियांति संतः सुस्वमोर्ष १३ हे अमर्त्य तत् तस्मा
त् प्रसीद इदं मे वांछितं कर्तुं भवान् अर्हति कारुणिकत्वमेवाह अदभ्रचक्षुषा अनल्पज्ञानेनापि त्वया आत्म
नः देहस्य अर्द्धे अहं निरूपिता धृता यतः अर्धनारीश्वर ख्यातोसि अतः मां अनुगृहाण याचितः सन् १४ ॥

भा॰ च॰ ८

अभिभाषितः अप्रियावितः कः दक्षः यान् आह मर्मभिदं इति ये ताः कुवागिषून् दुरुक्तिबाणान् संस्मारितः सन्
१५ अनाहूता अपि इति त्वया यत् उदितं उक्तं तत् शोभनमेव किंतु अनात्म्यं देहादौ अहंकारः तत्कृतेन मदेन मन्युना च
ते बंधवः यदि अनुत्पादितदोषदृष्टयो भवंति न उत्पादिता आरोपिता दोषे दृष्टिः येषां ते १६ ननु विद्यादिगुणयुक्तः दक्षः
तादृशेषु महत्सु कथं दोषदृष्टिः भवेत् तत्राह विद्यादिभिरेव स्मृतौ हतायां विवेकज्ञाने नष्टे सति भूयसां महत्तमानां धा
म तेजः न पश्यंति हि ननु गुणैः कथं विवेकनाशः तत्राह सतां गुणैः विवेकहेतुभिरिति अपि असत्तमानां इतरैः दोषभूतैः

ऋषिरुवाच एवं गिरित्रः प्रिययाभिभाषितः प्रत्यभ्यधत्त प्रहसन्सुहृत्प्रियः संस्मारितो मर्मभिदः कुवागि
षून्यानाह को विश्वसृजां समक्षतः १५ श्रीभगवानुवाच त्वयोदितं शोभनमेव शोभने अनाहूता अप्य
भियंति बंधुषु ते यद्यनुत्पादितदोषदृष्टयो बलीयसानात्म्यमदेन मन्युना १६ विद्यातपोवित्तवपुर्वयः
कुलैः सतां गुणैः षड्भिरसत्तमेतरैः स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा न पश्यंति हि धाम भूयसां १७
नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनां येभ्यागतान्वक्रधियाभिचक्षते आ
रोपितभ्रूभिरमर्षणाक्षिभिः १८ तथारिभिर्न व्यथते शिलीमुखैः शेतेर्दितांगो हृदयेन दूयता स्वानां यथाव
क्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः १९

अत एव तेः भृतः पुष्टो वा अहं विद्वान् तापस इत्यादि मानः गर्वः [illegible] दृष्टिर्येषां इति १७ स्वजनव्यपेक्षया बंधुदृष्ट्या
गृहान् न प्रतीयात् न अवलोकयेत् अनवस्थितात्मनां [illegible] यदक्रधिया कुटिलबुध्या पश्यंति आरोपिता
उत्क्षिप्ता भ्रूः येषु तानि आरोपितभ्रूणि तैः आरोपितानि भ्रूणि इति वा १८ ननु स्वजनानां गृहे सुहृदः गंतव्यं तेषां दुश्चेष्टि
तं सोढव्यं न तत्स्य दुःसहत्वात् इत्याह तथेति अरिभिः शिलीमुखैः बाणैः आर्दितांगः खंडितगात्रोपि तथा न व्यथते वि
पतः शेते स्वपिति स्वानां दुरुक्तिभिः मर्मसु ताडितः यथा दूयता व्यथमानेन हृदा दिवानिशं तप्यति १९

भि

श्रीराम

मयि तत्र गतायां न दुःखं शंकेति चेत् तत्राह व्यक्तमिति निश्चितं उत्कृष्टा गतिः स्थितिः यस्य तस्य आत्मजानां कन्यानां मध्ये त्वं प्रियेति
संमतेति असि पितुः सकाशात् मानं न लप्स्यते। मदाश्रयात् मत्संबंधात्। २० ननु भगवन् त्वया किमिति दक्षः तिरस्कृतः यतः
असौ त्वां द्वेष्टि अत आह पापच्यमानेन अलं दह्यमानेन हृदा दुःखि[illegible]कामिः पुरुषः जीवः तस्य बुद्धिः चित्तं तत्साक्षिणां
निरहंकाराणामित्यर्थः समृद्धिभिः पुण्यकीर्त्यादिभिः एषां पदं [illegible] प्राप्तुं अकल्पः अशक्तः सन् परं द्वेष्टि असुरा य
था हरिं केवलं विद्वेष्टि २१ ननु त्वया प्रत्युत्थानविनयाद्यकारणात् अपमानात् एव अभीत तत्राह हे सुमध्यमे प्रत्युद्गमादिकं मिथः
जनैः यत् विधीयते तत् प्राज्ञैः साधु विधीयते साधुत्वमेवाह परस्मै श्रीवासुदेवाय गुहाशयाय अंतर्यामिणे एव तत्र चेतसे
व परिपूर्णे तस्मिन् कायिकव्यापारायोगात्। अतः अंतर्यामिदृष्ट्या मनसा सर्वं कृतमिति भावः २२ किंच न के त्वं अभ्यागते

व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियात्मजानामसि सुभ्रु संमता तथापि मानं न पितुः प्रपत्स्यसे तदाश्रयात्कः परित
प्यते यतः २० पापच्यमानेन हृदातुरेंद्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणां अकल्प एषामधिरोढुमंजसा पदं परं द्वेष्टि
यथासुरा हरिं २१ प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे प्राज्ञैः परस्मै पुरुषाय चेतसा गुहा
शयायैव न देहमानिने २२ सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः सत्त्वे च तस्मिन्भगवान्वासु
देवो ह्यधोक्षजो मे नमसा विधीयते २३

ध्रुवं वासुदेवध्यानं मनो क्रियते किंतु नित्यमेव मनसि वासुदेवः चिंत्यते इत्याह विशुद्धं सत्त्वं अंतःकरणं सत्त्वगुणो वासुदेवश
२तस्मिन ब्दितं वसुदेवशब्देन उक्तं कुतः यत् यस्मात् तत्र सत्त्वे पुमान् वासुदेवः ईयते प्रकाशते अपगतं आवरणं यस्मात् सः अयमर्थः वसु
देवे भवति प्रतीयते इति वीदेवः परमेश्वरः प्रसिद्धः स च विशुद्धसत्त्वे प्रतीयते अतः प्रत्ययार्थेन [illegible] प्रकृत्यर्थः निर्धार्यते
तेन श्रवासयति देवमिति व्युत्पत्त्या वा वसत्यस्मिन्निति वा वसुदीव्यते द्योतते इति वा वसुभिः पुण्यैः दीव्यति प्रकाशते इति वा वसुदे
वशब्दवाच्यं शुद्धं सत्त्वं ततः किं अत आह सत्त्वे च तस्मिन् मे मया नमसा नमस्कारेण अनुविधीयते सेव्यत इत्यर्थः नमसानुपाठे
मनसा विशेषण पाधीयते धार्यते चिंत्यत इत्यर्थः यतः अधोक्षः तेषु प्रत्याहृतेषु अक्षेषु जायते प्रकाशते इति वा गोचर इत्यर्थः २३

मु

भा॰ ४॰ तस्मात् त्वयानिरीक्ष्यः देहकृदपीति पोषकत्वादिभिः औपचारिकपितृत्वात् अस्यार्थं द्विषद् शत्रुः तदेवाह देवरोरूपः दक्षः

९ विश्वसृजां यज्ञगतं मां निरपराधं तिरस्करोत् तिरस्कृतवान् २४ विपक्षे दोषमाह यदीति मद्वचः अतिजहाय अतिक्रम्य यतः

संभावितस्य स्वकृतप्रतिष्ठस्य यदा पराभवः भवति तदासः पराभवः तस्य मरणाय कल्पते २५ ।इति चतुर्थस्कंधे चतुर्थोध्यायः ॥३ नी॰

चतुर्थे तु पतिं हित्वा गता पित्रावमानिता रुषा निर्भर्त्स्यतं यत्तेजहौ देहमितीर्यते १ उभयत्र अनुज्ञाते बलाभिवारणे च सुहृद्दि

दृक्षुः निष्क्रामतीति भवान् परिशंकिता पुनः निर्विशतीव तदासती द्विधा आंदोलितचित्ता आस बभूव । १ सुहृद्दिदृक्षा

याः प्रतिघातेन दुर्मनाः अश्रूणां कलाभिः लेशैः अतिविह्वला व्याकुला अप्रतिपुरुषं स्वसमानपुरुषांतररहितं प्रधक्ष्यतीव

ततोनिरीक्ष्योन पितापि देहकृत् दक्षो मम द्विट् तदनुव्रताश्च ये यो विश्वसृड्यज्ञगतं वरोरु मामनागसं दुर्वचसाकरोत्तिरः २४

यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति संभावितस्य स्वजनात्पराभवो यदा स सद्यो मरणाय कल्पते २५

॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे तृतीयोध्यायः ३ ॥ ॥ मैत्रेय उवाच ॥ एतावदुक्त्वा विरराम

शंकरः पत्न्यंगनाशं ह्युभयत्र चिंतयन् सुहृद्दिदृक्षुः परिशंकिता भवान्निष्क्रामती निर्विशती द्विधाससा १ सुहृद्दिदृक्षा

प्रतिघातदुर्मनाः स्नेहाद्रुदत्यश्रुकलातिविह्वला भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः २ ततो विनिश्व

स्य सती विहाय तं शोकेन रोषेण च दूयता हृदा पित्रोरगात्स्त्रैण्यविमूढधीर्गृहान्प्रेम्णात्मनो योर्धमदात्सतां प्रियः ३

तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः सपार्षदयक्षा मणिमन्मदादयः पुरो वृषेंद्रास्तरसा गतव्यथाः ४ ॥

भस्मी करिष्यतीव रुषा जातः वेपथुः कंपः यस्याः २ ततः तं विहाय पित्रोः गृहान् आगात् जगाम कथंभूतं यः प्रीत्या तस्यै आत्मनः

देहस्य अर्धं अदात् सा गेहेतुः स्त्रैण्यं स्त्रीस्वभावः तेन विमूढा [illegible] तस्याः ३ द्रुतविक्रमां शीघ्रं गच्छंती सह पार्षदैः यक्षैश्च श्रीकृष्ण

वर्तमानाः मणिमन्मदश्च आदिः येषां ते पुरतः वृषेंद्रः येषां [illegible] नदीर [illegible] थाः निर्भयाः रुद्रातिक्रमेण तस्याः गमनात्

आगतव्यथा इतिवा ४ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ ९

तां वृषेंद्रं आरोप्य सारिकादिभिः क्रीडोपकरणैः श्वेतातपत्रादिभिश्च महाराजविभूतिभिः सह विटंकिताः शोभिताः ययुः ॥

सारिका पठनानिरूपिताभिज्ञा पक्षिणी गीतायनैः गीताश्रये आश्रमंतात् यः ब्रह्मघोषः तेन ऊर्जितं शोभमानं यज्ञस्य वै

धि पशुविशासनं यस्मिन् यद्वा तेनऊर्जितं अतिशायितं यज्ञवैशसं [illegible] उपरस्पर्द्धो यस्मिन् तत् यजनं यज्ञस्थानं समावि

शत् देवी विबुधैश्च जुष्टं मृदादिभिः निसृष्टानि निर्मितानि भांडानि [illegible] यस्मिन् कश्चन न आद्रियत न आदृतवान् ॥

यज्ञकृतः दक्षात् यत् भयं तस्मात् तत्र हेतुः तेन विमानितं स्वसृः जननीं च ऋते विना तास्ताः सोदराः परिषस्वजुः आलिं

गितावंसः प्रेमाश्रुभिः रुद्धः कंठः यासां ७ अप्रतिनंदिता अनादृता सती न आदत्त न गृहीतवती कथं सोदर्यसं

आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः मृद्दार्वयः कांचनदर्भचर्मभिर्निसृष्टभांडं यजनं समा

विशत् ५ तां सारिकाकंदुकदर्पणांबुजः श्वेतातपत्रव्यजनस्रगादिभिः गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य

विटंकिता ययुः ६ तामागतां तत्र न कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः ऋते स्वसॄर्वै जननीं च सोदराः प्रेमा

श्रुकंठ्यः परिषस्वजुर्मुदा ७ सौदर्यसंप्रश्नसमर्थवार्तया मात्रा च मातृष्वसृभिश्च सादरं दत्तां सपर्यां वरमास

नं च सा नादत्त पित्रा प्रतिनंदिता सती ८ अरुद्रभागं तमवेक्ष्य चाध्वरं पित्रा च देवे कृतहेलनं विभौ अनादृता यज्ञसद

स्यधीश्वरी चुकोप लोकानिव धक्ष्यती रुषा ९ जगर्ह सामर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयम् ॥

स्वतेजसा भूतगणान्समुत्थितान्निगृह्य देवी जगतोभिशृण्वतः १०

दरत्वेन भगिनीनां यः संप्रश्नः तत्र समर्था योग्या या वार्ता तया सह तां च न आदत्त न अभ्यनंदितवती ८ न विद्यते रु

द्रस्य भागः यस्मिन् देवरुद्रे कृतं हेलनं अवज्ञानं आवाहनाद्यकरणात् ९ जगर्ह निंदितवती अमर्षेण कोपेन

विपन्ना अव्यक्ता तथा गिरा शिवं द्वेष्टीति शिवद्विट् धूमपथः कर्ममार्गः तत्र श्रमः अभ्यासः तेन स्मयः गर्वः यस्य

दक्षवधाय समुत्थितान् स्वान् यानि गृह्य निवार्य १० निंदामेवाह नयस्यातित्र्योदशभिः ११ श्रीरामः शरण

भा॰ च॰ मुक्तवैरके सकृद्विरोधे तस्मिन् शिवे भवंतं कृतेविना कतमः प्रतीपयेत् प्रतिकूलं आचरेत् वैराभावेहेतवः यस्यलोकेअ
तिशायनः अतिशायितः नास्तितथा प्रियश्च अप्रियश्चनास्तिसमासपाठेनेअतिशयेनाप्रियःनास्ति देहभृतांप्रियः
१० अयं आत्मातस्यसमस्तस्य आत्मनि कारणभूते समस्तरूपेइतिवा ११ तस्यचप्रतिकूलकरणेद्वेधा महत्समद्रोहे
णसाक्षात्तद्रोहेणच तत्रपुरुषाणांवाधुर्विध्यंवदंती महत्तमद्रोहमाह दोषानितिद्वाभ्यां हेद्विजेत्यधिक्षेपः भवादृशाः
त्वद्विधाः अल्पकाः परेषांगुणेषुदोषानेवग्रह्णंति नतुगुणान् केचित् मध्यस्थाः गुणेषुदोषान् नग्रह्णंति किंतुयथास्थि

नयस्यलोकेस्यातिशायितःप्रियस्तथाऽप्रियोदेहभृतांप्रियात्मनः तस्मिन्समस्तात्मनिमुक्तवैरके कृतेभवंतंक
तमःप्रतीपयेत् ११ दोषान्परेषांहिगुणेषुसाधवोग्रह्णंतिकेचिन्नभवादृशाद्विज गुणांश्चफल्गून्बहुली
करिष्णवोमहत्तमास्तेषुविदद्भवानघं १२ नाश्चर्यमेतद्यदसत्सुसर्वदामहद्विनिंदाकुणपात्मवादिषु ॥
सेर्ष्यंमहापूरुषपादपांसुभिर्निरस्ततेजस्सुतदेवशोभनं १३

तान् गुणदोषान् विवेकेनग्रह्णंति तेमहांतउच्यंते साधवस्तुकेवलंगुणानेवग्रह्णंति नदोषान् तेतुमहत्तराउच्यंतेमहत्त
मास्तुदोषानग्रह्णंति प्रत्युत फल्गून् तुच्छानपिगुणान् बहुलीकरिष्णवः बहुलीकुर्वंति तेषुभवान् अ घं अविद्वन्
विदितवान् कल्पितवानित्यर्थः तत्रब्रह्मनिष्ठान् अभिभूयेत्यनेनसूचितं १२ एतच्चदुर्जनेषुयुक्तमेवेत्याह नेति कुणपं जे
ड्शरीरं तदेवआत्मेतिवदंति तेषुदुर्ष्यो अश्लोतिः सेर्ष्यंयथाभवत्येवंमहतांविनिंदेति यत् एतत् आश्चर्यंनभवति श्रीराम
सेर्ष्यं निरस्ततेजः प्रभावः येषांइतिवा यद्यपिमहापुरुषाः स्वनिंदांसहंते तथापि तत्पादरेणवः तत् असहमा
नाः तेषांतेजःनिरस्यंति अतःअसत्समेषुमहान्निंदनमेवउचितमित्यर्थः ॥ १३ श्रीरामःशरणंममेतिपरमः १०

तदेवंमहद्द्रोहमुक्त्वा तस्मिन्नेवकृतंद्रोहमाह यदितिद्वाभ्यां यत् यस्य द्व्यक्षरंमात्रंशिवइति तत्प्रसिद्धं नामनृणां सर्वेषां
आशु अघं पापंहंतिकेवलं गिराएवईरितं उच्चारितं नतुमनः पूर्वकं तच्चसकृदपि प्रसंगादपि तंशिवंद्वेष्टि नलंघ्यं।
शासनं आज्ञायस्य अहोशिवेतरः अमंगलरूपः १४ पापहरत्वमुक्तं भुक्तिमुक्तिप्रदत्वेन शिवंवर्णयंतीतिमाह
यस्यपादपद्मं मनांस्येव अलयस्तैः ब्रह्मरसः ब्रह्मानंदः सेवासवः मकरंदः तदर्थिभिः यत्च अर्थिनः सकामस्यलो
कस्य आशिषः वर्षति १५ यदुक्तंशिवापदेशोह्यशिवइतियच्चउक्तंप्रेतावासेधरत्यादि तत् आक्षिपंतीआह किं
वेतियः जटाः अवकीर्य श्मशानेअवसन् वसतिस्म तस्यश्मशानस्यमाल्यानिभस्मानि॥ ५ ॥ ६ ॥ ७
यद्द्व्यक्षरंनामगिरेरितंनृणांसकृत्प्रसंगादघमाशुहंतितत् पवित्रकीर्तिंतमलंघ्यशासनंभवानहोद्वेष्टिशि
वंशिवेतरः १४ तत्पादपद्मंमहतांमनोलिभिर्निषेवितंब्रह्मरसासवार्थिभिः॥ लोकस्ययद्वर्षतिचाशिषो
र्थिनस्तस्मैभवान् द्रुह्यतिविश्वबंधवे १५ किंवाशिवाख्यमशिवंनविदुस्त्वदन्येब्रह्मादयस्तमवकीर्य
जटाःश्मशाने तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्येमूर्धभिर्दधतितच्चरणावसृष्टं १६ कर्णौपिधायनि
रंकुशकल्पईशेधर्मावितर्यसृणिभिर्नृभिरस्यमाने छिंद्यात्प्रसह्यरुशतीमसतींप्रभुश्चेत्जिह्वामसूनपिततोवि
सृजेत्सधर्मः १७

नृकपालानिचभस्मपवालेन संतियस्यवनत्वतः अन्येनविदुःकिं विदंत्येवेति चेत् न तथासति तेषांतद्दास्यानुपपत्ते
रित्याह तच्चरणात् अवसृष्टंगलितंनिर्माल्यं येमूर्धभिःधारयंति १६ इदानींदेहंसत्कृत्कामा धर्मतत्त्वमाह कर्णावाच्छा
३यत् द्यनिर्गच्छेत् यद्यपि मर्तुंमारयितुं वाकल्पः नभवति कदाधर्मावितरि धर्मरक्षकेईशेस्वामिनि असृणिभिः निरंकु
शैःनृभिःअस्यमाने अधिक्षिप्यमाणे प्रभुःशक्तश्चेत् रुशतीं अकल्याणवादिनीं प्रसह्यबलात् छिंद्यात्।
ततोपिस्वयंप्राणान् विसृजेत् इतियत् सधर्मः १७

तव त्वत्तः उत्पन्नं शितिकंठः नीलकंठः तस्मिंदकात् प्रमादात् आपन्नस्य अपवित्रस्य त्यागंविना नशुद्धिरिति दृष्टांते
नाह उग्रधस्य भक्षितस्य अन्नस्य उद्धरणं वमनमेव पुंसः शुद्धिं प्रचक्षते १८ यत्तूक्तं लुप्तक्रियायाशुचयइति तत्राह
ह नेति वेदवादान् विधिनिषेधरूपान् स्वएवलोके आत्मन्येवरममाणस्य महतः मुनेः सम्यक् विरक्तस्य मतिः नअनुवर्तते
निवृत्ताधिकारित्वात् अधिकारभेदे दृष्टांतः यथादेवानांगतिः आकाशेएव मनुष्याणांपृथिव्यामेव अतः स्वएवधर्मे प्र
वृत्तिलक्षणे निवृत्तिलक्षणेवास्थितः सन् परं अन्यंधर्मेपुरुषंवा नाक्षिपेत् ननिंदेत् व्यवस्थिताधिकारित्वेन उभयोः
सत्यत्वात् ननिक्षिपेदेवइतिवा अन्वयः १९ एतएवउपमादयस्ताहु प्रवृत्तंअग्निहोत्रादीनि वृत्तं शमदमादि ॥ ॥

अतस्तवोत्पन्नमिदं कलेवरं नधारयिष्ये शितिकंठगर्हिणः जग्धस्य मोहाद्धि विशुद्धिमंऽसोजुगुप्सि
तस्योद्धरणं प्रचक्षते १८ नवेदवादाननुवर्ततेमतिः स्व एवलोकेरमतोमहामुनेः यथागतिर्देवमनुष्य
योः पृथक् स्वएवधर्मेनपरंक्षिपेतस्थितः १९ कर्मप्रवृत्तं चनिवृत्तमप्यृतं वेदेविविच्योभयलिंगमाश्रि
तं विरोधितद्यौगपदेककर्तरिद्वयंतथाब्रह्मणिकर्मनर्छति ॥२०॥

ऋतं सत्यमेव यतः वेदे विहितं आश्रितं तत्र विविच्य विषयव्यवस्थया आश्रितं ननु अविशेषेण तत्र विशेषेण व्य
वस्थामेवाह उभयं रागवैराग्यलक्षणं लिंगं चिन्हं अधिकारिविशेषणं यस्मिन् तत् ननु यावज्जीवमग्निहोत्रं जुहोति
शांतोदांत इत्यादिषु नैवंव्यवस्थाप्रतीयते सत्यं तथापि उभयोः एकाधिकारिविरोधात् तथाव्यवस्थेत्याह युग
पद्भावः यौगपद्यं यौगपद्येन एकस्मिन् कर्तरि तत्कर्मद्वयं विरोधि ननु तर्हि निवृत्तकर्मशिवेनापि कर्तव्यमेवेत्यत
आह ब्रह्मणि सदाशिवे किंचित् तदपि कर्मेत्यत्र ऋच्छति नप्राप्नोति अतः प्रवृत्तनिवृत्तयोः परस्परधर्मीकरणे नदो
षः

चिताभस्मकृतस्नानः तथा नग्नइत्यादिना भोगाद्यभावउक्तः तत्राह हे पितः अस्माभिः आस्थिताः आश्रिताः अणि
मादिसिद्धयः वःयुष्माकं मानसंतीत्यर्थः यतः वः पदव्यः यज्ञशालास्वेवभवंति ताश्चतन्नतप्तैः तदन्नेन यज्ञगतेन अन्नेनत
प्तैः केवलं ईडिताः धूमवर्त्मभिश्च भुज्यंते अस्मत्पदव्यस्तु न एवंभूताः किंतु अव्यक्तलिंगाः अव्यक्तं लिंगं हेतुर्यासांताः
इच्छामात्रप्रभवत्वात् अवधूतैः ब्रह्मविद्भिः सेविताः अतः अहं आढ्यः कदाचिदइति गर्वं माकृथा इतिभावः २१ किंच
वकृतोक्तेन इदंतु देहं त्यक्ष्याम्येवेत्याह द्वाभ्यां एतेन नअलं नपूर्यो किं अपितु अलमेव कथंभूतेन एतेन कुजन्मना ते
तदेवाह हरे कृतापराधस्य तवदेहात् उद्भूतेन ननु श्लाघ्योहयं देहः कथं त्याज्यः तत्राह कुजनस्य तवप्रसंगतः संबं

मावःपदव्यःपितरस्मदास्थितायज्ञशालासुनधूमवर्त्मभिः तदन्नतृप्तैरसुभृद्भिरीडिताअव्यक्तलिंगाअ
वधूतसेविताः २१ नैतेनदेहेनहरेकृतागसोदेहोद्भवेनालमलंकुजन्मना व्रीडाममाभूत्कुजनप्रसंगतस्तज्ज
न्मधिग्योमहतामवद्यकृत् २२ गोत्रंत्वदीयंभगवान्वृषध्वजोदाक्षायणीत्याहयदासुदुर्मनाः व्यपेतन
र्मस्मितमाशुतद्ध्यहं व्युत्स्रक्ष्यएतत्कुणपंत्वदंगजं २३ मैत्रेयउवाच इत्यध्वरेदक्षमनूद्यशत्रुहन्क्षि
तावुदीचींनिषसादशांतवाक् स्पृष्ट्वाजलंपीतदुकूलसंवृतानिमील्यदृग्योगपथंसमाविशत् २४॥

संबंधात् ममलज्जा अभूत् अतः यः महतां अप्रियकर्तातस्मात् यत्जन्मतत् धिक् त्वत्संबंधात् अश्लाघ्यमि
त्यर्थः २२ किंचपरिहासादिषु विनोदेनापि दाक्षायणीतिसंबोधयन् त्वदीयं त्वत्संबंधिवाचकं गोत्रं नाम य
दा वृषध्वज आह तदा अहं व्यपेतनर्मस्मितं यथाभवत्येवं दुर्मना अतिदुःखिता चिंताभवामि तत् तस्मात् क्षिति
श्रितं एतत् कुणपप्रायं व्युत्स्रक्ष्ये त्यक्ष्यामि २३ दक्षंप्रति अनुवादं कृत्वा शत्रुहन् क्रोधादिरिपुघातिन् उदी
चीं उदीच्यांदिशि पाठांतरे उदङ्मुखी शांतवाक् गृहीतमौना जलं स्पृष्ट्वा आचम्य दृक् दृशा २४ योगमार्गमेवाह

भा· च४
१२
कृत्वेति अनिलौ प्राणापानौ ऊर्ध्वाधोवृत्तिकरौ निरोधेन समौ एकरूपौ नाभिचक्रे कृत्वा ततः उदानं उत्थाप्य धिया
सह हृदि स्थापयित्वा कंठे योगमार्गेण भ्रुवोः मध्ये अनयत् २५ महतां पूज्यतमेन २६ चरणांबुजे आसवं मकरंदं भ
र्तुः अपरं न ददर्श देहश्च सद्यः प्रज्वलितः अभूत् समाधिना जातः यः अग्निः तेन २७ खे भुवि च हाहा इत्यादि वादः
तमेवाह हंतेति विषादे दैवतमस्य पूज्यतमस्य प्रिया केन दक्षेण प्रकोपिता सती २८ महमहत् अनात्म्यं दौर्जन्यं

कृत्वासमानावनिलौजितासनासोदानमुत्थाप्यचनाभिचक्रतः शनैर्हृदिस्थाप्यधियोरसिस्थितंकंठाद्भ्रुवोर्म
ध्यमनिंदितानयत् २५ एवंस्वदेहंमहतांमहीयसामुहुः समापितमंकमादरात् जिहासतीदक्षरुषामनस्वि
नीदधारगात्रेष्वनिलाग्निधारणां २६ ततःस्वभर्तुश्चरणांबुजासवंजगद्गुरोश्चिंतयतीनचापरं ददर्शदेहोह
तकल्मषःसतीसद्यःप्रजज्वालसमाधिजाग्निना २७ तत्पश्यतांखेभुविचाद्भुतंमहद्धाहेतिवादःसुमहा
नजायत हंतप्रियादैवतमस्यदेवीजहावसून्केनसतीप्रकोपिता २८ अहोअनात्म्यंमहदस्यपश्य
तप्रजापतेर्यस्यचराचरंप्रजाः जहावसून्यद्विमतात्मजासतीमनस्विनीमानमभीक्ष्णमर्हति २९।
सोयंदुर्मर्षहृदयोब्रह्मध्रुक्चलोकेपकीर्तिंमहतीमवाप्स्यति यदंगजांस्वांपुरुषद्विडुद्यतांनप्रत्यषेध
न्मृतयेपराधतः ३०

अस्य सर्वत्र स्नेह एव न्याय्य इत्याह यस्येति येन विमता अवज्ञाता २९ दुर्मर्षं असहनं हृदयं यस्य लोके देवकीकृस्न
जनमध्ये च ब्रह्मध्रुक् नरकं च यद्यतः स्वीयां अंगजां सुतां अपराधतः स्वावज्ञया मृतये मरणाय उद्यतां १२
न वारितवान् पुरुषद्विट् देवद्विट् शिवद्वेषी ३० ॥छ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

अद्भुतं दृष्ट्वा च ३१ यत् यज्ञघ्नान् हंतीति यज्ञघ्नघ्नं तेन अपहतं रक्ष इत्यादिना ३२ अध्वर्युणा भृगुणा येन तपसा सोमं प्रा
प्ताः ऋभवः नाम देवाः उत्थिताः ३३ ब्रह्मतेजसा रुशद्भिः दीप्यमानैः ३४ इति चतुर्थे चतुर्थः पंचमे तु सतीदेहत्या
गमाकर्ण्य शंकरः वीरभद्रं रुषोत्पाद्य तेन दक्षमघातयत् १ प्रजापतेः हेतोः निधनं कृतः तेन असत्कृतायाः तस्य
अध्वरे यत्र ऋभवः देवाः तैः १ सः धूर्जटिः रुद्रः घोरः सन् जटां उत्कृत्य उत्पाट्य उत्थितः हसन् तां भुवि ससर्ज सुदष्टः
ओष्ठपुटः येन तडितां वह्नीनां सटाः ज्वालाः तद्वत् उग्रं रोचिः यस्याः तां २ ततः जटायाः सकाशात् अतिकायः वीरभद्रः

वदत्येवंजनेसत्यादृष्ट्वासुत्यागमद्भुतं दक्षंतत्पार्षदाहंतुमुदतिष्ठन्नुदायुधाः ३१ तेषामापततांवेगंनिशा
म्यभगवान्भृगुः यज्ञघ्नघ्नेनयजुषादक्षिणाग्नौजुहावह ३२ अध्वर्युणाहूयमानेदेवाउत्पेतुरोजसा ऋभ
वोनामतपसासोमंप्राप्ताःसहस्रशः ३३ तैरलातायुधैःसर्वेप्रमथाःसहगुह्यकाः हन्यमानादिशो
भेजुरुशद्भिर्ब्रह्मतेजसा ३४ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेसतीदेहोत्सर्गश्चतुर्थोध्यायः ४
मैत्रेयउवाच ॥ भवोभवान्यानिधनंप्रजापतेरसत्कृतायाअवगम्यनारदात् स्वपार्षदसैन्यंचतदध्वरर्भुभि
र्विद्रावितंक्रोधमपारमादधे १ क्रुद्धःसुदष्टौष्ठपुटःसधूर्जटिर्जटांतडिद्वह्निसटोग्ररोचिषं उत्कृत्यरुद्रःसहसोत्थि न०
तोहसन्गंभीरनादोविससर्जतांभुवि २ ततोतिकायस्तनुवास्पृशन्दिवंसहस्रबाहुर्घनरुक्त्रिसूर्यदृक् करा
लदंष्ट्रोज्वलदग्निमूर्धजःकपालमालीविविधोद्यतायुधः ३ तंकिंकरोमीतिगृणंतमाहबद्धांजलिंभगवान्भूत
नाथः दक्षंसयज्ञंजहिमद्भटानांत्वमग्रणीरुद्रभटांशकोमे ४

भानस्तिरोधः तनुवा तन्वा देहेन दिवं स्पृशन् अत्युच्चत्वार्थः घनरुक् कृष्णवर्णः त्रयः सूर्या इव दृशः यस्य करालाः तुंगाः दंष्ट्राः
यस्य ज्वलदग्निरिव धूम्रमूर्धजाः यस्य कपालमालायुक्तः विविधानि उद्यतानि आयुधानि यस्य ३ हे रुद्र हे भट पुरुष करालमद्भ
टानां त्वमग्रणीः सन् सयज्ञं दक्षं जहि ब्रह्मतेजः उर्जयानि नमा अवमस्त्वाः यतः त्वं मे अंशकः ४ ॥छ॥ छ॥ छ॥

मन्युनारुद्रेण परिचक्रमे प्रदक्षिणीचकार अंसंगं अप्रतिघातं यत् रंहः वेगः तेनभोतात महीयसां बलीयसामपिसहः
सहिष्णुं बलंसोढुं क्षमंमेने ५ जगदंतकः मृत्युः तस्यापिभंतकंशूलंघोषयंति शब्दंकुर्वंति घोषणानि भूषणानि नूपुरादीनि
यस्यास्तीअंघ्रीयस्यसः ६ ककुभिदिशितमः नभवति किंतुरजः इतिज्ञात्वा आकुः रजएतत् कुतः अभूत् दध्युः चिंतयामासुः ७
हेत्वंतरासंभवेन औत्पातिकं कल्पयंति वाताइति दस्यूनांअभावेहेतुः प्राचीनबर्हिः तदानींतनः राजाजीवति नकाल्यंते वु
नशीघ्रंनीयंते ८ प्रसूतिः दक्षपत्नी सामिश्रामुख्या यासांविपाकः फलंपश्यंतीनामिति तस्याकुः स्वाधिक्ये हेतुः अवरध्यो

आज्ञप्तएवंकुपितेनमन्युनासदेवदेवंपरिचक्रमेविभुं मेनेतदात्मानमसंगरंहसामहीयसांतातसहःसाहिष्णुं ५
अन्वीयमानःसचरुद्रपार्षदैर्भृशंनदद्भिर्व्यनदत्सुभैरवं उद्यम्यशूलंजगदंतकांतकंसंप्राद्रवत्घोषणभूषणांघ्रिः ६
अथर्त्विजोयजमानःसदस्याःककुभ्युदीच्यांप्रसमीक्ष्यरेणुं ~~गावीन कात्स्न्यं तदरं कुतो रजो लोको फना किं प्रलयाय कल्पते~~
तमःकिमेतत्कुतएतद्रजोभूदितिद्विजाद्विजपत्न्यश्चदध्युः ७ वातानवांतिनहिसंतिदस्यवःप्राचीनबर्हिःजी
वतिहोग्रदंडः गावोनकाल्यंतइदंकुतोरजोलोकोधुनाकिंप्रलयायकल्पते ८ प्रसूतिमिश्राःस्त्रियउद्विग्नचित्ता
ऊचुर्विपाकोवृजिनस्यैषतस्य यत्पश्यंतीनांदुहितॄणांप्रजेशः सुतांसतीमवदध्यावनागां ९ यस्त्वंतकालेव्यु
प्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेंद्रः वितत्यनृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् १०

अवज्ञातवान् अनागां अनागसं ९ नचइदंसुतावज्ञामात्रं किंतुरुद्रावज्ञानं अतः न अस्यभद्रंभविष्यतीत्याकूः ७
यस्त्वितिद्वाभ्यां व्युप्तः विकीर्णः जटाकलापःयस्य स्वशूलस्यसूच्यग्रअर्पिताः दिग्गजेंद्राः यस्यउदितानिउन्नमिता रुद्रः
नि अस्त्राणियैस्तेदोषः बाहवः एवध्वजाः तान्वितत्य हर्षेणनृत्यति उच्चैः अट्टहासः कठोरहासएव स्तन
यित्नुं गर्जितं तेनभिन्नाः विदीर्णाः दिशः येनसः १० ॥७॥ ॥७॥ ॥७॥ ७॥ ७॥ ७॥ १३

नो

अमर्षयित्वा असहनयुक्तंकृत्वा मन्युप्लुतं क्रोधव्याप्तं उदस्तः विक्षिप्तः भागणाः नक्षत्रसंघातः येनपुनश्चतंकोपयतः
विधातुरपि किंस्वस्तिस्यात् नस्यादेव अन्यस्यकाकथा ११ उद्विग्नाप्रचलितादृक्यस्य जनेनबहुयथाभवत्येवं उच्य
मानेसति उत्पाततमाः महोत्पाताः उत्थिताः पर्यक् सर्वतश्च कथंभूताः महात्मानः दक्षस्यापिभयावहाः १२ नाना
आयुधानियेषांवामनकैः कैश्चिः उद्यतायुधैः पिंगैः कपिलैः पिशंगैः पीतैः मकरस्येवउदरं आननंचयेषांतैः परितः

अमर्षयित्वातमसह्यतेजसंमन्युप्लुतंदुर्विषहंभ्रुकुट्या करालदंष्ट्राभिरुदस्तभागणंस्यात्स्वस्तिकिंकोपयतोविधा
तुः ११ बह्वेवमुद्विग्नदृशोच्यमानेजनेनदक्षस्यमुहुर्महात्मनः उत्पेतुरुत्पाततमाःसहस्रशोभयावहादिवि
टी०१ भूमौचपर्यक् १२ तावत्सरुद्रानुचरैर्महामखोनानायुधैर्वामनकैरुदायुधैः पिंगैःपिशंगैर्मकरोदराननैःपर्या
द्रवद्भिर्विदुरान्वरुध्यत १३ केचिद्बभंजुःप्राग्वंशंपत्नीशालांतथापरे सदआग्नीध्रशालांचतद्विहारंमहान
सं १४ रुरुजुर्यज्ञपात्राणितथैकेग्नीननाशयन् कुंडेष्वमूत्रयन्केचिद्बिभिदुर्वेदिमेखलाः १५ अबाधंत
मुनीनन्येकेचित्पत्नीरतर्जयन् अपरेजगृहुर्देवान् प्रत्यासन्नान्पलायितान् १६॥ भृगुंबबंधमणिमा
न्वीरभद्रःप्रजापतिं चंडीशःपूषणंदेवंभगंनंदीश्वरोग्रहीत् १७

धावद्भिः अवरुध्यः १३ यत्रशालायाः पूर्वपश्चिमस्तंभयोः अर्पितंपूर्वपश्चिमायतंकाष्ठंप्राग्वंशः तंयज्ञशा
लायाः पश्चिमतः पत्नीशाला यतशालायाःपुरतः स्थितं सदोमंडपं सदसःपुरतः हविर्धानं तस्यउत्तरतःआ
ग्नीध्रशालां तद्विहारं यजमानगृहं महानसंपाकभोजनशाला १४ रुरुजुः बभंजुः उत्तरवेद्या मेखलाः
सीमासूत्राणि १५ ॥१६॥ १७ ॥ ॐ श्रीरामःशरणंममेतिपरमोमंत्रोयमष्टाक्षरः॥ ॥ ७

ग्रावभिः अर्द्यमानाः नेकधा अनेकधाउडुवुः १८ स्रुवः हस्ते यस्य सः भवः वीरभद्रः लुलुंचे उत्पाटितवान् १९ उच्चहार उद्
नवान् सदसः सभायां स्थितः सन् शपंतं शिवनिंदां कुर्वंतं दर्शं अक्षिनिकोचनेन अस्सूचयन् सूचितवान् २०
कलिंगदेशराजस्य अनिरुद्धोद्वाहे बलभद्रः यथा धूर्तदंतान् पातितवान् गरिमाणि गुरुतरे निघ्नमाने दूतः दंता
न्दर्शयन् यः जहास पूष्णोरिति पाठे द्विवचनं ऐद्रः पौष्णश्च रुर्भवति इत्यत्र तस्यापि पूष्णः दंतपातप्राप्त्यर्थं सूचितवान्
तद्यथा हि पूषा प्रपिष्टभागः अदंतको हितं देवा अब्रुवन्निति विहितस्य पेषस्य णस्य द्विदेवत्याभावात् तेन तस्य दंताः

सर्व एवार्त्विजो दृष्ट्वा सदस्याः सदिवौकसः तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधा द्रवन् १८ जुह्वतः स्रुव
हस्तस्य श्मश्रूणि भगवान्भवः भृगोर्लुलुंचे सदसि योऽहसच्छ्मश्रु दर्शयन् १९ भगस्य नेत्रे भगवान् पाति
तस्य रुषा भुवि उज्जहार सदःस्थोऽक्ष्णा यः शपंतमसूसुचत् २० पूष्णश्चापातयद्दंतान्कलिंगस्य यथा
बलः शप्यमाने गरिमणि योऽहसद्दर्शयन्दतः २१ आक्रम्योरसि दक्षस्य शितधारेण हेतिना छिंद
न्नपि तदुद्धर्तुं शक्नोत्त्र्यंबकस्तदा २२ शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः विस्मयं परमा
पन्नो दध्यौ पशुपतिश्चिरं २३ दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे यजमानपशोः कस्य कायात्तेनाह
रच्छिरः २४

संतीति वक्तव्यं स्यात् न चैतत्संगच्छते इत्याशंक्य दंतपातः अवस्थाभेदेन द्विवचनेन ज्ञाप्यते अत एव पूष्णः अनुग्रहं रू०ल० ९४
देधा वक्ष्यति पूषा तु यजमानस्य दद्भिर्भक्षितु पिष्टभुक् इति केवलश्चेत् पिष्टभुक् भविष्यति अन्यसहितश्चेत् यजमानस्य
दद्भिः भक्षयिष्यतीत्यर्थः २१ छिंदन्नपीत्यत्र शिरइत्यु परिव्यक्तीभविष्यति त्र्यंबकः वीरभद्रः २२ अस्त्रान्वितैः मंत्रसहि
तैः अनिर्भिन्ना त्वक् यस्य तथाभूतं दृष्ट्वेति शेषः २३ पशूनां पतिः मखे संज्ञापनं योगं कंठनिष्पीडनादिरूपं मर
णोपायं दृष्ट्वा तेन उपायेन अहरत् २४

अन्येषां ब्रह्मणादीनां तद्विपर्ययः असाधुवादः अम्लादिति शेषः २५ गुह्यकालयं कैलासं २६ इति चतुर्थे पंचमः ५
षष्ठे देवसंघेन सह गत्वा भवं विधिः सांत्वयारेमास दक्षादिजीवितार्थमादरात् अथ देवगणाः स्वयंभुवे न्यवेदयन्नि
ति द्वितीयेनान्वयः शूलादिभिः १ सच्छिन्नानि त्रुटितानि भिन्नानि विदीर्णानि अंगानि येषां सह ऋत्विग्भिः सभ्यैश्च
वर्तमानाः २ कस्य दक्षस्य न ईयतु न आजग्मुः ३ विभुः ब्रह्मा तेजीयसि भाति तेजस्वी नि पुरुषे कृतागसि सत्यपि स्वयं

साधुवादस्तदा तेषां कर्म तत्तस्य शंसतां ब्रह्मभूतपिशाचानामन्येषां तद्विपर्ययः २५ जुहावैतच्छिरस्त
स्मिन्दक्षिणाग्नावमर्षितः तद्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयं २६ ॥ इति श्रीभागवते महापुराणे
चतुर्थस्कंधे दक्षयज्ञविध्वंसनं नाम पंचमोऽध्यायः ५ ॥ मैत्रेय उवाच अथ देवगणाः सर्वे रुद्रानीकैः
पराजिताः शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः १ सच्छिन्नभिन्नसर्वांगाः सर्त्विक्सभ्या भयाकुलाः स्वयं
भुवे नमस्कृत्य कार्त्स्न्येनैतन्न्यवेदयन् २ उपलभ्य पुरैवैतद्भगवानब्जसंभवः नारायणश्च विश्वात्मा न कस्या श्र५
ध्वरमीयतुः ३ तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि क्षेमाय तत्र सा भूयान्न प्रायेण बुभूषतां ४ ॥
अथापि यूयं कृतकिल्बिषा भवं ये बर्हिषो भागभाजं परादुः प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीतांघ्रिपद्मं ५
आशासाना जीवितमध्वरस्य लोकः सपालः कुपिते न यस्मिन् तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दु
रुक्तैः ६

तत्र कृतागसां बुभूषतां अपराधं कर्तुं इच्छतां सा न तथा बुभूषतां तेषां क्षेमाय न भूयात् प्रायेणेति लोकोक्तिः न भवेदेवे
त्यर्थः ४ अथापि प्रसादयध्वं क्षमापयत ये भवं तेनः बर्हिषः यज्ञस्य भागभाजं परादुः इतरादेवखंडितवंतः प्रगृहीतांघ्रिपद्मं
पादौ प्रगृह्येत्यर्थः ५ अध्वरस्य जीवितं पुनः संधानं प्रार्थयमानाः संतः यस्मिन्कुपिते सति सपालः लोकः न भवेत् नश्येदित्यर्थः ६

भा०टी०८ वयंतु बिभिमः त्वमेव कंचिदुपायं विधत्स्वेति चेत्तत्र अत आह नेति यज्ञः तदानीं तन इंद्रः यस्य तत्त्वं बलवीर्ययोः प्रमाणं इय
१५ त्तां न विदुः वीर्यं पराक्रमं पापामिति पाठे अपराधम् ७।।८ कैलासं वर्णयति जन्मौषधीत्यादि चतुर्दशभिः नरेतरैः देवैः
जुष्टं ९ शृंगैः रमणं रतिप्रदं इक्ष्वतरणान्वयः कथंभूतैः नानाधातुभिः विचित्रैः नानाद्रुमलतागुल्मा येषु तैः १० ।।
नानाकंदराः सानवश्च येषु रमणैः सह क्रीडंतीनां ११ मयूराणां केकाभिः स्वनैः नादितं
नानाअमलानि प्रस्रवणानि येषु तैः

नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वं विदुः प्रमाणं बलवीर्ययोर्वा यस्यात्मतंत्रस्य क उपायं विधित्से
त् ७ स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्र
वरं प्रियं विभोः ८ जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः जुष्टं किंनरगंधर्वैरप्सरोभिर्वृतं सदा ९ नानामणि
मयैः शृंगैर्नानाधातुविराजितैः नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः १० नानामलप्रस्रवणैर्नानाकंदर
सानुभिः रमणं विहरंतीनां रमणैः सह योषितां ११ मयूरकेकाभिरुतं मदांधालिविमूर्छितं प्लावितैरक्तकंठा
नां कूजितैश्च पतत्रिणां १२ आह्वयंतमिवोद्धस्तैर्द्विजान् कामदुघैर्द्रुमैः व्रजंतमिव मातंगैर्गृणंतमिव निर्झरैः १३
लैः मंदारैः पारिजातैश्च सरलैश्चोपशोभितं तमालैः शालतालैश्च कोविदारासनार्जुनैः १४ चूतैः कदंबनीपैश्च नागपुन्ना
गचंपकैः पाटलाशोकबकुलैः कुंदैः कुरबकैरपि १५ स्वर्णशतपत्रैश्च वरवेणुकजातिभिः कुब्जकैर्मल्लिकाभिश्च
माधवीभिश्च मंडितं १६

मदांधैः अलिभिः मूर्छितं मूर्छना रागगतिविशेषः तद्युतं रक्तकंठानां कोकिलानां प्लावितैः प्लुतत्वं नीतैः स्वरैः अन्येषामपि
पतत्रिणां च कूजितैः १२ उद्धस्तैः उन्नतशाखैः द्रुमैः द्विजान् पक्षिणः आह्वयंतमिव लोके हि हस्तमुत्क्षिप्य उच्चैः स्वरेण. शिवो
आह्वानं अर्थिनां करोति अद्रिश्च उत्क्षिप्तहस्ताकारैः द्रुमैः तत्र पक्षिणां स्वनैश्च तथा लक्ष्यत इत्यर्थः व्रजंतं मातंगैः व्रज १५
तमिव निर्झरध्वनिभिः वेणुकीचकयोश्च नीरंध्रसरंध्रत्वेन भेदः वेणुकजातिभिरित्यत्र वेणुका एलाजाली मालती १६

द्रुमजातिभिरित्यत्र जातिः आवांतरभेदः सामान्यं १७।।१८ कुमुदादिसमृद्धिभिः हेतुभिः नलिनीषु सरस्सु कलं मधुरं यथा भ
वत्येवं कूजंति यानि पक्षिवृंदानि तैः उपशोभितं १९ मृगादिभिः निर्जुष्टं निषेवितं नाभिः कस्तूरीमृगः पूर्वं मृगगणाः
शृंगविशेषणत्वेन उक्ताः इदानीं स्वातंत्र्येण इति अपौनरुक्त्यं २० कदलीखंडैः संरुद्धानि आवृतानि नलिनीनां पुलिना
नि तैः श्रीः शोभा यस्मिन् गंगाया नंदया पर्यस्तं परिवेष्टितं तस्याः भवस्याः स्नानेन पुण्यतरं अतिगंधं उदकं यस्याः २१
तत्र गिरौ वनं च ददृशुः पत्रवने तन्नाम सौगंधिकं पंकजं भवति आतावेकवचनं २२ पुरीं वर्णयति निंदा चेति च ऊर्मिः ।।

पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः भल्लातैरोषधिभिः पूगैराजपूगैश्च जंबुभिः १७ खर्जूराम्रातकाम्राद्यैः प्रि
यालमधुकेंगुदैः द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः १८ कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः नलि
नीषु कलं कूजन्खगवृंदोपशोभितं १९ मृगैः शाखामृगैः क्रोडैर्मृगेंद्रैः ऋक्षशल्यकैः गवयैर्नाभिभिर्व्याघ्रैर्निर्जुष्टं
महिषादिभिः २० कदलीखंडसंरुद्धनलिनीपुलिनश्रियं पर्यस्तं नंदया सत्याः स्नानपुण्यतरोदया २१ विलोक्य भू
तेशगिरिं विबुधा विस्मयं ययुः ददृशुस्तत्र ते रम्यामलकां नाम वै पुरीं वनं सौगंधिकं चापि यत्र तन्नाम पंकजं २२
नंदा चालकनंदा च सरितौ बाह्यतः पुरीं तीर्थपादपदांभोजरजसातीव पावने २३ ययोः सुरस्त्रियः क्षत्तरवरु
ह्य स्वधिष्ण्यतः क्रीडंति पुंसः सिंचंत्यो विगाह्य रतिकर्शिताः ययोस्तत्स्नानविभ्रष्टनवकुंकुमपिंजरं वितृषो
पि पिबंत्यंभः पाययंतो गजा गजीः २५

सरितौ पुरात् बाह्यतः भवतः तीर्थपादस्य हरेः पदांभोजरजसा ययोः विगाह्य प्रविश्य क्रीडंति २४ ययोः अंभः विग
ततृषोपि गजाः पिबंति तासां सुरस्त्रीणां स्नानेन भ्रष्टं गलितं यत् नवकुंकुमं तेन पिंजरं पीतवर्णं गजीः करिणीः २५

भा० च० ४
१८

तारं रूप्यं ताराद्दिमयविमानानां शतैः संकुलं तडिद्भिः स्त्रीणां घनैः विमानानां खेन पुर्वाः साद्दश्यं २६ यक्षेश्वरपुरीं हि त्वा अतिक्रम्य तद्वनं दृष्ट्वा ते देवाः आरात् दूराद्ददृशुः इति चतुर्थ नान्वयः कथंभूतं वनं चित्राणि माल्यानि फलानि च ददा श्चयेषु तेः द्रुमैः हृद्यं रक्त खकंठ २७ रक्तकंठानां खगानां अनीकस्य स्वरः स्वरैः मंडिताः षट्पदाः भ्रमराः यस्मिन् कलहंसानां कुलस्य श्रेष्ठं स्वरं दधाति पद्मानि तेः युक्ताः जलाशयाः यस्मिन् २८ नवकुंजरैः संघट्टाः ये हरिचंदन द्रुमाः तत्संबंधिना वायुना पुण्यजनस्त्रीणां मनः अधिकं उन्मथयन् २९ यत्र च उत्पलमालिन्यः वाप्यः तत् किंपु

तारहेममहारत्नविमानशतशतसंकुलं जुष्टं पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनं २६ हित्वा यक्षेश्वरपुरीं वनं सौगंधिकं च यत् द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः २७ रक्तकंठखगानीकस्वरमंडितषट्पदं ॥
कलहंसकुलश्रेष्ठं स्वरं दधज्जलाशयं २८ नवकुंजरसंघृष्टहरिचंदनवायुना अधिपुण्यजनस्त्रीणां मुहुर्मथय मनः २९ वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः प्राप्तं किंपुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटं ३० स योजन शतोत्सेधः पादोनविटपायतः पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ३१ तस्मिन्महायोगमये मुमुक्षु शरणे सुराः ददृशुः शिवमासीनं त्यक्तामर्षमिवांतकं ३२ सनकाद्यैर्महासिद्धैः शांतैः शांतविग्रहं ॥
उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसां ३३ विद्यातपोयोगपथमास्थितं तमधीश्वरं चरंतं विश्वसुहृदं वात्सल्याल्लोकमंगलं ३४

प्राप्तवनं दृष्ट्वा पाठांतरः किंपुरुषैः व्याप्ताः वापीश्च दृष्ट्वेत्यर्थः ३० योजनशतं उत्सेधः उच्छ्रायः यस्य पादोनैः सर्वतः पंचसप्ततियोजनप्रमाणैः विटपैः शाखाभिः आयतः विस्तृतः पर्यक्कृता सर्वतः कृता अचला छाया येन निर्गतनीडं यस्मात् ३१ मुमुक्षूणां शरणे आश्रये त्यक्तामर्षः अंतकं कृतुल्यं ३२ तं विशिनष्टि सनकाद्यैः शांतैः पंचभिः सख्या च कुबेरेण उपास्यमानं ३३ विद्या उपासना तपः चित्तैकाग्र्यं योगः समाधिः तेषां पंथानं प्रवर्तनद्वारा लोकस्य मंगलं हितं यः

वात्सल्यान् आनंदं त ३४ स्नेहात्
१८

संध्याभ्ररुचा रक्तवर्णेन अंगेन भस्मनादिभिः लिंगं चिह्नं चंद्ररेखां च बिभ्रतं ३५ व्रतिनां आसनं वृषीं तस्यां ब्रह्मप्रवोचं तं ३६ सव्यं पादपद्मं दक्षिणे उरौ कृत्वा विन्यस्य जानुनि च सव्ये बाहुं कृत्वा दक्षिणबाहुप्रकोष्ठे मणिबंधस्थाने अक्षमालां कृत्वा दक्षिणहस्तकृतया तर्कमुद्रया उपलक्षितं आसीनमित्यर्थः तदुक्तं योगशास्त्रे एकं पादमथैकस्मिन्विन्यस्योरुसंस्थितं इतरस्मिंस्तथा बाहुं वीरासनमिदं स्मृतं तर्कमुद्रा चोक्ता तर्जन्यंगुष्ठयोरग्रे मिथः संयोज्य चांगुलीः प्रसार्य बंधनं बाहुस्तर्कमुद्रेति मात्रिकाः ३७ ब्रह्मनिर्वाणं ब्रह्मानंदः तत्र समाधिः एकाग्र्यं तं आश्रितं योगकक्षां योगपट्टं च वामजानुदृढं

लिंगं च तापसाभीष्टं भस्मदंडजटाजिनं अंगेन संध्याभ्ररुचा चंद्ररेखां च बिभ्रतं ३५ उपविष्टं दर्भमय्यां वृस्यां ब्रह्म सनातनं नारदाय प्रवोचंतं पृच्छते शृण्वतां सतां ३६ कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि बाहुं प्रकोष्ठेक्षमालामासीनं तर्कमुद्रया ३७ तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गिरिशं योगकक्षां सलोकपाला मुनयो मनूनामाद्यं मनुं प्रांजलयः प्रणेमुः ३८ स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभिवंदितांघ्रिः उत्थाय चक्रे शिरसाभिवंदनमर्हत्तमः कस्य यथैव विष्णुः ३९ तथापरे सिद्धगणा महर्षिभिर्ये वै समंतादनु नीललोहितं नमस्कृतः प्राह शशांकशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ४० ब्रह्मोवाच जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरंतरं ४१ ॥ ॥ ॥ ॥

करणार्थं विशेषेण उपाश्रितवंतं मननशीलाः मनवः तेषां आद्यं मुख्यं ३८ अर्हत्तमो विष्णुः वामनमूर्तिः यथा कस्य कश्यपस्य ३९ महर्षिभिः सहिताः ये च नीललोहितं मनु वर्तंते ते पितृस्मै वंदनं चक्रुः एवं सर्वैः नमस्कृतः प्राह कृतः प्रणामः देवैः यस्मै तं ४० यद्यपि त्वां नीच वत्नमानं नमस्करोषि तथापि तव ऐश्वर्यं अहं वेद्मि इत्याह जानइति विश्वस्य ईशं जाने तत्र हेतुः जगतः योनिः पाठांतरेः प्रकृतिः बीजं यः शिवः पुरुषः तयोः कारणं तथापि न भेदः यत तद्ब्रह्म निर्विकारं तदेव तत्त्वमिति जाने ननु विरुद्धमेतत् तत्राह त्वमेव स्वरूपयोः अविभक्तयोः शिवशक्त्योः क्रीडन् विश्वसृष्ट्यादिकरोषि ऊर्णनाभेरिव स्वरूपयोरिति पाठे स्वांशयोः

[illegible]

मि०
यज्ञे अधर्मेविज्ञियात्रयी तस्याः अभिपत्तये रक्षणाय अध्वरंस्त्वस्त्रवानासि यद्वा हे धर्मार्थदुघ धर्माद्यभिपत्तये तज्ञास
भा० च० धर्मं अर्थं च वियियात्रयी तस्याः अभिपत्तये रक्षणाय अध्वरस्त्वसृजः यद्वा ब्राह्मणाः श्रद्दधते श्रद्धया अनुतिष्ठंति ४३॥
१८ यदक्षेणास्त्रेणाभितेन सेतवः वर्णाश्रममर्यादाः अवसिता: निबद्धाः निराकृताद्रातिवा श्रद्दधते श्रद्धया अनुतिष्ठंति
सर्वकर्मफलदाता त्वमेवेत्याह हे मंगलामंगलानांशुभानांकर्मणांकर्तुः स्वः स्वर्गंपरंमोक्षंवा तनुषे अमंगलानां अशुभानां
कर्मणांकर्तुश्च तामिस्रं नरकं तनुषे तत्रकेन हेतुना तदेव तस्मिन्नेव कस्यचित्तु विपर्ययः भवति ४४ त्वत्कोपः अत्रहेतुः असं
भावितमिति कैमुत्यन्यायेनाह नवैसतां त्वतः दोषः अभिभवेत् तवत्वां द्वितीयार्थे षष्ठ्यौ पश्यंअत्रं यथात्वति अभिभव
त्वमेवभर्वेनेतत्र शिवशान्तयोः सरूपयोः विश्वंसृजसि पास्यत्सि क्रीडन्नूर्णपटोयथा ४२ त्वमेवधर्मार्थदुघाभिप
त्वमेवभर्गे नेतत्र शिवस्त्रात्यो: सरूपयो: विश्वंसृजसि पासि अत्सि क्रीडन्नूर्णपटोयथा ४२ त्वमेवधर्मार्थदुघाभिप
तये दक्षेणासूत्रेणासृसर्जिथाध्वरं त्वयैवलोकेवसिताश्च सेतवोयान्ब्राह्मणाः श्रद्दधतेधृतव्रताः ४३ त्वंकर्मणां
मंगलमंगलानां कर्तुः स्मलोके तनुषे स्वः परंच अमंगलानांच तामिस्रमुल्बणं विपर्ययः केनतदेवकस्यचित् ४४
नवैसतां त्वच्चरणार्पितात्मनां भूतेषुसर्वेष्वभिपश्यतां तव भूतानि चात्मन्यपृथक्दिदृक्षतां प्रायेणरोषोऽभि
भवेद्यथापशुं ४५ पृथक्धियः कर्मदृशोदुराशयाः परोदयेनार्पितहृद्रुजोऽनिशं परान्दुरुक्तैर्वितुदंत्यरुंतुदा
स्तान्माऽवधीद्दैववधान्भवद्विधः ४६ यस्मिन्यदापुष्करनाभमायया दुरंतयास्पृष्टधियः पृथक्दृशः कुर्वंति
तत्रह्यनुकंपयाकृपां नसाधवोदैवबलात्कृतेक्रमं ४७
तितद्दत ४५ अतः येपृथग्धियः भेदद्रष्टारः अतः कर्मण्येवदृष्टिः येषांदुष्टः आशयः येषांपरेषां उदयेन संपदा अर्पिता
हृदिरुक् येषां अरुंतुदाः मर्मभेत्तारः दैवेनैववधः येषां तान् भवद्विधः निरुपमः मावधीत् नहन्यात् ४६ प्रकृतसाधु कृष्णः
नां वृत्तं अवलोक्य अनुग्रहमेवकर्तुं अर्हसीत्याह द्वाभ्यां यस्मिन्नदेशेयदाकालेस्पृष्टधियः मोहितचित्ताः पृथक् १८
अत्र दृशः भवंति अपराधे साधवोहि अनुकंपया अनंतरमेवपरदुःखासहिष्णुतया चित्तप्रकंपेन कृपांकुर्वंति नतु
क्रमं कृतः दैवबलात् कृतेअर्थे ममैवदैवबलं एवंभूते कः अत्र अपराधः तेषामितिमत्वा हननं नकुर्वंतीत्यर्थः ४७
प

भवांस्तु अस्पृष्टमतिः अतः समस्तदृक् सर्वज्ञः तयामायया अपहृतः आत्मायेषांतेषु अतएवकर्मानुगताचेतेषु इहअप
राधे अनुग्रहं कर्तुं अर्हसि ४८ एवंसामान्येनउक्त्वा प्रस्तुतमाह कुवितिद्वाभ्यां त्वयाहतस्य अतएव असमाप्तस्यप्रजा
पतेः अध्वरस्य हेमन्नो अत्र अध्वरे कुयाज्ञिकाः भागिनोपिभागंनददुः भागार्हत्वमाहयेन त्वया मखः अध्वरः निनीय
ते फलंप्राप्यते ४९।५० हेमन्यो अनातुरं आरोग्यं अस्तु ५१ भागः तव अस्तु इत्याह हे रुद्र यावदित्यर्थे यदित्यव्ययं यज्ञेह
भवांस्तुपुंसःपरमस्यमाययादुरंतयास्पृष्टमतिःसमस्तदृक् तयाहृतात्मस्वनुकर्मचेतःस्वनुग्रहंकर्तुमिहार्हसिप्रभो
४८ कुर्वध्वरस्योद्धरणंहतस्यभोत्वयासमाप्तस्यमनोःप्रजापतेः नयत्रभागंतवभागिनोददुःकुयाज्ञायेनमखोविनी
यते ४९ जीवताद्यजमानोयंप्रपद्येताक्षिणीभगः भृगोःश्मश्रूणिरोहंतुपूष्णोदंताश्चपूर्ववत् ५० देवानांभग्नगा
त्राणामृत्विजांचायुधाश्मभिः भवताऽनुगृहीतानामाशुमन्योऽस्त्वनातुरं ५१ एषतेरुद्रभागोस्तुयदुच्छिष्टोऽध्वर
स्यवै यज्ञस्तेरुद्रभागेनकल्पतामद्ययज्ञहन् ५२ इतिश्रीमहाभागवतेमहापुराणेचतुर्थस्कंधेरुद्रसांत्वनं
नामषष्ठोऽध्यायः मैत्रेयउवाच इत्यजेनानुनीतेनभवेनपरितुष्यता अभ्यधायिमहाबाहोप्रहस्यश्रूयतामि
ति १ श्रीमहादेवउवाच नाघंप्रजेशबालानांवर्णयेनानुचिंतये देवमायाभिभूतानांदंडस्तत्रधृतोमया॥२॥
प्रजापतेर्दग्धशीर्ष्णोभवत्वजमुखंशिरः मित्रस्यचक्षुषेक्षेतभागंस्वंबर्हिषोभगः ३॥॥ श्रीरामः शरणं
तेयावानुच्छिष्टः अवशिष्टोसर्थः तावान् एषः तव भागः अस्तु हे रुद्र तेभागेन अद्ययज्ञः कल्पतां संपद्यतां ५२ इ
तिभावार्थदीपिकायांषष्ठोध्यायः सप्तमे विधुरुद्रतः कृतोदक्षमखादिभिः यज्ञंप्रवर्तयामासदक्षेणेतिनिरूप्यते अजेने
ति अनुनीतः प्रार्थितः भवः तेन अभिहितः हे महाबाहो हेविदुर अघं अपराधं २ स्वापराधं परिहृत्य अनुगृह्णाति द
ग्धंशीर्षं यस्य प्रजापतेः अजस्यमुखं यस्मिन् तत्तथाभूतं शिरः अस्तु बर्हिषः संबंधिनं भागं मित्रनाम्नः देवस्य ३

भा॰ स्कं॰
१८

प्रकर्षेण कृतानि लग्नानि सर्वाण्यंगानि येषां ते उच्छेषणं यज्ञावशिष्टं ददुः येषां तु अंगानि न सन्ति तेतु अश्विनोः बाहुभ्यां कृतबा
हवः पूष्णः हस्ताभ्यां कृतहस्ताश्च भवंतु अध्वर्यवः अन्येच ऋत्विजः बस्तस्य श्मश्रूण्येव श्मश्रूणि यस्य ५ मीढुषः
शिवः तेन उक्तं परितुष्टैः चित्तैः ६ मीढ्वांसं शिवं त्वया आगत्य सर्वं कार्यं इत्यामंत्र्य संप्रार्थ्य शुनासीराः देवाः सहमीढु
सा वा वेधसैव वर्तमानाः सहमीढ्वद्वेधसः ७ कार्त्स्न्येन वक्रहस्तबाह्वादिसाधारणं विधाय ८।९। पूर्वं वृषभध्वजद्वेषेण क

पूष्णा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् देवाः प्रकृतसर्वांगा ये म उच्छेषणं ददुः ४ बाहुभ्यामश्विनोः पूष्णो हस्ता
भ्यां कृतबाहवः भवंत्वध्वर्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत् ५ मैत्रेय उवाच तदा सर्वाणि भूतानि श्रुत्वा मीढु
ष्टमोदितं परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन् ६ ततो मीढ्वांसमामंत्र्य शुनासीराः सहर्षिभिः भूय
स्तद्देवयजनं समीढ्वद्वेधसो ययुः ७ विधाय कार्त्स्न्येन च तद्यदाह भगवान् शिवः संदधुः कस्य कायेन
सवनीयपशोः शिरः ८ संधीयमाने शिरसि दक्षो रुद्राभिवीक्षितः सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडं
९ तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः शिवावलोकादभवच्छरद्ध्रद इवामलः १० भवस्तवाय कृत
धीर्नाशक्नोदनुरागतः औत्कंठ्याद्बाष्पकलया संपरेतां सतीं स्मरन् ११ कृच्छ्रात्संस्तभ्य च मनः प्रेम
विह्वलितः सुधीः शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः १२ दक्ष उवाच भूयाननुग्रह अहो भव
ता कृतो मे दंडस्त्वया मयि भृतो यदपि प्रलब्धः न ब्रह्मबंधुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु १३ कुर्यांतवहरेश्चनितांयुवयोः अपेक्षास्ति १३
शिवो
१९
लिलः कलुषीकृतः आत्मा यस्य सः तदा शरत्कालीनः ह्रद इव अमलः अभवत् १०।।११।।१२।। यद्यपि यद्यपि विप्रलब्धः
पराभूतः मया भवान् तथापि त्वया दंडः भृतः शिक्षा कृता न तु उपेक्षितोस्मि युक्तमेवएतदित्याह ब्रह्मबंधुषु ब्राह्मणाभासेष्वपि

विद्येति ब्रह्मा भूत्वा त्वं अस्त्राक्षीः अस्त्राक्षीः किमर्थं आत्मतत्वं अवितुं यदा ब्रह्म वेदं आत्मतत्वं अवितुं संप्रदायप्रवर्त
नेन ज्ञापयितुमित्यर्थः ततः तस्मात् हे परम उत्कृष्ट २४ अत्र च प्रत्युपकारो नास्तीत्याह योसाविति आर्यादितत्वदृशा तर
अप्राप्ततत्वज्ञानेन तत् विगणय्य विस्मृत्य अर्दितमस्य निंद्यया अर्वाक् अधः पतंतं मां अपात रक्षितवान् स्वकृतेनैव
परानुग्रहेणैव तुष्येत् न मया तत् प्रतिकर्तुं शक्यमित्यर्थः २५ अनुमंत्रितः अनुज्ञातः उपाध्यायसहितैः ऋत्विगादि
भिः अनुवर्तयामास १६ वीराणां प्रमथादीनां संसर्गकृतदोषस्य शुद्धये निवृत्त्यर्थं १७ उपात्तहविषा अध्वर्युणा सह

विद्यातपोव्रतधरान्मुखतः स्म विप्रान्ब्रह्मात्मतत्वमवितुं प्रथमं त्वमस्राक् तद्ब्राह्मणान्परम सर्वविपत्सु पासि पा
लः पशूनिव विभो प्रगृहीतदंडः १४ योसौ मयाविदिततत्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैर्विगणय्य तन्मां अ
र्वाक् पतंतमर्हत्तम निंदयापाद्दृष्ट्यार्द्रया स भगवान्स्वकृतेन तुष्येत् ।।१५ मैत्रेय उवाच क्षमाप्यैवं स मीढ्वांसं
ब्रह्मणा चानुमंत्रितः कर्म संतानयामास सोपाध्यायर्त्विगादिभिः १६ वैष्णवं यज्ञसंतत्यै त्रिकपालं द्विजोत्त
माः पुरोडाशं निरवपन्वीरसंसर्गशुद्धये १७ अध्वर्युणात्तहविषा यजमानो विशांपते धिया विशुद्धया
दध्यौ तथा प्रादुरभूद्धरिः १८ तदा स्वप्रभया तेषां द्योतयंत्या दिशो दश मुष्णंस्तेज उपानीतस्तार्क्ष्येण
स्तोत्रवाजिना।१९ श्यामो हिरण्यरशनोर्ककिरीटजुष्टो नीलालकभ्रमरमंडितकुंडलास्यः शंखाब्जचक्रश
रचापगदासिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः २०
विशुद्धया बुध्या दध्यौ हे विशांपते विदुर १८ स्वया प्रभया तेजः मुष्णन्तिरस्कुर्वन् उपनीतः समीपं प्रापितः स्तोत्रे बृहद्रथंतरे सा
मपक्षौ यस्य तेन बृहद्रथंतरे पक्षाविति श्रुतेः १९ तमेव अनुवर्णयति द्वाभ्यां हिरण्यवर्णा रशना यस्य सः अर्कवत् उज्ज्वलं
यत् किरीटं तेन जुष्टः नीलालकाएव भ्रमराः तैः मंडितं कुंडलयुक्तं आस्यं यस्य शंखादिभिः आयुधैः व्यग्रैः व्याप्तैः
हिरण्मयैः भूषितैः कर्णिकार इव शोभमानः भुजानां हिरण्मयवलयकेयूरकंकणमुद्रिकाद्यलंकारैः २०।। ५९।।

ति॰

भा॰ च॰ १९ वक्षसि अधिश्रिता वधूः लक्ष्मीः यस्य सः उदारः हासः अवलोकश्च तयोः कलया लेशेन पार्श्वे उभयतः भ्रमंती व्यजन चामरे
एवं राजहंसो यस्मिन् सः रज्यमानः शोभातिशयं नीयमानः २१ ब्रह्मेंद्र त्र्यक्षाः नायकाः येषां ते २२ हतः रुचः तिरस्कृत भा र
सः सन्नजिह्वाः गद्गद वाचः ससाध्वसाः तन्महिम्ना क्षुभित चित्ताः उपतस्थुः तुष्टुवुः २३ यस्य महि महिमानं प्रति अ
र्वागेव वृत्तिः येषां तेपि यथामति गृणंतिस्म अवस्तु कृतवन्तः कृतः प्रकटीकृतः अनुग्रहार्थं विग्रहः येन तं मद्वा तेषां अ
र्वाक् वृत्तित्वे हेतुः हेतुः तस्य महिमा अभिव्यक्तिमात्ररूपादित्यर्थः २४ तत्र तावत् दक्षस्तुति प्रकारमाह दक्ष इति गृहीतं

वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च विश्वं पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वे
तातपत्रशशिनोपरि रज्यमानः २१ तमुपागतमालक्ष्य सर्वे सुरगणादयः प्रणेमुः सहसोत्थाय ब्रह्मेंद्रत्र्य
क्षनायकाः २२ तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः मूर्ध्ना धृतांजलिपुटा उपतस्थुरधोक्षजं
२३ अप्यर्वाक्वृत्तयो यस्य महि त्वात्मभुवादयः यथामति गृणंति स्म कृतानुग्रहविग्रहं २४ दक्षो गृही
तार्हणसादनोत्तमं यज्ञेश्वरं विश्वसृजां परं गुरुं सुनंदनंदाद्यनुगैर्वृतं मुदा गृणन् प्रपेदे प्रयतः
कृतांजलिः २५

अर्हणसादनोत्तमं येन तं उत्तमे पात्रे आसाद्य अर्हणेषु समर्पितेषु प्रीत्या सार्हणं पात्रं येन गृहीतमित्यर्थः शिवो
यद्वा कथं प्रपेदे गृहीतमर्हणसादनोत्तमं यथा भवति तथा तत् गृहीत्वा प्रपेदे इत्यर्थः गृहीत्वेति पाठस्तु सु १९
गमः गृणन् स्तुवन् प्रपेदे शरणं जगाम दक्ष ऋत्विक् सदस्येश भृगु ब्रह्मेंद्र योषितः ऋषयश्च तथा सिद्धा
यजमानी च लोकपाः योगिब्रह्माग्नि देवाश्च स्तुवंति जगदीश्वरं तथा गंधर्व विद्याधर ब्राह्मणाश्च स्वस्थ क्रमतः २५

मां भगवान् आक्षेप्स्यतीत्याशंक्य अप्रच्युतस्वरूपस्य जीवनाद्यं तवेव संगच्छते नान्यस्येत्याह शुद्धमिति स्वधाम्नि स्वस्व
रूपे तिष्ठन् भवान् शुद्धं चैतन्यघनः चिन्मात्रं शुद्धत्वे हेतुः उपरता नित्यनिवृत्ता अखिलबुद्ध्यावस्था यस्मात् अतः ए
कं भेदशून्यं अत एव अभयं द्वितीयाद्वै भयं न भवतीति श्रुतेः जीवस्याप्येवं स्यात् एवं भूतत्वात् तद्वैलक्षण्यार्थम
कं मायां प्रतिषिध्य स्वतंत्र एव सन् तयाप्यायया पुरुषत्वं मनुष्यत्वाद्युपेत्य तस्यां मायायां तिष्ठन्नपरिशुद्ध इव रागादि
मानिव आस्ते राम कृष्णाद्यवतारे प्रतीयत भवानित्यर्थः अन्ये तु अविद्योपाधयः मायाभिभूताः संसरंति अतः त्वमेव
ईश्वरः न रुद्रादय इति भावः अत एव मां भेददृष्टिं भगवान् वारयिष्यति अहं ब्रह्मा च शर्वश्च जगतः कारणं परमित्या

दक्ष उवाच शुद्धं स्वधाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायां तिष्ठंस्तयैव पुरुषत्वमुपेत्य
तस्यामास्ते भवानपरिशुद्ध इवात्मतंत्रः २६ ऋत्विज ऊचुः तत्त्वं न ते वयमनंजन रुद्रशापात् कर्मण्यवग्रहधियो
भगवन् विदामः धर्मोपलक्षणमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदैवमदो व्यवस्थाः २७ ॥ ॥ छ॥

दिना २६ ऋत्विज स्तुवंत्यहंकारं पराधं परिहरंतः स्तुवंति हे अनंजन उपाधिमलशून्य यद्यपि त्वमेव रुद्रादिदेवतास्व
रूपः तथापि नंदीश्वरशापात् कर्मण्येव दुराग्रहधियः संतः तव तत्त्वं न विदामः किंतु धर्मस्य अपूर्वस्य उपलक्षणभू
तं त्रिवृत् त्रयीप्रतिपाद्यं अध्वराख्यं तव रूपं अस्माभिः ज्ञातं कीदृशं यदर्थं यस्य सिद्धये अधिदैवं देवताधिकारेण
अदो व्यवस्थाः अत्र अमुः अवस्थाः अत्र इदमेव देवतान अन्या इत्येवंभूता नियमाः इत्यर्थः यद्वा व्यवस्था इत्या
तं अड़ागमाद्यभाव आर्षः यदर्थं अदः इंद्राद्यधिदैवरूपं विशेषेणास्थितवान् असीत्यर्थः २७ ॥ छ॥ श्री

भा॰ स्क॰ २०

सदस्या स्कनिरीश्वरेदक्षाध्वरेधनलाभेनस्वप्रवृत्तिं अनुविंध्य अनुतप्ताः विरक्तिं आशासानाः स्तुवंति हे शरणद आश्रयप्रद सत्यसध्वनि संसारमार्गवर्त्मान भ्रूअत्तानां सार्थः समूहः तेषाद्दोकः त्वत्पादरूपनिवासकदापिस्मति अश्रयो विश्राम स्थानमन्ये उरु क्लेशाः एव दुर्गमस्थानानि यस्मिन् आत्मा अहंकारास्पदं शरीरं ममतास्पदं गेहं च सएव उरुः भारः यस्य द्वंद्वानि सुखदुःखान्येव श्वभ्राणि गर्ताः यस्मिन् खलाः मृगव्याघ्रादयः तेभ्यः भयं यस्मिन् शोक एव दावाग्निर्यस्मिन् कामेन उपसृष्टः पीडितः २८ श्रीरुद्रस्य पूर्वं ममनिंदा सदुःसहा आसीत् इदानीं तु तं न गणयामीत्याह

सदस्या ऊचुः उत्पत्यध्वन्यशरणउरुक्लेशदुर्गेंतकोग्रव्यालाविष्टे विषयमृगतृष्ण्यात्मगेहोरुभारः द्वंद्वश्वभ्रे खल मृगभये शोकदावे ज्ञसार्थः पादौकस्ते शरणदकदा याति कामोपसृष्टः २८ तवव रद्वरांघ्रावाशिषेहाखि लार्थे ह्यपि मुनिभिरसक्तैरादरेणार्हणीये यद्विरचितधियं मा विद्यलोकोपविद्धं जपति न गणये तत्त्वत्परा नुग्रहेण २९ भृगुरुवाच यन्मायया गहनयापहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसि स्वपंतः नात्म न्श्रितं तव विदंत्यधुनापि तत्त्वं सोयं प्रसीदतु भवान्प्रणतात्मबंधुः ३० ब्रह्मोवाच नैतत्स्वरूपं भव तोसौपदार्थभेदग्रहैः पुरुषो यावदीक्षेत ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद्व्यतिरिक्तो यतस्त्वं ३१

तवेति आशिषां कामेन असक्तैः रसक्तैः रचितधियं अभिनिवेशितचित्तं अविद्यः विद्याहीनो लोकः यदि अप विद्धं आचारभ्रष्टं जल्पति तत् जल्पनं तवपरः यः अनुग्रहः त्वत्पराणां वा यः अनुग्रहः २९ भृगुस्तु स्वभा वतः तत्त्वज्ञानहीनाः जीवाः अतः अज्ञानकृतं मम दुश्चेष्टितं क्षमस्वेत्याह यन्माययेति आत्मवत् आत्म न्श्रितं अनुगतं तवतत्त्वं न विंदति प्रणतानां आत्मबंधुश्च ३० ॥ ॥ ॥ ॥ ॥ शिवो २०

ब्रह्मादयः न विदंतीति भृगोणोक्तं तत् असहमानः ब्रह्मा तत्त्वज्ञानं आविष्कुर्वन्निव आह नैतदिति पदार्थभेदग्राहैः कैः इंद्रियैः गुणस्य इंद्रियस्य च यद्वा ज्ञानार्थयोः करणस्य सत्वादेः ३१ इंद्रस्तु इंद्रियविषयः सर्वः मिथ्येति ब्रह्मणा उक्तं असहमानः आह इदं तव वपुरपि उपलक्षितमेव न तु प्रपंचवत् अनिर्वचनीयतया अनुपपन्नानां करणानां द्विषः क्षपयं तीति तथा तैः भुजदंडैः उपलक्षितं ३२ ऋत्विजां पत्न्यः स्तुवंति यज्ञः अयं तव यजनाय त्वया सृष्टः केन ब्रह्मणा सृष्टः हे यज्ञात्मन् तनः यज्ञं नलिनकोशवत् दृशा नेत्रेण पुनीहि पवित्रं कुरु कथंभूतं यज्ञं शवानिशेरते यस्मिन् तत् शवश यनं श्मशानं तद्वत् आभा यस्य स चासौ शांतमेधश्च उपरतो सर्वः मेधः शब्देन पशुहिंसाद्युत्सवो लक्ष्यते शवउदकं

इंद्र उवाच इदमप्यच्युत विश्वभावनं वपुरानंदकरं मनोदृशां सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्ट भिः ३२ ऋत्विजां पत्न्य ऊचुः यज्ञोयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाद्य दक्षकोपात् तं नस्त्वं शवशयना भशांतमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि ३३ ऋषय ऊचुः अनन्वितं ते भगवद्विचेष्टितं यदात्मना चरसि हि कर्म नाज्यसे विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयमनुवर्ततीं भवान् ३४ सिद्धा ऊचुः अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः तृषार्तोवगाढो न सस्मार दावं न निष्क्रामति ब्रह्म संपन्नवन्नः ३५

तत्रशोते इतितथापशब्दं तन्नाभेतिसंबोधनं वा ३३ ऋषयस्तु कर्माणि अनुतिष्ठंतः तत्फलेन लब्धेन च तुष्यंते भगवति तदभावं विलोक्य विस्मिताः स्तुवंति अनन्वितं अग्रघटमानं यतः यस्मात् आत्मना स्वयं कर्म आरोसि अनुतिष्ठसि न तु अज्यसे लिप्यसे यतश्च अन्ये विभूतये संपदे ईश्वरीं लक्ष्मीं उपसेदुः भिजुः यद्वा यत ये श्रेष्ठ इति सार्वविभक्तिकः तसि वा भित्यर्थः भवांस्तु स्वयमेव अनुवर्तमानां न आद्रियते ३४ सिद्धास्तु तत्कथासुखं आभिनंदंतः स्तुवंति अयं मम नागजः त्वत्कथैव मृष्टं शुद्धं पीयूषं तन्मयी या नदी तस्यां अवगाढः प्रविष्टः दावाग्नितुल्यसंसारतापं न स्मरति

पं२

भा॰ च यजमानी दक्षपत्नी स्तौति स्वागतं भद्रं आगमनं जातं हे अधीश यथा शिरोहीनः कबंधमात्रः पुरुषः अंगैः करचरणा
२१ द्यवयवैः शोभते न एवं लोकपालास्तु ईश्वरत्वाभिमानारूढाः भगवत्तत्त्वं अपश्यंतः ऊचुः दृष्टः किं न दृष्ट इत्यर्थः कुतः
असद्ग्रहैः पुंस्त्वं आविष्टलिंगत्वात् असत्प्रकाशरूपाभिः दृग्भिः इंद्रियैः अयंभावः शुद्धचित्तानां त्वं शुद्धसत्त्वमूर्तिः भासि
अस्माकं तु बहिर्मुखेंद्रियाणां पंचभूतोपलक्षितः जीवविशेष इव आभासि अतः त्वं अस्मदिंद्रियगोचरः न भवसि
धिक् अस्मज्जीवितमिति ३७ योगेश्वराः त्वद्भेदेन भजतां अनुग्रहं प्रार्थयमानाः स्वामिभृत्यभावेन भजतामपि
अनुग्रहं प्रार्थयमानाः स्तुवंति द्वाभ्यां प्रेयान्न इति विश्वात्मनि अत्र हेतुः आत्मनि येन तस्मै ३९ परब्रह्मणि अवस्थितः
आत्मनः पृथक् न ईक्षेत अमुतः अस्मात् अन्यः ते प्रेष्ठः न अस्ति आत्मनः जीवान् पृथक् न ईक्षेतेति या

यजमान्युवाच स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कांतया त्राहि नः त्वामृतेऽधीश नांगैर्मखः शोभ स॰
ते शीर्षहीनः कबंधो यथा पुरुषः ३६ लोकपाला ऊचुः दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्य
ते येन विश्वं माया ह्येषा भवदीया हि भूमन् यस्त्वं षष्ठः पंचभिर्भासि भूतैः ३७ योगेश्वरा ऊचुः प्रेयान्न ते
ऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः अथापि भक्तेश तयोपधावतामनन्यवृत्त्यानुगृ
हाण वत्सल ३८ जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयात्ममायया रचितात्मभेदमतये
स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः ३९ ब्रह्मोवाच नमस्ते श्रितसत्त्वाय धर्मादीनां च सू श्रीकृष्णं
तये निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ४०

वत्सल भक्तप्रिय अनन्यया वृत्त्या अव्यभिचारिण्या भक्त्या भजतः अनुगृहाणेत्यर्थः ३८ अव्यभिचारिणीं २२
किं कथं स्यात् भजनीयानां बहुत्वादित्याशंक्याहुः जगत उद्भवादिषु निमित्तेषु दैवतः जीवादृष्टात् बहुधा भिद्यमाना
गुणाः यस्याः तया स्वमायया आत्मनि स्वस्वरूपे रचिता ब्रह्मादिभेदमतिः येन तस्मै स्वसंस्थया केवलरूपस्थित्या अव
स्थानेन च विनिवर्तिताः भेदभ्रमः गुणाश्च तद्धेतवः आत्मनि येन तस्मै ३९ ब्रह्मस्तौति नमः ते श्रितं स्वीकृतं सत्त्वं ये
न अतः भक्तादिफलदातृत्वं सगुणत्वं निर्गुणत्वं च कथं इत्याशंक्याह यस्य काष्ठां तत्त्वं न अहं वेद्मि अपरे ब्रह्मादयश्च न विदुः

अग्निस्तु यज्ञमूर्तिं प्रणमति यस्य तेजसा सुसमिद्धं दीप्तं तेजः यस्य सः अहं प्रशस्तः अध्वरे हविः वहामि तं
यज्ञियं यज्ञाय हितं यज्ञमूर्तिं पंचविधं ऐतरेयके उक्तं स एष यज्ञः पंचविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः
सोम इति पंचभिः यजुर्मंत्रैः स्विष्टं सुपूजितं तथा च श्रुतिः ओं श्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं ये य
जामहे इति पंचाक्षरं द्व्यक्षरो वषट्कारश्चेति स्मृतिश्च चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च हूयते च पुनर्द्वा
भ्यां स मे विष्णुः प्रसीदतु ४१ देवास्तु सर्वमयमिति देवाः तथापि जगदाद्यंतयोः त्वमेव नान्यः कश्चिदित्याहुः पुरेति

अग्निरुवाच यत्तेजसाहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसिक्तं तं यज्ञियं पंचविधं च पंचभिः स्वि
ष्टं यजुर्भिः प्रणतोऽस्मि यज्ञं ४१ देवा ऊचुः पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन्
सलिल उरगेंद्राधिशयने पुमान् शेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि
भृत्यानवसि नः ४२ गंधर्वा ऊचुः अंशांशास्ते देव मरीच्यादय एते ब्रह्मेंद्राद्या देवगणा रुद्रपुरोगाः
क्रीडाभांडं विश्वमिदं यस्य विभूमन् तस्मै नित्यं नाथ नमस्ते करवाम ४३

कल्पापाये प्रलयकाले विकृतं कार्यजातं उदरीकृत्य संहृत्य त्वमेव आद्यः पुमान् उरगेंद्र एव अधिकर
यनं यस्य तस्मिन् शेषे शयनं करोषि सिद्धैः जनलोकादिवासिभिः विमृशिता विचिंतिता अध्यात्मपदवी
ज्ञानमार्गः यस्य स एव त्वं यः इदानीं अक्ष्णोः पथि चरसि प्रत्यक्षोऽसि अवसि रक्षसि ४२ गंधर्वा अप्सरस
स्तु वयं भिया सर्वानपि परमेश्वरत्वेन उपश्लोकयामः त्वमेव तु परमेश्वरः अन्ये त्वदंशा एवेत्याहुः हे विभुमन्
महत्तम क्रीडाभांडं क्रीडोपकरणं विश्वं ब्रह्मांडं यस्य तस्मै ते नमनं कुर्मः ४३

विद्याधरास्तु केवलं विद्याभिः संपदः प्राप्यंते अहंकारादिव्यामोहनिवृत्तिस्तु त्वत्कथाश्रवणं विना नास्तीत्याहुः
अर्थं पुरुषार्थसाधनं कलेवरं प्रतिपद्य प्राप्य त्वन्मायया तस्मिन्ममेति अहमिति च अभिमानं कृत्वा दुर्मेधा
त्ममोहं युष्मत्कथामृतनिषेवकः उत् उच्चैः युदस्येत् परित्यजेत् नान्यः ननु स्वैः पुत्रादिभिः अभिक्षिप्तः क्षिप्तः इति
तैः सन् परित्यजेदेव नेत्याहुः क्षिप्तोपि दुर्मतिः असत्सु विषयेषु लालसात् लोलायस्यसः ४४ ब्राह्मणाः

विद्याधरा ऊचुः त्वन्माययार्थमभिपद्य कलेवरेस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः क्षिप्तो
प्यसद्विषयलालस आत्ममोहं युष्मत्कथामृतनिषेवक उद्व्युदस्येत् ४४ ब्राह्मणा ऊचुः त्वं क्रतुस्त्वं हवि
स्त्वं हुताशः स्वयं त्वं हि मंत्रः समिद्दर्भपात्राणि च त्वं सदस्यर्त्विजो दंपती देवता अग्निहोत्रं स्वधा सोम
आज्यपशुः ४५ त्वं पुरा गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेंद्रो यथा स्तूयमानो नदंल्लील
या योगिभिर्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः ४६ सं प्रसीद त्वमस्माकमाकांक्षतां दर्शनं ते परिभ्र
ष्टसत्कर्मणां कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यांति तस्मै नमः ४७ इति दक्षः कवि
र्यज्ञं भद्र रुद्राभिमर्शितं कीर्त्यमाने हृषीकेशे संनिन्ये यज्ञभावने ४८

स्तुवंति त्वमिति त्रिभिः सदस्याश्च ऋत्विजश्च ४५ गां पृथ्वीं रसायाः रसातलात् दंष्ट्रया व्युज्जहर्थ विशेषेण उद्धृतवान् असि योगिभिः स्तूयमानः हे त्रयीगात्र वेदमूर्ते यज्ञः याग स्वरूप तद्विशेषणः तद्रूपी संकल्प
रूप इति वा यज्ञः क्रतुः कर्म यस्येति वा ४६ सः त्वं अस्माकं त्वद्दर्शनं आकांक्षतां प्रसीद अस्मद्यज्ञं पूरयेत्यर्थः ननु अशक्यं त
दुक्तस्य ततः ते तव नाम्नि कीर्तिते एव यज्ञविघ्नाः क्षयं यांति एवं भावाय तस्मै नमः ४७ इति अनेन प्रकारेण सर्वैः कीर्त्यमाने
हे भद्र विदुर संनिन्ये प्रवर्तयामास ४८

सर्वात्मतया सर्वभागभोक्तापि भगवान् निजानंदतृप्तोपि स्वेन भागेन त्रिकपालपुरोडाशेन प्रीयमाण इव दक्षं आभाष्य
संबोध्य बभाषे ४९ यः अहं जगतः कारणं आत्मा च ईश्वरश्च उपद्रष्टा साक्षी च स्वप्रकाशश्च निरुपाधिश्च स एव ब्रह्मा
शर्वश्चेत्यन्वयः ५० कुतद्वस्तेत आह अहमेव आत्ममायां अधिष्ठाय जगत् सृष्ट्यादि कुर्वन् सन् सर्वशक्तियोजितांसं
ज्ञां धारयामि ५१ तस्मिन् केवले अद्वितीये समानासमानजातीयभेदरहिते ब्रह्मणि मयि ब्रह्मरुद्रौ भूतानि च भेदेन अ
ज्ञः पश्यतीत्यर्थः ५२ विद्वांस्तु भेदं न पश्यतीति दृष्टांतमाह यथेति ५३ तस्मात् एवं ऐक्यं पश्यन् कृतार्थो भवतीत्याह

भगवान्स्वेनभागेन सर्वात्मा सर्वभागभुक् दक्षं बभाष आभाष्य प्रीयमाण इवानघ ४९ अहं ब्रह्मा च शर्व
श्च जगतः कारणं परं आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः ५० आत्ममायां समाविश्य सोहं गुणमयीं
द्विज सृजन् रक्षन् हरन्विश्वं दध्रे संज्ञां क्रियोचितां ५१ तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि ॥ ॥
ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोनुपश्यति ५२ यथा पुमान्न स्वांगेषु शिरःपाण्यादिषु क्वचित् पारक्यबुद्धिं कुरुते
एवं भूतेषु मत्परः ५३ त्रयाणामेकभावानां यो न पश्यति वै भिदां सर्वभूतात्मनां ब्रह्मन् स शांतिमधिगच्छति ५४
एवं भगवतादिष्टः प्रजापतिपतिर्हरिं अर्चित्वा क्रतुना स्वेन देवानुभयतो यजन् ५५ रुद्रं च स्वे
न भागेन ह्युपाधावत्समाहितः कर्मणोदवसानेन सोमपानितरानपि ५६ उदवस्य सहर्त्विग्भिः सस्नाववभृथं
ततः तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे ५७ ॥ श्रीरामः शरणं ममेति परं मंत्रं रामभद्राक्षरः

त्रयाणामिति त्रयाणां एकः भावः स्वरूपं येषां ५४ स्वेन क्रतुना त्रिकपालिष्ट्या उभयतः अंगैः प्रधानेन च ५५ स्वेन भा
गेन यज्ञावशिष्टेन उदवस्यते समाप्यते अनेनेति उदवसानं तेन कर्मणा सोमपान् इतरानपि उपाधावत् इत्यनुषंगः ५६ ततः
श्च उदवस्य कर्म समाप्य अवभृथकृपयथा भवतीति तथा स्नातवान् स्वेनैव अनुभावेन अवाप्तराधसे प्राप्तसिद्धये तस्मै

भा० च०
२३

आहुः के भजतेस्म अनन्यभावानां एकैव गतिः यः तं प्रलयकाले सुप्ता शक्तिः ईश्वरमिव ५९ बृहस्पतिः शिष्यान्मया श्रुतं
६० परं पवित्रं यः आकर्ण्य तथा अनुकीर्तयेत् सः आत्मनः परस्यापि अघं संसारं व्यसनं सर्वदा धुनोति ६१ इति चतुर्थे सप्त
मोध्यायः दक्षकन्यान्वये प्राप्तात् दक्षयज्ञकथोदिता मनुपुत्रान्वये प्राप्ता ध्रुवचर्याच पंचभिः अष्टमे गुरुदारोक्तिरोष
मत्सरतः पुरात् निर्गतेन ध्रुवेणाह तपसा तोषणं हरेः २ एवं तावत् मनुकन्यान्वयो लोके मरीच्यादीनां ब्रह्मपुत्राणां

एवं दाक्षायणी हित्वा सती पूर्वकलेवरं जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ५८ तमेव दयितं भूय आवृ
ङ्क्ते पतिमंबिका अनन्यभावैकगतिं शक्तिः सुप्तेव पूरुषं ५९ एतद्भगवतः शंभोः कर्म दक्षाध्वरद्रुहः श्रुतं
भागवताच्छिष्यादुद्धवान्मे बृहस्पतेः ६० इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघमर्षणं यो
नित्यदाकर्ण्य नरोनुकीर्तयेत् धुनोत्यघं कौरव भक्तिभावितः ६१ इति श्रीभागवते महापुराणे चतु
र्थस्कंधे सप्तमोध्यायः मैत्रेय उवाच सनकाद्या नारदश्च ऋभुर्हंसोरुणिर्यतिः नैते गृहान्
ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः १ मृषाधर्मस्य भार्यासीद्दंभं मायां च शत्रुहन् असूत मिथुनं तत्तु
निर्ऋतिर्जगृहेऽप्रजः २ तयोः समभवल्लोभो निकृतिश्च महामते ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्व
सा कलिः ३ दुरुक्तौ कलिराधत्त भयं मृत्युं च सत्तम तयोश्च मिथुनं जज्ञे यातना निरयस्तथा ४ ॥ ६२

वंशाः वर्णिताः तत्र अवशिष्टं किंचिदाह सनकाद्याः न आवसन् नार्ध्वरेतसः नैष्ठिकाः अतः तेषां वंशः नास्ति १ राम
अधर्मोपि ब्रह्मपुत्रः तस्य वंशमाह मृषेति चतुर्भिः दंभः प्रतारणं माया तद्वुचिता चेष्टा तयोः सादृश्यादपि दोषस्य २३
अधर्मात्मतया एवं उपर्यपि अप्रजः अपुत्रः २ निकृतिः शठता यत् याभ्यां कलिः तस्य स्वसा दुरुक्तिश्च सर्था ३
यातना तीव्रवेदना ४ ॥

तिसर्गः अनुसर्ग एव यद्वा प्रतिसर्गः प्रलयः अधर्मस्य प्रलयहेतुत्वात् प्रतिसर्गत्वं एतत् एतं अधर्मवंशं पुण्यमितिव
ज्जनद्वारा पुण्यहेतुत्वात् ५ मनोः पुत्रवंशं हरेः अंशः ब्रह्मा तस्य अंशात् देहाद्यत् जन्मस्य ६ जगतः रक्षायां स्थितौ
सुनीतिः रुचिश्च जाये तयोः मध्ये ८ तयोः प्रियाप्रियत्वे अपि च न ध्रुवचरित्रमाह पंचभिः अध्यायैः सुरुचेः पुत्रं उत्तमसंज्ञं
लालयन् ९ तथा अंकारोहणं चिकीर्षमाणं १० गर्वोक्तिमाह त्रिभिः नैति नृपतेः धिष्ण्यं आसनं न पात्मजोपि भवान् न आ

संग्रहेण समाख्यातः प्रतिसर्गस्तवानघ त्रिः श्रुत्वैतत्पुमान्पुण्यं विधुनोत्यात्मनो मलं ५ अथातः कीर्तये वंशं पुण्य
कीर्तेः कुरूद्वह स्वायंभुवस्यापि मनोर्हरेरंशांशजन्मनः ६ प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ वासुदेव
स्य कलया रक्षायां जगतः स्थितौ ७ जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः सुरुचिः प्रेयसी पत्युर्नेतरा य
त्सुतो ध्रुवः ८ एकदा सुरुचेः पुत्रमंकमारोप्य लालयन् उत्तमं नारुरुक्षंतं ध्रुवं राजाभ्यनंदत ९ तथा चि
कीर्षमाणं तं सपत्न्यास्तनयं ध्रुवं सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता १० न वत्स नृपतेर्धिष्ण्यं भ
वानारोढुमर्हति न गृहीतो मया यत्त्वं कुक्षावपि तदात्मजः ११ बालोसि बत नात्मानमन्यस्त्रीगर्भसंभृतं नूनं वेद
भवान्यस्य दुर्लभेर्थे मनोरथः १२ तपसाराध्य पुरुषं तस्यैवानुग्रहेण मे गर्भे त्वं साधयात्मानं यदीच्छसि नृ
पासनं १३ मैत्रेय उवाच मातुः सपत्न्याः सदुरुक्तिविद्धः श्वसन्रुषा दंडहतो यथाहिः हित्वा मिषंतं
पितरं सन्नवाचं जगाम मातुः प्ररुदन् सकाशं १४ तं निःश्वसंतं स्फुरिताधरोष्ठं सुनीतिरुत्संग उदूह्य बालं
निशम्य तत्पौरमुखान्नितांतं सा विव्यथे यद्गदितं सपत्न्याः १५

रोढुं अर्हति ११ ॥ १२ ॥ पुरुषं ईश्वरं १३ मिषंतं पश्यंतं कुंठितं वाचं १४ उदूह्य आरोप्य अंतःपुरजनात्

शोकएवदावाग्निः तेनदावंवनंलतेवशिक्षितासाबाला विललाप विलापंचकार १६ वृजिनस्य दुःखस्य अमंगलं अपरा
भा॰ च॰ धर्मां अमंस्थाः यत्तुयत् परेभ्यः दुःखंददाति यःसःस्वदत्तमेवदुःखंभुंक्ते १७ दुर्भगाया मयाउदरेगृहीतः तस्याएव
२४ स्तन्येनवृद्धश्च दुर्भगत्वमेवाह यांमां हृडस्पातिः भूपतिः भार्येतिवादुं स्वीकर्तुं लज्जते वाशब्दाद्दासीइत्यपि १८
स्तन्येनवृद्धश्च दुर्भगत्वमेवाह यांमां माता मातुः सपत्नी तथापियदुक्तं तपसाराध्यपुरुषमित्यादि तत् आतिष्ठ कुरु अध्यासनंयदि
पितुः भार्यात्वेनसमा मात्रा मातुः सपत्नी तथापियदुक्तं तपसाराध्यपुरुषमित्यादि तत् आतिष्ठ कुरु अध्यासनंयदि
पितुः भार्यात्वेनसमा पालनाय आत्मा स्वीकृता गुणाभिपत्तिः सत्वगुणाधिष्ठानं येन
इच्छसि १९ परिचर्यंनिषेव्य विश्वस्य विभावनाय पालनाय आत्मा स्वीकृता गुणाभिपत्तिः सत्वगुणाधिष्ठानं येन

सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावल्लतेव बाला वाक्यं सपत्न्याः स्मरती सरोजश्रियादृशा बाष्पक
लामुवाह १६ दीर्घं श्वसंती वृजिनस्य पारमपश्यती बालकमाह बाला मामंगलं तात परेषु मंस्थाः भुंक्ते जनो
यत्परदुःखदस्तत् १७ सत्यंसुरुच्याभिहितंभवान्मेयद्दुर्भगाया उदरे गृहीतः स्तन्येनवृद्धश्च विलज्जते यां
भार्येति वा वोढुमिडस्पतिर्मां १८ आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समापि यदव्यलीकं आराधयाधोक्षजपा
दपद्मं यदीच्छसेध्यासनमुत्तमो यथा १९ यस्यांघ्रिपद्मं परिचर्य विश्वविभावनाया त्तगुणाभिपत्तेः अजोध्य
तिष्ठन् खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवंद्यं २० तथा मनुर्वो भगवान्पितामहो यमेकमत्या पुरुदक्षिणै
र्मखैः इष्ट्वाभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यं २१ तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृ
ग्यपदाब्जपद्धतिं अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषं २२ नान्यं ततः पद्मपलाशलोच
नाद्दुःखच्छिदं ते मृगयामि किंचन यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरंगविमृग्यमाणया २३ ॥ ॥ राम २४

नाद्दुःखच्छिदं ते मृगयामि किंचन यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरंगविमृग्यमाणया २३ ॥ ॥
यस्य जितः आत्मा मनश्च श्वसनं घ्राणश्च तैरभिवंद्यं २० एकमत्या सर्वांतर्यामिदृष्ट्या २१ मृग्या पदाब्जयोः प
द्धतिः मार्गः यस्य तमेव आश्रय शरणं व्रज ततः भजस्व न अन्यस्मिन् भावः यस्य तस्मिन् निजधर्मैः भाविते शोधिते २२
तमेवसनेन सूचितसर्वांतर्मत्वंप्रपंचयति नान्यमिति हस्तेन गृहीतं दीपवत् पद्मं यया इतरैः ब्रह्मादिभिः २३

संजल्पितं विलापितं ततः अर्थस्य आगमः यस्मात् २४ तत् तथाभूतं वचः आकर्ण्य २५ विस्मितदृष्टः कृतदेवाह अहोतेजः
प्रभावः २६।२७ विकल्पे मानापमानविवेके सत्यपि भिन्नाः मनः संति किंतु मोहकल्पिता एवेत्यर्थः कुतः यत् सुखंदुःखंवा
निजकर्मभिरेवेति यतः २८ उपशमोपदेशेनानिवर्तयाति परितुष्येदितिषड्भिः ईश्वरगतिंवीक्ष्य ईश्वरानुकूल्यंविना नउद्यमाः
फलहेतवइतिज्ञात्वा २९ दुष्करश्च तव अयंउद्यतइत्याह अथेतिद्वाभ्यां यस्य प्रसादं अवरोद्धुं प्राप्तुं इच्छसि ३० ॥

मैत्रेयउवाच एवंसंजल्पितं मातुराकर्ण्यार्थागमं वचः संनियम्यात्मनात्मानं निश्चक्राम पितुः पुरात् २४ नार
दस्तदुपाकर्ण्य ज्ञात्वा चास्य चिकीर्षितं स्पृष्ट्वा मूर्धन्यघघ्नेन पाणिना प्राह विस्मितः २५ अहो तेजः क्षत्रियाणां मा
नभंगममृष्यतां बालोप्ययं हृदा धत्ते यत्समातुरसद्वचः २६ नारदउवाच नाधुनाप्यवमानं ते सन्मानं नापि
पुत्रक लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु २७ विकल्पे विद्यमानेपि न ह्यसंतोषहेतवः पुंसो मोहमृते
भिन्ना यल्लोके निजकर्मभिः २८ परितुष्येत्ततस्तात तावन्मात्रेण पूरुषः दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बु
धः २९ अथ मात्रोपदिष्टेन योगेनावरुरुत्ससि यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम ३० मुनयः पदवीं य
स्य निःसंगेनोरुजन्मभिः न विदुर्मृगयंतोपि तीव्रयोगसमाधिना ३१ अतो निवर्ततामेष निर्बंधस्तव निष्फ
लः यतिष्यति भवान्काले श्रेयसां समुपस्थिते ३२ यस्य यद्दैवविहितं स तेन सुखदुःखयोः आत्मानं तोषयन्
देही तमसः पारमृच्छति ३३

निःसंगेन तीव्रयोगयुक्तेन समाधिना मृगयंतोपि यस्य पदवीं मार्गं न विदुः स देवः दुराराध्यः ३१ काले इद्धत्वे ३२ सुखदुःख
योः मध्ये सुखे सति पुण्यं क्षीयत इति दुःखे सति पापं क्षीयत इति आत्मानं तोषयन् तपसः पारं मोक्षं प्राप्नोति ३३॥

भा॰ च॰
२५

किंच गुणैः अधिकान् पुंसः इति ल्यब्लोपे पंचमी तं दृष्ट्वा प्रीतिं कुर्यात् न तु असूयां इत्यर्थः अनुक्रोशं कृपां लिप्सेत् न
तु तिरस्कारं समानात् मैत्रीं न तु स्पर्द्धां ३४।३५ क्षात्रं स्वभावं प्राप्तवतः अत एवाविनीतस्य दुर्वाक्यबाणैः भिन्ने
हृदि न श्रयते न तिष्ठति ३६ अन्यैः अनधिष्ठितं त्रिभुवने उत्कृष्टं पदं जेतुं इच्छोः मे साधु वर्त्म मार्गं ब्रूहि ३७ अंक

गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ३४ ध्रुव उवाच सो
यं शमो भगवता सुखदुःखहतात्मनां दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः ३५ अथापि मेऽविनीतस्य क्षा
त्रं घोरमुपेयुषः सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृदि ३६ पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे ब्रूह्य
स्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितं ३७ नूनं भवान् भगवतो योंगजः परमेष्ठिनः वितुदन्नटते वीणां हि
ताय जगतोऽर्कवत् ३८ इत्युदाहृतमाकर्ण्य भगवान्नारदस्तदा प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकंप
या ३९ जनन्याभिहितः पंथाः स वै निःश्रेयसस्य ते भगवान् वासुदेवस्तं भज तं प्रवणात्मना ४० धर्मार्थ
काममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः एकं ह्येव हरेस्तत्र कारणं पादसेवनं ४१ तत्तात गच्छ भद्रं ते यमुना
यास्तटं शुचि पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ४२ स्नात्वानुसवनं तस्मिन् कालिंद्याः सलिले
शिवे कृत्वोचितानि निवसन्नात्मनः कल्पितासनः ४३ राम
२५

इति पाठे उत्संगात् जातः यः नारदः स भवान् तत्रालिंगां वितुदन् वादयन् हिताय अटति ३८।३९ निःश्रेयसस्य अभिप्रे
तार्थस्य पंथाः कोऽसौ इत्यत आह भगवान् वासुदेव एव अतः तं भज ४० मधुवनाख्यं तटं गच्छ यत्र मधुवने ४२ अ
ध्ययनाद्यभावेऽपि आत्मनः उचितानि योग्यानि देवतानमस्कारादीनि कृत्वेति यमनियमाः उक्ताः आसनं कल्पितं
कुशादिभिः स्वस्तिकादिभिश्च ४३

प्राणेंद्रियमनसां चांचल्यं व्युदस्येति प्राणायामप्रत्याहारौ धारणामाह अभिध्यायेदिति षड्भिः गुरुणा धीरेण मनसा
गुरुं श्रीहरिं ४४ सुरेषु सुंदरं ४५ रमणीयानि अंगानि यस्य ओष्ठौ च ईक्षणे च ईक्षणं च अरुणे ओष्ठेक्षणे
धारयतीति तथा अरुणं ओष्ठं ईक्षणं वा धारयतीति वा नृणां स्मरणकरं यद्वा धनं सर्वपुरुषार्थनिधिमि णं
त्यर्थः ४६ पुरुषं पुरुषलक्षणयुक्तं कौस्तुभस्य आभरणं ग्रीवा यस्य ४७ कांचीकलापेन पर्यस्तं परिवे

प्राणायामेन त्रिवृता प्राणेंद्रियमनोमलं शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुं ४४ प्रसादाभिमुखं श
श्वत्प्रसन्नवदनेक्षणं सुनासं सुभ्रुवं चारुकपोलं सुरसुंदरं ४५ तरुणं रमणीयांगमरुणोष्ठेक्षणाधरं
प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवं ४६ किरीटिनं कुंडलिनं केयूरवलयान्वितं कौस्तुभाभरणग्रीवं
पीतकौशेयवाससं ४७ श्रीवत्सांकं घनश्यामं पुरुषं वनमालिनं शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजं
४८ कांचीकलापपर्यस्तं लसत्कांचननूपुरं दर्शनीयतमं शांतं मनोनयनवर्धनं ४९ पद्भ्यां नखमणिश्रे
ण्या विलसद्भ्यां समर्चतां हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितं ५० स्मयमानमभिध्यायेत्सानुरागा
वलोकनं नियतेनैकभूतेन मनसा वरदर्षभं ५१ एवं भगवतो रूपं सुभद्रं ध्यायतो मनः निर्वृत्या परया
तूर्णं संपन्नं न निवर्तते ५२ जपश्च परमो गुह्यः श्रूयतां मे नृपात्मज यं सप्तरात्रं पठन् पुमान्प
श्यति खेचरान् ५३

ष्ठितं मनोनयनयोः वर्धनं ४८ हृत्पद्मस्य कर्णिकायाः धिष्ण्यं मध्यस्थानं तत् आक्रम्य समर्चतां आत्मनि मनसि स्थितं ५०
ध्यानमाह स्मयमानमिति नियमेन प्रागुक्तधारणया सुस्थिरेण अत एव एवंभूतेन एकाग्रेण धारणोक्तविशेषणा
नि ध्यानेऽपि द्रष्टव्यानि पद्माय यथोक्तमात्रं ध्यानमेव तदुक्तं एकादशस्कंधे नान्यानि चिंतयेद्भूयः सुस्मितं भावये
न्मुखमिति ५१ सः तूर्णं शीघ्रं संपन्नः सन् ५२

उध्यानं ५३

भा॰च
२६
द्रव्याण्यवाह सलिलैरिति शस्तैः दूर्वांकुरैः अन्यैरेव अंशुकैः भूर्जत्वगादिभिः ५४ अधिष्ठानमाह लब्ध्वा संपादितां
द्रव्यमयीं शिलादिभिः निर्मितां पूजासाद्गुण्यहेतुमाह साद्धाभ्यां अभृतात्मा धृतचित्तः मितं वन्यं भुंजेत
तितथा ५५ यत्करिष्यतीति तदानीं अवतारप्रादुर्भावात् ५६ पूर्वसेविताः सेवनं कारिताः कार्यत्वेन विदि
तादृस्यर्थः मंत्रहृदयेन द्वादशाक्षरेण ५७ एवं उक्तरीत्या मनोगतं यथा भवति तथा कायादिभिः भक्तिमत्या पे

ॐ नमो भगवते वासुदेवाय मंत्रेणानेन देवस्य कुर्याद्द्रव्यमयीं बुधः सपर्यां विविधैर्द्रव्यैर्देशकालविभागवित्
५४ सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः शस्तांकुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुं ५५ लब्ध्वा
द्रव्यमयीमर्चां क्षित्यंब्वादिषु वार्चयेत् आभृतात्मा मुनिः शांतो यतवाङ्मितवन्यभुक् ५६ स्वेच्छावतार
चरितैरचिंत्यनिजमायया करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयं गदं ५७ परिचर्या भगवतो यावत्यः पूर्व
सेविताः ता मंत्रहृदयेनैव प्रयुंज्यान्मंत्रमूर्तये ५८ एवं कायेन मनसा वचसा च मनोगतं परिचर्यमाणो भ
गवान् भक्तिमत्परिचर्यया ५९ पुंसाममायिनां सम्यग्भजतां भाववर्धनः श्रेयो दि[illegible]श्यत्यभिमतं यद्ध
र्मादिषु देहिनां ६० विरक्तश्चेंद्रियरतौ भक्तियोगेन भूयसा तं निरंतरभावेन भजेताद्धा विमुक्तये ६१ इत्यु
क्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः ययौ मधुवनं पुण्यं हरेश्चरणचर्चितं ६२ श्रीराम: शरणं भ
तपोवनं गते तस्मिन् प्रविष्टोंतःपुरं मुनिः अर्हणेनार्चितो राज्ञा सुखासीन उवाच ह ६३
परिचर्यया परिचर्यमाणः धर्मार्थकामेषु यत् अभिमतं तत् श्रेयः दिशतीति द्वयोरन्वयः ५८ विरक्तः भजेत् कि
मर्थं मुक्तये ६१ हरेः चरणाभ्यां चर्चितं मंडितं ६२ अर्हितं सत्कृत्य समर्पितं अर्हणं अर्घ्यादि यस्मै ६३॥ राम
२६

किं वा न रिष्यते न विनश्यतीति सवितर्कः प्रश्नः ६४ मात्रा सुहृत् निर्वासितः तस्य अप्यनादृतत्वात् ६५ मास्म अदूतिति किंस्वि
त् नखादंतीत्यर्थः ६६। ६७ यस्य यशः जगत् प्रावृत्य व्याप्नोति ६८ विपुलयन् विस्तारयन् ६९ ध्रुवः मधुवने किं अक
रोत् इत्यपेक्षायामाह तत्रेत्यादिना अभिषिक्तः स्नातः यस्यां प्राप्तः ७० कपित्थानि च बदराणि च अशनं यस्य
आत्मनि वृत्तिः देहस्थितिः तदनुसारेण कृतौ अर्चयन् अनयत् दृषदिव अनयत् संपादितवानित्यन्वयः ७१
राजोवाच आर्हितार्हणको ब्रह्मन् स्त्रैणेनाकरुणात्मना निर्वासितः पंचवर्षः सह मात्रा महान्कविः ६५
अप्यनाथं वने ब्रह्मन्मा स्मादंति वृकादयः शांतं शयानं क्षुधितं परिम्लानमुखांबुजं ६६ अहो मे बत दौ
रात्म्यं स्त्रीजितस्योपधारय योंकं प्रेम्णारुरुक्षंतं नाभ्यनंदमसत्तमः ६७ नारद उवाच मा मा शुचः स्वत
नयं देवगुप्तं विशांपते तत्प्रभावमविज्ञाय प्रावृंक्ते यद्यशो जगत् ६८ सुदुष्करं कर्म कृत्वा लोकपालैर
पि प्रभुः एष्यत्यचिरतो राजन्यशो विपुलयंस्तव ६९ इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः राज्य
लक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयन् ७० तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीं समाहितः पर्यच
रदृष्यादेशेन पूरुषं ७१ त्रिरात्रांते त्रिरात्रांते कपित्थबदराशनः आत्मवृत्त्यनुसारेण मासं निन्येर्चयन्
हरिं ७२ द्वितीयं च तथा मासं षष्ठे षष्ठेर्भकोदिने तृणपर्णादिभिः शीर्णैः कृतान्नोभ्यर्चयन्विभुं ७३
तृतीयं चानयन्मासं नवमे नवमेहनि अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ७४ चतुर्थमपि वै मासं
द्वादशे द्वादशेहनि वायुभक्षो जितश्वासो ध्यायन्देवमधारयत् ७५ पंचमे मास्यनुप्राप्ते जितश्वासो
नृपात्मजः ध्यायन्ब्रह्मपदैकेन तस्थौ स्थाणुरिवाचलः ७६
प्रतिमासं आहारसंकोचं तपोतिरेकं च कृतवानित्यर्थः ७२ भृतानि दृढ्दयाणि च आशेरते यस्मिन् तत् मनः

भा॰ ४ ७७ धारयमाणमाणस्यसत: तस्येतेज: सोढुं न शाक्नुवंत: कंपिता: ७८ तस्य अंगुष्ठेनाभिपीडिता आक्रांता
२८ सती मही तत्र अर्धं ननाम समे अंशो अर्धे शाब्दस्य नपुंसकत्वात् अंशांशिनो: अभेदाभेदाच्चैवं सामा
नाधिकरण्यं इभेंद्रेणाधिष्ठिता तरीनो: पथापदपदे सव्यत: दक्षिणश्च नमतितद्वत् ७९ अन्यदृष्ट्याश्रयेमा न
ह यस्मिन् ध्रुवे विश्वं विश्वात्मकं विष्णुं आत्मन: सकाशात् अनन्ययाधिया स्वात्मनि अभेददृष्ट्या अभिध्या
सर्वतोमन आकृष्य हृदि भृतेंद्रियाशयं ध्यायन्भगवतो रूपं नाद्राक्षीत्किंचनापरं ७७ आधारं महदादी
नां प्रधानपुरुषेश्वरं ब्रह्मधारयमाणस्य त्रयो लोकाश्चकंपिरे ७८ यदैकपादेन सपार्थिवार्भकस्तस्थौ
तदंगुष्ठनिपीडिता मही ननाम तत्रार्धमिभेंद्राधिष्ठिता तरीव सव्येतरत: पदे पदे ७९ यस्मिन्नभिध्याय
न्विश्वमात्मनो द्वारं निरुध्यासुमनन्यया धिया लोका निरुच्छ्वासनिपीडिता भृशं सलोकपाला: श
रणं ययुर्हरिं ८० देवा ऊचु: नैवं विदामो भगवन् प्राणरोधं चराचरस्याखिलसत्त्वधाम्न: विधेहि
तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यं ८१ श्रीभगवानुवाच माभैष्ट बालं तपसो
दुरत्ययान्निवर्तयिष्ये प्रतियात स्वधाम्ना यतो हि व: प्राणनिरोध आसीदौत्तानपादिर्मयि
संगतात्मा ८२ इति श्रीभागवते महापुराणे चतुर्थस्कंधे अष्टमोध्याय: ॥ ८ ॥ ४
पतिसति किंकृत्वा असुं प्राणं द्वारं च निरुध्य विश्वात्मनी एकीकृत्य स्वप्राणनिरोधे कृते विश्वस्य प्राणनिरोधो ऽ
तदिति भाव: ८० एवं प्राणनिरोधं कदाचिदपि न विद्म: अखिलसत्त्वधाम्न: सर्वप्राणशरीरस्य तत्तस्मात् वृजिनात् २८
कृशात् ८१ यत: बालात् कोसौ बाल: कथं च तस्मात् प्राणनिरोध इत्यत आह उत्तानपादस्य पुत्र: मयि विश्व
रूपे संगतात्मा ऐक्यं प्राप्तो वर्तत इति ८२ इति चतुर्थेष्टम: ८

सवे
नवत्सु तुहरिं स्त्वा लब्ध्वा तस्मात् वरान् ध्रुव: प्रत्यागत्या करोद्राज्यं पित्राद त्तामतीयते एवं भगवद्वाक्येन गत भया: १ सवे
ध्रुव: योगस्य दार्ढ्येन निश्चल तया गरुडादिरूढं पुर: स्थितमपि यदा अंतर्दृष्टित्वात् असौ न अपश्यत् तदा भ
गवतेव आत्मन: स्वरूपं आकृष्टं यत: तिरोहितं उपलभ्य व्युत्थित: सन् तदवस्थं यादृक् अंत: स्फुरितं ता
दृशं २ आगतसाध्वस: जातसंभ्रम: विनमय्य आनतं कृत्वा संभ्रममेवाह दृग्भ्यां प्रपिबन्निव पश्यन् अवंदत
आस्येन चुंबन्निव अवंदतं भुजाभ्यामाश्लिषन्निव अवंदतेत्यर्थ: ३ विवक्षंतं तद्गुणान् वक्तुं इच्छंतं अताद्विदं
मैत्रेय उवाच त एवमुत्सन्नभया उरुक्रमे कृतावनामा: प्रययुस्त्रिविष्टपं सहस्रशीर्षापि ततो गरुत्मता मधो
र्वनं भृत्यदिदृक्षया गत: १ स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तडित्प्रभं तिरोहितं सहसै
वोपलभ्य बहि:स्थितं तदवस्थं ददर्श २ तद्दर्शनेनागतसाध्वस: क्षिताववंदतांगं विनमय्य दंडवत्
दृग्भ्यां प्रपश्यन् प्रपिबन्निवार्भकश्चुंबन्निवास्येन भुजैरिवाश्लिषन् ३ स तं विवक्षंतमतद्विदं हरिर्ज्ञात्वा
स्य सर्वस्य च हृद्यवस्थित: कृतांजलिं ब्रह्ममयेन कंबुना पस्पर्श बालं कृपया कपोले ४ स वै तदैव प्रतिपा
दितां गिरं दैवीं परिज्ञातपरात्मनिर्णय: तं भक्तिभावोभ्यगृणादसत्वरं परिश्रुतोरुश्रवसं ध्रुवक्षिति: ५
ध्रुव उवाच योंत: प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधर: स्वधाम्ना अन्यांश्च हस्त
चरणश्रवणत्वगादीन्प्राणान्नमो भगवते पुरुषाय तुभ्यं ६ शंखेन ४ भगवता प्र
त्यादि अविज्ञानंतं अस्य ध्रुवस्य सर्वस्य च हृदि अवस्थितत्वात् ज्ञात्वा ब्रह्ममयेन वेदात्मकेन तिपादितां गिरं प्रतिपद्यतेति शेष: प्रतिपद्यतामिति पाठे तां वेदात्मिकां परिज्ञात: परात्मनो: ईश्वरजीवयो: निर्णयो ये
न स: एवं अत एव भक्तिभाव: प्रेम यस्य असत्वरं परिश्रुतं विख्यातं उरुश्रव: कीर्ति: यस्य तं ध्रुवा क्षिति: स्थानं
यस्येति निर्देश: ५ इत्थानुग्रहं संप्राप्य वागाद्यधिष्ठातृत्वेन नि: द्वादशादित्यसंकाशो: श्लोकेरस्तौद्धरिं ध्रुव: यो मे प्रसुप्तां धार
लीनां वाचं अन्यांश्च प्राणान् इंद्रियाणि स्वधाम्ना चिच्छक्त्या संजीवयति तत: अखिला: चक्षुरादिज्ञानशक्ती: धार
यतीति तथा पुरुषाय अंतर्यामिणा ६

भा॰ च नतु वागिंद्रियादिशक्तिः शक्तिधराः वह्न्यादयः प्रसिद्धाः न अहं इत्यत आह एक इति अनुविश्य पुरुषः अंतर्यामी त्वं ए
२८ क एव तस्या मायायाः असत्सु गुणेषु इंद्रियादिषु स्थितः सन् तद्देवतारूपः नानेव भासि ननु तद्व्यतिरेकेण ज्ञानक्रि
या शक्तिधरः कश्चिदस्तीत्यर्थः ७ अपि च किं बहुना यं वह्न्यादयः ज्ञानादिशक्तिधराः न भवंतीति यस्मात् ब्रह्मणो
पि ज्ञानं त्वदधीनमेवेत्याह त्वद्दत्तया वयुनया ज्ञानेन भवंतं शरणं प्रपन्नः ब्रह्मा इदं विश्वं अचष्ट अपश्यत्॥
कथं सुप्तः पुरुषः प्रबुद्धः सन् यथा पश्यति तद्वत् अतः आह पवर्ग्याः मुक्ताः तेषामपि शरणं कृतविदा सर्वेंद्रियज्ञी

एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषं॥ सृष्ट्वानुविश्य पुरुषस्तदसद्गुणे
षु नानेव दारुषु विभावसुवद्विभासि ७ त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तः प्रबुद्ध इव नाथ भवत्प्रपन्नः॥
तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबंधो ८ नूनं विमुष्टमतयस्तव माय
याते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः अर्चंति कल्पकतरुं कुणपोपभोग्यमिच्छंति यत्स्पर्शजं सुख
नरकेपि नृणां ९ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् सा ब्रह्मणि
स्वमहिमन्यपि नाथ मा भूत् किं त्वंतकासिलुलितात्पततां विमानात् १०

वनेन त्वत्कृतं उपकारं जानता कथं विस्मर्यते एवंभूतं त्वां अजानंतः कृतघ्ना इत्यर्थः ८ ये च मादृशाः कामाद्यर्थं भजं श्रीः
ति तेपि मूढा इत्याह नूनमिति भवाप्ययो जन्ममरणे तद्विमोक्षहेतुं त्वां अन्यहेतोः कामार्थं भजंति ते नूनं विमुष्टमतयः २८
वंचितचित्ताः यतः ते कल्पतरुं त्वां अर्चंति ततः कुणपतुल्येन देहेन उपभोग्यं सुखं इच्छंति न च इच्छायोग्यं तदित्याह
यत्स्पर्शजं सुखं विषयसंबंधजन्यं सुखं तत् नरकेपि भवति ९ ननु स्वर्गादिसुखं सकामैः प्राप्यते निष्कामभजनेन स्यात्
इत्यत आह येति स्वमहिमनि निजानंदरूपेपि मा भूत् न भवतीत्यर्थः अंतकस्य असिना कालेन लुलितात् खंडितात्
विमानात् पततां सा नास्तीति किमु वक्तव्यं १० अतः कथाश्रवणाय तत्संगतिं देहीत्याह॥

भक्तिं त्वयि मुहुः प्रवहतां सातत्येन कुर्वतां ननु मोक्षं किं न याचसे अत आह येन महत्संगेन अंजसा अयत्नत
एवं उरूणि व्यसनानि यस्मिंस्तं नेष्ये पारं गामिष्यामि ११ कथामृतपानस्य मादकत्वमाह ते अतितरां प्रियमपि मर्त्यं
देहं न स्मरंति न अनुसंदधते ये च सुतादयः मर्त्यं अनुसंबद्धाः तानपि केन स्मरंति ये कृतप्रसंगाः केषु भवदीयप
दारविंदसौगंध्यलुब्धहृदयं येषां तेषु कुशलेन अन्येषां केवलं योगादिनिष्ठानां देहाभिमानानि दृष्टिं दर्शयति १२
ननु एवं विद्वानसि तत् किमिति अभिमानं वहसि अत आह तिर्यगादिभिः परिचितं व्याप्तं सतः असतश्च विशेषाः

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महताममलाशयानां येनांजसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये
भवद्गुणकथामृतपानमत्तः ११ ते न स्मरंत्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः ये त्व
ब्जनाभ भवदीयपदारविंदसौगंध्यलुब्धहृदयेषु कृतप्रसंगाः १२ तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादि
भिः परिचितं सदसद्विशेषं रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः १३ कल्पां
त एतदखिलं जठरेण गृह्णन् शेते पुमान् स्वदृगनंतसखस्तदंके यन्नाभिसिंधुरुहकांचनलोकपद्म
गर्भे द्युमान् भगवते प्रणतोस्मि तस्मै १४ त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो
भगवांस्त्र्यधीशः यद्बुद्ध्यवस्थितिमखंडितया स्वदृष्ट्या द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से १५

स्थूलं रूपं विराड्रूपं केवलं वेद्मि परं ईश्वरस्वरूपं न वेद्मि तदेवाह हे अज ते इदं स्थविष्ठं विराड्रूपं महदादीनि अनेकानि कारणानि यस्य हे परम अतः अभिमानः न निवर्तत इति भावः १३ तदेव भग
यस्य महदादीनि अनेकानि कारणानि यस्य हे परम अतः अभिमानः न निवर्तत इति भावः १३ तदेवं भग
यत्र वादः शब्दव्यापारः न अस्ति तत् ब्रह्मस्वरूपं च न वेद्मि अतः अभिमानः न निवर्तत इति एतत् त्रैलोक्यं यः पुमान् शेते तस्य
वरतनुं कृपया तद्रूपं हृद्यं ज्ञात्वा ईश्वररूपं अनुवर्णयन् नमस्करोति कल्पांत इति एतत् त्रैलोक्यं यस्य नाभिरेव सिंधुः
स्मिन्नेव हृदं कृत्वा बहिः पश्यति गानि द्वारे दृष्ट्वा इति अनंतसखः शेषसहायः तदंके शेषोत्संगे यस्य नाभिरेव सिंधुः सर्थः १४
सिंधुरुहं कृत्वा बहिः पश्यति गानि द्वारे दृष्ट्वा इति अनंतसखः शेषसहायः तेजस्वी ब्रह्मा भवति तस्मै प्रणतोस्मीत्यर्थः १४
समुद्रः तस्मिन् रोहतीति तथा तस्मिन् लोकपद्मस्य गर्भे कर्णिकायां द्युमान् तेजस्वी ब्रह्मा भवति

भा० च ४टी० ननु ममापि स्वापाद्यवस्थावत्वेकः जीवाद्विशेष इत्याह तं तु व्यतिरिक्तः जीवविलक्षणः आस्सेति बासि वैलक्षण्यमे
२९ वाह त्वं नित्यमुक्तः त्वत्प्रसादान्मुच्यते त्वं तु परिशुद्धः सतु मलिनः त्वं विबुधः सतु अज्ञः त्वं आत्मा सतु जडः त्वं
कूटस्थः सतु विकारि त्वं आदिपुरुषः सतु आदिमान् सतु भगहीनः त्वं त्रयाणां गुणानां अधीशः सतु परतंत्रः
कुत एतद्वैलक्षण्यं यत यतः बुध्यवस्थितं बुध्येः तांतो अवस्थां अखंडितया स्वदृष्ट्या विचक्षते यो दृष्टाप
श्यसि द्रष्टेति निरन्प्रत्ययात अतः बुध्यवस्थितम् स्यत्र षष्ठ्यभावः तथाभूत एव त्वं स्थितौ पालने अधिमुखः
पक्षाधिष्ठाता श्रीमहाविष्णुः १६ तमेव ब्रह्मरूपेण नमस्करोति यस्मिन्निति पतंति अकस्मात् उद्वर्तीति
यस्मिन्विरुद्धमतयो ह्यनिशं पतंति विद्याधरो विविधशक्तय आनुपूर्व्यात् तद्ब्रह्म विश्वभवमेकमनंत
माद्यमानंदमात्रमविकारमहं प्रपद्ये १६ सत्याशिषो भगवतः स्तव पादपद्ममाशीस्तथानुभजतः पु
रुषार्थमूर्तेः अप्येवमार्य भगवन् परिपाति दीनान्वाश्रेव वत्सकमनुग्रहकातरोस्मान् १७
मैत्रेय उवाच अथाभिष्टुत एवं वै सत्संकल्पेन धीमता भक्तानुरक्तो भगवान्प्रतिनंद्येदमब्रवीत् १८
विश्वस्य भवः यस्मात् एकं आद्यं अनादि १७ सकामभजनादपि मोक्षं आशासानः आह हे भगवन्
पुरुषार्थः परमानंदः स एव मूर्तिः यस्य तस्य तव पादपद्मं आशिषः राज्यादेः सकाशात् सत्या आशीः पे
रमार्थफलं हि निश्चितं कस्य तेथा तेन कारणेन त्वमेव पुरुषार्थ इत्येवं निष्कामतया अन्वनुभजतः य
द्यप्येवं तथापि हे आर्य स्वामिन् दीनान् सकामानपि अस्मान् भगवान् परिपाति संसारभयात् रक्ष शिवो
त्येव यतः अनुग्रहे हिता चरणे कातरः परवश यथा वाश्राधेनुः वत्सं पाययति वृकादिभ्यो रक्षति च
तद्वत् १८ ॥ श्रीरामः शरणं ममेति परमो मंत्रोयमष्टाक्षरः ॥ श्रीभगवते वासुदेवाय ॥ २९

व्यवसितं संकल्पितं च यत् १९ अयच्छामीत्युक्तं किं तत् इत्यपेक्षायामाह नान्यैरिति सार्धाभ्यां हे भद्र ध्रुव ध्रुवाक्षितिः वासः
यस्मिन् आहितं अर्पितं २० धान्यक्रमणार्थं भ्राम्यमाणानां पशूनां बंधनस्तंभः मेढी तस्यां बलिवर्दसमूहवत् आवांतरक
ल्पवासिनां परस्तादपि स्थास्नु लोकत्रयनाशेपि अनश्वरं धर्माग्न्यादयः नक्षत्ररूपाः वनौकसः सप्तर्षयः यत् प्रदक्षि
णीकृत्य भ्रमंति २१ एतच्च राज्यानंतरं भविष्यतीत्याह प्रस्थित इति तुभ्यं पित्रा दत्त्वा वनं प्रस्थिते भावेक्तः दीर्घगमने कृते
सति रक्षिता रक्षिष्यति २२ त्वया असंकल्पितमपि भद्रं कस्य तव द्रोहात् एवं भविष्यतीत्याह त्वद्भ्रातरीति सार्धरुचिः
श्रीभगवानुवाच वेदाहं ते व्यवसितं हृदि राजन्यबालक तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत १९ नान्यैरधिष्ठितं भद्र
यद्भ्राजिष्णु ध्रुवक्षिति यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितं २० मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनां
ता४ धर्मोग्निः कश्यपः शुक्रो मुनयो मद्वनौकसः चरंति दक्षिणीकृत्य भ्रमंतो यत्सतारकाः २१ प्रस्थिते तु वनं पित्रा दत्त्वा गां
धर्मसंश्रयः षट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेंद्रियः २२ त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः अन्वेषंती
वनं माता दावाग्निं सा प्रवेक्ष्यति २३ इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः भुक्त्वा चेहाशिषः सत्या अंते मां
संस्मरिष्यसि २४ ततो गंतासि मत्स्थानं सर्वलोकनमस्कृतं उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते यतिः २५
मैत्रेय उवाच इत्यर्चितः स भगवानतिदिश्यात्मनः पदं बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः २६ सोपि
संकल्पजं विष्णोः पादसेवोपसादितं प्राप्य संकल्पनिर्वाणं नातिप्रीतोभ्यगात्पुरं २७ विदुर उवाच सुदु
र्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितं लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यतार्थवित् २८
रुत्स्यति २३ इष्ट्वा मां यज्ञः हृदयं प्रियतमः यस्य तां २४ यत स्थानात् २५ आतदिश्य दत्त्वा २६ संकल्पजं मनोरथं
सेवया प्रापितं संकल्पस्य निर्वाणं समाप्तिः परस्तात् २७ मायाविनः सकामस्य यत् सुदुर्लभं हरेः पदं तल्लब्ध्वा एकेनैव
जन्मना लब्ध्वापि स्वं आत्मानं मनः असिद्धार्थं अप्राप्तमनोरथमिव कथं अमन्यत अपुरुषार्थवित् अपि २८ श्रीराम

मिवाह समाधिनेति [illegible] षड्भिः अनेकेभवा अस्मिन् बहुजन्मभ्यः सेनेत्यर्थः प्रणामस्तस्यादिसमये गरुडारूढस्यह
पादच्छायायां स्थितः आत्मानं स्मरन्नाह छायां उपेत्यति हृथश्रितिभेददृष्टिः स न हा कष्टमिति भावः २९ अनात्म्य
उनात्मश्रन्यत्वं अवज्ञा त्वं भवच्छेतुः यत् अंतवत् अयाचयाचितवानस्मि ३० अवज्ञत्वकारणसंभावयतिमतिरिति
श्रद्धिः मदपेक्षया अग्राप्रवद्धिः अतएव असहनशीले नाकनाथ्यवमानं तरस्यादिसस्म मपि नारदवच्चः ३
५
मातुः सपत्न्या वाग्बाणैर्हृदिविद्धस्तु तान्स्मरन् नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान् ३१ ध्रुवउवाच ॥
समाधिनानेकभवेनयत्पदं विदुः सनंदादय ऊर्ध्वरेतसः मासैरहं षड्भिरमुष्य पादयोश्छायामुपेत्यापगतः पृथ
ग्मतिः ३९ अहो बत ममानात्म्यं मंदभाग्यस्य पश्यत भवच्छिदः पादमूलं गत्वा याचे यदंतवत् ३२ मतिर्वि
दूषिता देवैः पतद्भिरसहिष्णुभिः यो नारदवचः सत्यं नाग्रहीषमसत्तमः ३२ दैवीं मायामुपाश्रित्य प्रसुप्त
इवभिन्नदृक् तप्येद्वितीयेप्यसति भ्रातृभ्रातृव्यहृद्रुजा ३३ मयैतत्प्रार्थितं व्यर्थं किं चित्सेव गतायुषि ध्रु
प्रसाद्य जगदात्मानं तपसा दुःप्रसादनं ३४ भवच्छिदमयाचेहं भवं भाग्यविवर्जितः स्वाराज्यं यच्छतो
मौढ्यात्मानो मे भिक्षितो बत ईश्वरात्क्षीणपुण्येन फलीकारानिवाधनः ३५ ६ ६ ॥

नुग्रहीतवानस्मि तस्य मे मतिः विदूषिता ३९ किं च दैवीमिति प्रसुप्तः स्वप्नानिव पश्यन् द्वितीये असत्यपि
भ्राता एव भ्रातव्यः शत्रुरिति दृष्ट्या हृद्रुजा हृदयशोकेन तप्ये नायं अनुभवामि ३२ किं च मया प्रसाद्य तत्प्रार्थितं
तत्व्यर्थं ३३ प्रार्थितमाह भवच्छिदमिति ३४ एतदेव स्वदृष्टांतमाह स्वाराज्यं निजानंदं प्रयच्छतः सकाशा
त्अभिमानः क्षीणपुण्येन मया भिक्षितः क्षीणेन पुण्येन वा दृष्टांत एव संबंधः यथा अधनः ईश्वरात् चक्रव शिवो ३०
र्तिनः फलीकारान् सतुषतंडुलकणान् याचते तद्वत् ३५ ५ ६ ६ ६ ६ ५

एवं निस्पृहत्वं तस्य युक्तमित्याह न तस्य दास्यं विना अन्यं अर्थं आत्मनः नैव वांछति यद्दृच्छयैव लब्धेन मनसः समृद्धिः
येषां ते ३६ प्रस्तुतमाह आकर्ण्येति संपरेत्य मृत्वा आगतं आकर्ण्य न श्रद्दधे तृथा न श्रद्दधे विश्वासं न चकार
३७ इति मत्वा एष्यत्या चिरतः इति देवर्षेः वाक्यं श्रद्दधे ३८ ब्राह्मणादिभिः पर्यस्तः परिवृतः ३९ अस्य राज्ञः
नैवं मुकुंदस्य पदारविंदयो रजोजुषस्तात भवादृशा जनाः वांछंति तद्दास्यमृते तेन्यमात्मनो यदृच्छया लब्ध
मनःसमृद्धयः ३६ आकर्ण्यात्मजमायांतं संपरेत्य यथागतं राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम ३७
श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः वार्ताहर्तुरतिप्रीतो हारं प्रादान्महाधनं ३८ सदश्वं रथमारुह्य कार्त
स्वरपरिच्छदं ब्राह्मणैः कुलवृद्धैश्च पर्यस्तोमात्यबंधुभिः ३९ शंखदुंदुभिनादेन ब्रह्मघोषेण वेणुभिः निश्चक्राम
पुरात्तूर्णमात्मजाभीक्षणोत्सुकः ४० सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्मभूषिते आरुह्य शिबिकां सार्ध
मुत्तमेनाजग्मतुः ४१ तं दृष्ट्वोपवनाभ्याश आयांतं तरसा रथात् अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः ४२
परिरेभेंगजं दोर्भ्यां दीर्घोत्कंठमनाः श्वसन् विष्वक्सेनांघ्रिसंस्पर्शहताशेषाघबंधनं ४३ अथाजिघ्रन्मुहु
र्मूर्ध्नि शीतैर्नयनवारिभिः स्नापयामास तनयं जातोद्दाममनोरथः ४४ अभिवंद्य पितुः पादावाशीर्भिश्चाभि
मंत्रितः ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः ४५ सुरुचिस्तं समुत्थाप्य पादावनतमर्भकं परिष्व
ज्याह जीवेति बाष्पगद्गदया गिरा ४६ यस्य प्रसन्नो भगवान्गुणैर्मैत्र्यादिभिर्हरिः तस्मै नमंति निम्ना आप इव
स्वयं ४७

[illegible] महिष्यौ न थ्येउत्तमं निधाय एकामेव शिबिकां नरवाहनं आरुह्य ४० उपवनस्य अभ्याशे समीपे ४१ विष्व
क्सेनांघ्रिसंस्पर्शेन हतं अशेषं अघबंधनं च यस्य ४२ जातः उद्दामो महान् मनोरथः यस्य ४४ अभिमंत्रितः पितृ
सहतेन कृतभाषणः ४४ ॥४५ सुरुच्याः भीतिः न संभाविते त्याह यस्येति निम्नैति अनुसरंति आपः यथा स्वयमे

निम्नदेशं यथा भवंति ४३

भा॰ च॰
३९

ईहतु दधतु ४७।४८ हेवीरवीरस्कवः ध्रुवमातुः अभिषिच्यमानाभ्यांपयः तदाश्रुस्राव ४९ चिरंनष्टः दर्शनंअप्राप्तः
रक्षिता रक्षिष्यति ५०।५१ एवमितिच्यवहित पित्राधिपालनपराभक्ष्यते ५२ पुरंवर्णयति तत्रतत्रेति चतुर्भिःसंहृतैः
फलमंजरीयुक्तैः पूगानांपोतैबालवृक्षैः तद्विधैः संहृतैः उपस्कृतं प्रतिद्वारंवेत्तरेण्यान्वयः ५३ चूतपल्लवैश्चवासांसि

उत्तमश्च ध्रुवश्चोभौ अन्योन्यंप्रेमविह्वलौ अंसंगसंगादुत्पुलकावस्रौघंमुहुरूहतुः ४७ सुनीतिरस्यजननी प्राणे
भ्योपिप्रियंसुतं उपगुह्यजहावाधिं तदंगस्पर्शनिर्वृता ४८ पयःस्तनाभ्यांसुस्राव नेत्रजैःसलिलैःशिवैः त
दाभिषिच्यमानाभ्यांवीर वीरसुवोमुहुः ४९ तांशशंसुर्जनाराज्ञीं दिष्ट्याते पुत्रआर्तिहा प्रतिलब्धश्चिरं
नष्टोरक्षितामंडलंभुवः ५० अभ्यर्चितस्त्वयानूनं भगवान्प्रणतार्तिहा यदनुध्यायिनोवीरामृत्युंजिग्युः
सुदुर्जयं ५१ लाल्यमानंजनैरेवं ध्रुवंसभ्रातरंनृपः आरोप्यकरिणींहृष्टः स्तूयमानोविशत्पुरं ५२
तत्रतत्रोपसंकॢप्तैर्लसन्मकरतोरणैः संहृतैः कदलीस्तंभैः पूगपोतैश्चतद्विधैः ५३ चूतपल्लववासःस्रङ्
मुक्तादामविलंबिभिः उपस्कृतंप्रतिद्वारमपांकुंभैःसदीपकैः ५४ प्राकारैर्गोपुरागारैः शातकुंभपरि
च्छदैः सर्वतोलंकृतंश्रीमत् विमानशिखरद्युभिः ५५ मृष्टचत्वररथ्याट्टमार्गंचंदनचर्चितं लाजा
क्षतैःपुष्पफलैस्तंडुलैर्बलिभिर्युतं ५६ ध्रुवायपथिदृष्टाय तत्रतत्रपुरस्त्रियः सिद्धार्थाक्षत
दध्यंबु दूर्वापुष्पफलानिच ५७ उपजह्रुःप्रयुंजाना वात्सल्यादाशिषःसतीः शृण्वंस्तद्वल्गुगीतानि प्रा
विशद्भुवनंविभुः ५८ महामणिव्रातमये सतस्मिन्भवनोत्तमे लालितोनितरांपित्रान्यवसद्दिविदेववत् ५९ शिवो

वयजश्च मुक्तादामानिच तेषांविशिष्टंलंबनं अस्तियेषु कुंभेषु ५४ गोपुरैः अगारैश्च शातकुंभाः परिच्छदाः परिकराः येषुवि ३९
मानानामिवशिखरैः द्युतिःयेषुतैः ५५ चत्वरं अंगणं रथ्या महामार्गः अट्टः उच्चस्योपरिनिर्मितामार्गः अतिशयेनमृष्टाः वीर
संमार्जिताः चत्वरादयः यस्मिन् ५६ अक्षताः यवाः उपजह्रुः व्यकिरयन् सतीः सत्यः ५७ ।।५८ छ ।।छ

यत्रभवने कुमुत् कुमुदं पुष्पादिवस्यःवाप्यः ६० उद्दिवयसं प्राप्तयौवनं अनुरक्ताः प्रजाःयस्मिन् ६१ प्रवयवसंस्तद्धं ६२ ।।
चतुर्थेनवमेः दशमेभ्रातृहतरणायक्षाणामकरोद्वधं एकएवाल्पकांगवलेयस्यविक्रममुच्यते योषितांरत्नमिवअतिमनोहरं
कन्यारत्नंचतिवो २ यक्षेणअद्रौहिमवतिहतः अजीवितिपाठे युक्तेअस्यगतिंगता मृतेत्यर्थः ३ कोपमर्षशुचाद्दह्यतेन

पयःफेननिभाःशय्या दांताःरुक्मपरिच्छदाः आसनानिमहार्हाणि यत्ररौक्मा उपस्कराः ६० यत्रस्फाटिककुड्येषु
महामारकतेषुच मणिप्रदीपाआभांति ललनारत्नसंयुताः ६१ उद्यानानिचरम्याणि विचित्रैरमरद्रुमैः कूजद्वि
हंगमिथुनैर्गायन्मत्तमधुव्रतैः ६२ वाप्योवैडूर्यसोपानाः पद्मोत्पलकुमुद्वतीः हंसकारंडवकुलैर्जुष्टाश्चक्राह्वसार
सैः ६३ वीक्ष्योढवयसंपुत्रं प्रकृतीनांचसंमतं अनुरक्तप्रजंराजा ध्रुवंचक्रेभुवःपतिं ६४ आत्मानंचप्रवयस
माकलय्यविशांपतिः वनंविरक्तःप्रातिष्ठद्विमृशन्नात्मनोगतिं ६५ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधे
ध्रुवचरितेनवमोध्यायः ९ ।।छ मैत्रेयउवाच प्रजापतेर्दुहितरं शिशुमारस्यवैध्रुवः उपयेमेभ्रमिंनाम
तत्सुतौकल्पवत्सरौ १ इलायामपिभार्यायां वायोःपुत्र्यांमहाबलः पुत्रमुत्कलनामानं योषिद्रत्नमजीज
नत् २ उत्तमस्त्वकृतोद्वाहो मृगयायांबलीयसा हतःपुण्यजनेनाद्रौ तन्मातास्यगतिंगता ३ ध्रुवोभ्रातृव
धंश्रुत्वा कोपामर्षशुचार्पितः जैत्रंस्यंदनमास्थाय गतःपुण्यजनालयं ४ गत्वोदीचींदिशंराजा रुद्रानुचरसेवि
तां ददर्शहिमवद्द्रोण्यांपुरींगुह्यकसंकुलां ५ दध्मौशंखंबृहद्बाहुः खंदिशश्चानुनादयन् येनोद्विग्नदृशः
क्षत्तरुपदेव्योत्रसन्भृशं ६

अर्पितःव्याप्तः जैत्रंजयहेतुं पुण्यजनालयं अलकां ४ रुद्रानुचराः भूतादयः ५ दध्मौवादितवान् येनशंख
वादेन हेक्षत्तः उपदेव्यः यक्षस्त्रियः ६ ।७ ।। छ ।। छ ।। छ ।। छ ।। छ ।। छ ।।छ

भा० चं० ३२ एकैकं त्रिभिः त्रिभिः इत्येवं सर्वान् त्रयोदश अयुतानि पश्चात् युगपत् अहनत् जघान ८ ते पि तत् कर्म असहमानाः अमुं
अविध्यत् द्विगुणं यथा भवति षड्भिः षड्भिः प्रति कर्तुं इच्छतः १० चित्रवाजैः चित्रपक्षैः ११ ॥ १२ धारासंपातेन छन्नः

ततोनिष्क्रम्यबलिनउपदेवमहाभटाः असहंतस्तन्निनादमभिपेतुरुदायुधाः ७ सतानापततोवीरउग्रधन्वा
महारथः एकैकंयुगपत्सर्वानहन्बाणैस्त्रिभिस्त्रिभिः ८ तेवैललाटलग्नैस्तैरिषुभिः सर्व एव हि मत्वानि
रस्तमात्मानमाशंसन् कर्मतस्यतत् ॥ ९ ॥ तेपिचामुममृष्यंतः पादस्पर्शमिवोरगाः शरैरविध्यन्युगपत्
द्विगुणंप्रचिकीर्षवः ॥ १० ॥ ततः परिघनिस्त्रिंशप्रासशूलपरश्वधैः शक्त्यृष्टिभिर्भुशुंडीभिश्चित्रवाजैः शरैरपि ११
अभ्यवर्षन्प्रकुपिताः सरथंसहसारथिं इच्छंतस्तत्प्रतीकर्तुमयुतानित्रयोदश । १२ औत्तानपादिः सतदा
शस्त्रवर्षेणभूरिणा ॥ नउपादृश्यतछन्नआसारेणयथागिरिः ॥ १३ ॥ हाहाकारस्तदैवासीत्सिद्धानांदिविपश्य
तां हतोयंमानवः सूर्योमग्नः पुण्यजनार्णवे ॥ १४ ॥ नदत्सुयातुधानेषुजयकाशिष्वथोमृधे उदतिष्ठद्र
थस्तस्य नीहारादिवभास्करः ॥ १५ ॥ धनुर्विस्फूर्जयन्दिव्यंद्विषतांखेदमुद्वहन् ॥ शस्त्रौघंव्यधमद्बा
णैर्घनानीकमिवानिलः ॥ १६ ॥ तस्यतेचापनिर्मुक्ताभित्त्वावर्माणिरक्षसां ॥ कायानाविविशुस्तिग्मा
गिरीनशनयोयथा ॥ १७ ॥ भल्लैः संछिद्यमानानांशिरोभिश्चारुकुंडलैः ॥ ऊरुभिर्हेमतालाभैर्दोर्भिर्वलय
वल्गुभिः ॥ १८ ॥

गिरिरिवअदृश्यत १३ सूर्यतुल्यः १४ यातुधानेषु राक्षसेषु जयकाशिषु जितंजितमिति जयप्रकाशकेषु सत्सु शिवो ३२
१५ व्यधमत् संचूर्णयामास १६ वर्माणि कवचानि १७ शिरःप्रमुखैः आस्तृताः प्रकीर्णाः रेजुः इतिद्वयेनअन्वयः १८।१९

प्रायः बाहुल्येन विवृक्णाः सच्छिन्नाः अवयवाः येषां २० आततायिनं शस्त्रपाणिनं इति ब्रुवन् इत्यत्रापि नमायिनमित्यादि
रनुषंगः २१ चित्ररथः ध्रुवः यत्तः यत्नवान् प्रतियोगः पुनरुद्योगः तस्मात् शंकितः नभस्वेन वायुनोर्हताः २२ विस्फुरंत्यः
तडितः यस्मिन् तेन त्रासयतः स्तनयित्नवः अशनयः यस्मिन् २३ ववृषुः निपेतुरित्यर्थः न सज्जति शरीरेमिति

हारकेयूरकटकैरुष्णीषैश्चमहाधनैः आस्तृतास्तारणभुवोरेजुर्वीरमनोहराः १९ हतावशिष्टाइतरेरणाजिरा
द्रक्षोगणाः क्षत्रियवर्यसायकैः प्रायोविवृक्णावयवाविदुद्रुवुर्मृगेंद्रविक्रीडितयूथपाइव २० अपश्यमानः
सतदाततायिनंमहामृधेकंचनमानवोत्तमः पुरींदिदृक्षन्नपिनाविशद्द्विषांनमायिनांवेदचिकीर्षितंजनः २१
इतिब्रुवंश्चित्ररथः ससारथिंयत्तः परेषांप्रतियोगशंकितः शुश्रावशब्दंजलधेरिवेरितंनभस्वतोदिक्षुरजो
न्वदृश्यत २२ क्षणेनाच्छादितंव्योमघनानीकेनसर्वतः विस्फुरत्तडितादिक्षुत्रासयत्स्तनयित्नुना २३ ववृ
षूरुधिरौघासृक्पूयविण्मूत्रमेदसः निपेतुर्गगनादस्यकबंधान्यग्रतोनघ २४ अभ्यधावन्गजामत्ताः
सिंहव्याघ्राश्चयूथशः समुद्रऊर्मिभिर्भीमः प्लावयन्सर्वतोभुवं २५ आससादमहाह्रादः कल्पांतइवभीषणः
अहयोशनिनिश्वासावमंतोग्निंरुषाक्षिभिः २६ ततः खेदृश्यतगिरिर्निपेतुः सर्वतोदिशं । गदापरिघ
निस्त्रिंशमुसलाः साश्मवर्षिणः २७ एवंविधान्यनेकानित्रासनान्यमनस्विनां ससृजुस्तिग्मगतयआसु
र्यामाययासुराः २८ ध्रुवेप्रयुक्तामसुरैस्तांमायामतिदुस्तरां निशाम्यतस्यमुनयः शमाशंसन्समा
गताः २९

असृक् रुधिरं श्लेष्मादिमेदसः पुंस्त्वमार्षं मेदांसि अस्य पुरः अग्रतः निपेतुः २४ साश्मवर्षिणः अश्मसहितंतद्वर्षंत
वर्षंतः २५ अशनिवत् निश्वासः येषां २६ त्रासनानि भयंकराणि तिग्माक्रूरगतिः प्रवृत्तिः येषां २८ असुरैरा
क्षेपादिशब्दैः अदूरांतरत्वेन पश्चात् एव उच्यते तस्य कल्याणं आशंसन् प्रार्थितवंतः २९ ॥ ॥

भा० च०
३२

तवविपक्षान् शत्रून् नाशयितुं अद्धा साक्षात् अंजसा सुखेनैव त्वं समर्थः तरति ३० इति चतुर्थे दशमः एकादशे तु यक्षाणां
क्षयं दृष्ट्वा मनुः स्वयं आगत्य वारयामास ध्रुवं तत्रोपदेशतः एवं वदतां वचनं उपदेशमिव तं निशम्य उपस्पृश्य पतन्नारायणनि
र्मितं नारायणास्त्रं तत्र संदधे १ क्लेशाः रागादयः यथा २ किंच तस्य आर्षास्त्रं ऋषेः नारायणात् उद्भूतं अस्त्रं प्रयुंजतः संदधतः
सतः सुवर्णमयाः पुंखाः मूलप्रांताः येषां कलहंसानां वासांसि पक्षाः येषां ते शराः विनिस्सृताः इति द्रष्टव्यं उपरिष्टात् शिलीमुखग्रहणात् ३

मुनय ऊचुः औत्तानपादे भगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववनतार्तिहरो विपक्षान् यन्नामधेयमभिधाय निशम्य
चाद्धा लोकोंऽजसा तरति दुस्तरमंग मृत्युं ३० इति श्रीभागवते महापुराणे चतुर्थस्कंधे ध्रुवचरिते दशमोध्यायः १०
मैत्रेय उवाच निशम्य गदतामेवमृषीणां धनुषि ध्रुवः संदधेस्त्रमुपस्पृश्य यन्नारायणनिर्मितं १ संधीयमान ए
तस्मिन्मायागुह्यकनिर्मिताः क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा २ तस्यार्षास्त्रं धनुषि प्रयुंजतः सुवर्णपुं
खाः कलहंसवाससः विनिस्सृता आविविशुर्द्विषद्बलं वनं यथाभीमरवाः शिखंडिनः ३ तैस्तिग्मधारैः प्रधने
शिलीमुखैरितस्ततः पुण्यजना उपाद्रुताः तमभ्यधावन्कुपिता उदायुधाः सुपर्णमुन्नद्धफणा इवाहयः
४ स तान्पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान् निनाय लोकं परमर्कमंडलं व्रजंति निर्भिद्य
यमूर्ध्वरेतसः ५ तान्हन्यमानानभिवीक्ष्य गुह्यकाननागसश्चित्ररथेन भूरिशः औत्तानपादिं कृपया पि
तामहो मनुर्जगादोपगतः सहर्षिभिः ६ मनुरुवाच अलं वत्सातिरोषेण तमोद्वारेण पाप्मना येन पुण्य
जनानेतानवधीस्त्वमनागसः ७

प्रधने युद्धे उन्नद्धाः उच्छ्रिताः फणाः येषां ते ४ पृषत्कैः बाणैः निकृत्ताः बाह्वादयः येषां तान् परलोकं निनाय कु (शिनो)
थंभूतं ऊर्ध्वरेतसः संन्यासिनः अर्कमंडलं निर्भिद्य यं प्रव्रजंति तान् ५।६ अनागसः निरपराधान् तम (३३)
सः नरकस्य द्वारेण येन रोषेण ७ ननु मद्भ्रातृहंतारः ॥ ॥ ॥ ॥ ॥

कथं अकृतैनसः अत आह ८ नन्विति सत्यपराधेनैतत् उचितं भवतीत्याह ९ नायमिति पराग्दृश्यपराग्रूपं देहं
आत्मानं गृहीत्वा पशवः यथा देहाभिमानात् अन्योन्यं घ्नंति तथा भूतानां वैशसं हिंसेति यत् १० त्वं बाल्ये साधुः सन्
इदानीं कथं अन्यथा कृतवानित्याह सर्वभूतात्मभावेनेति द्वाभ्यां ११ अनुध्यातः हृदि स्थितः नत्वसौ हरिदासानामपि साधु
त्वेन संमतः १२ सतां व्रतमेवाह महत्स्विति तितिक्षया नीचेषु करुणया समेषु मैत्र्या अखिलेषु जंतुषु समत्वेन च १३ ततः
कृतार्थो भवतीत्याह संप्रसन्न इति गुणैः विमुक्तः तत्कार्येण जीवेन लिंगशरीरेण निर्मुक्तः सन् निर्वाणं सुखात्मकं

नास्मत्कुलोचितं तात कर्मैतत्सद्विगर्हितं वधो यदुपदेवानामारब्धस्तेऽकृतैनसां ८ नन्वेकस्यापराधेन प्रसं
गाद्बहवो हताः भ्रातुर्वधाभितप्तेन त्वयांग भ्रातृवत्सल ९ नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनां यदात्मा
नं पराग्गृह्य पशुवद्भूतवैशसं १० सर्वभूतात्मभावेन भूतावासं हरिं भवान् आराध्याप दुराराध्यं विष्णोस्तत्प
रमं पदं ११ स त्वं हरेरनुध्यातस्तत्पुंसामपि संमतः कथं त्ववद्यं कृतवाननुशिक्षन्सतां व्रतं १२ ति
तिक्षया करुणया मैत्र्या चाखिलजंतुषु समत्वेन च सर्वात्मा भगवान्संप्रसीदति १३ संप्रसन्ने भगव
ति पुरुषः प्राकृतैर्गुणैः विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति १४ भूतैः पंचभिरारब्धैर्योषित्पुरु
ष एव हि तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह १५ एवं प्रवर्तते सर्गः स्थितिः संयम एव च गुणव्य
तिकराद्राजन्मायया परमात्मनः १६

ब्रह्म प्राप्नोति १४ भ्रातृहंतृत्वमंगीकृत्योक्तं इदानीं तु न आत्मनः भ्रातृपुत्रादिसंबंधः न च अन्योन्यं हंतृत्वादिकं इत्याह
द्वाभ्यां भूतैः पंचभिः आरब्धैः देहाद्याकारपरिणतैः योषित्पुरुष इति प्रसिद्धिः तयोः व्यवायात् मैथुनात् संभूतिः अ
न्ययोः योषित्पुरुषयोः इह संसारो भवति १५ एवं सर्गः प्रवर्तते एवं पालककारणपरिणतैः भूतैः एवं स्थितिः हंतृदेहा
कारपरिणतैः संयमः स च परमात्मनः मायया गुणानां व्यतिकरात् न तु स्वतः १६ ॥ ॥ ॥ ॥

भा०चं०
३४

ननुदेहानांजडानां गुणानांवा कथंसर्गादिहेतुत्वं तत्राह निमित्तमात्रं पुरुषर्षभः ईश्वरः यत्रयस्मिन्निमित्तेसतिकार्यकारणा
त्मकंविश्वंभ्रमति परिवर्तते यथा अयस्कांतनिमित्तेसतिलोहपरिवर्ततेतद्वत् १७ सचेत्निमित्तं तर्हितस्यअविशेषात् युगपत्
एवंसर्गादित्रयंभवेत् अतआह सखल्विति कालशक्त्या क्रमेणगुणानांप्रवाहः क्षोभः तेनविभक्तं स्रष्ट्रादिविषयंवीर्यंशक्तिः
यस्य ननुकालोपिगुणान् युगपदेवक्षोभयतु चेष्टाकालशक्तिः दुर्विभाव्या ओर्वेत्या १८ ननुपित्रादिः स्वजनिनिहंताच चौरादि
नत्वीश्वरः तत्राह सइति जनेनपित्रादिनाजनंपुत्रादिंजनयन् आदिकृत् अंतकं चौरादिकं तन्मृत्युहेतुनामारयन् अंतकरः स्वयं

निमित्तमात्रंतत्रासीन्निर्गुणः पुरुषर्षभः व्यक्ताव्यक्तमिदंविश्वंयत्रभ्रमतिलोहवत् १७ सखल्विदंभगवान्का
लशक्त्यागुणप्रवाहेणविभक्तवीर्यः करोत्यकर्तैवनिहंत्यहंताचेष्टाविभूम्नः खलुदुर्विभाव्या १८ सोनंतोंत
करः कालोऽनादिरादिकृदव्ययः जनंजनेनजनयन्मारयन्मृत्युनांतकं १९ नवैस्वपक्षोस्यविपक्षएव
वापरस्यमृत्योर्विशतः समंप्रजाः तंधावमानमनुधावंत्यनीशायथारजांस्यनिलंभूतसंघाः २०
आयुषोपचयंजंतोस्तथैवापचयंविभुः उभाभ्यांरहितः स्वस्थोदुःस्थस्यविदधात्यसौ २१ ॥छ॥

तु अनंतः अनादिश्च अव्ययः अक्षीणशक्तिः अयंभावः पित्रादयः अन्यतउत्पत्त्यादिमंतः नस्वातंत्र्येणकारणं।
किंतुईश्वरएवतन्नियंता सर्वकारणमिति १९ नचएवंकुर्वतोपिवैषम्यप्रसक्तिः पक्षपाताभावात् इत्याह द्वाभ्यां
नवाइति मृत्युरूपस्य समंयथाभवतितथाप्रजाः कर्मभूताः विशतः तस्यसाम्येपिभूतलेसुफलवैषम्यंतत्कर्म
तथात्वादिति दृष्टांतमाह तंधावंतं अनुअनीशाः कर्माधीनाः भूतसंघाः धावंति अनिलंधावंतं अनुरजांसीवतत्र शिवो
यथारजसांतमः प्रकाशजलाग्न्यादिप्रवेशेपिन अनिलस्यवैषम्यं एवंईश्वरस्यापीतिभावः २० अपचयंकालम् ३४
त्योपरिक्षीयते अपचयमशकादौ उपचयंदेवादौ स्वस्थत्वात् उपचयापचयाभ्यांरहितः असौविभुः दुःखस्यकर्म
योनश्चविदधाति २१

एवंभूतश्चेदीश्वरः सर्ववादिसंमतः विवादस्तुनाममात्रइत्याह केचिदिति पुंसः कामंवात्स्यायनादयः श्रुतिश्चकामोका
र्षीत् कामः कर्ताकामः कारयिता इत्यादि २२ ननुकर्मादीनांजडत्वादीनां स्वरूपतोपिभिन्नत्वात् कथंएकमस्य तत्राह अव्य
क्तस्य अतएव अप्रमेयस्य तथापिसत्त्वहेतुः नानाशक्तीनांउदयः यस्मादिति चिकीर्षितमेवतावत् कोपिनवेद अथस्वस्य
संभवः यस्मात् तंईश्वरंकः वेद नकोपि अद्धेतिपाठे नसाक्षात् अतः तज्ज्ञानाभावात् विशेषांशेविवादइत्यर्थः तथा
चश्रुतिः कोअद्धावेदकइहप्रवोचत्कुतआजाताकुतइयंविसृष्टिः अर्वाग्देवाअस्यविसर्जनेनाथाकोवेदयतआबभूवइति २३

केचित्कर्मवदंत्येनंस्वभावमपरेनृप एकेकालंपरेदैवंपुंसःकाममुतापरे २२ अव्यक्तस्याप्रमेयस्यनानाशक्त्यु
दयस्यच नवैचिकीर्षितंतातकोवेदाथस्वसंभवं २३ नचैतेपुत्रकभ्रातुर्हंतारोधनदानुगाः विसर्गादानयो
स्तातपुंसोदैवंहिकारणं २४ सएवविश्वंसृजतिसएवावतिहंतिच अथापिह्यनहंकारान्नाज्यतेगुणकर्मभिः
२५ एषभूतानिभूतात्माभूतेशोभूतभावनः स्वशक्त्यामाययायुक्तः सृजत्यवतिहंतिच २६ ~तमेवमृत्युम
मृतंतातदैवंसर्वात्मनोपेहिजगत्परायणं यस्मैबलिंविश्वसृजोहरंतिगावोयथावैनसिदामयंत्रिताः २७
यः पंचवर्षोजननींत्वंविहायमातुःसपत्न्यावचसाभिन्नमर्मा वनंगतस्तपसाप्रत्यगक्षमाराध्यलेभेमूर्ध्निप
दंत्रिलोक्याः २८

ईश्वरवादस्यप्रकृतोपयोगमाह नचएतेभ्रातृहंतारः उत्क्रमेचहेतुं अनुवदति विसर्गादानयोः मृत्युजन्मनोः यद्वाविसर्गः सृ
ष्टिः आदानंसंहारः दैवंईश्वरएवकारणं २४ तथापिनिर्लेपतामाह सएवेति २५ अनहंकारत्वेहेतुमाह एषइति २६
सत्यंईश्वरएवकर्ता तथापिअहंकारादि मयानसक्तुंशक्नोमीतिचेत् तत्राह तमेवेतिचतुर्भिः मृत्युंअभक्तानांतुअमृ
तंउपेहिशरणंगच्छ तमेवत्वंस्ववधारणेहेतुः यस्मैनासिनासिकायांदामभिःबद्धाः गावइव विश्वसृजोपिनामभिर्यं
त्रिताः बलिंहरंति सत्कारितंकर्मकुर्वंतीत्यर्थः २७ तदाराधनंच तवसुकरंएकमेवेत्याह यः पंचवर्षः सत्त्वंयंआराध्य
त्रिलोक्याः मूर्ध्निपदंस्थानंलेभेलब्धवानसि इदानींतमेवआन्विच्छ अवलोकयपुत्ररेणान्वयः प्रत्यंचिअक्षाणियस्मिन्क्रियाविशेषणं २८

हरिध्यायंतं प्रत्याह अंगध्रुव मुक्तविरोधे आत्मनि मनसि स्यपाश्रितं अवस्थितं आत्मदृक् प्रत्यग्दृष्टिः सन् अयंभे
भा॰ च॰ दः यस्मिन्नतत इदं भेदं असदेव विश्वं यस्मिन्प्रतीयते तं २९ तदन्वेषणफलमाह त्वं तदा अन्वेषणकाल एव ३०
३५ उपदेशसारमाह संयच्छ ते द्वाभ्यां प्रतीपं प्रातिकूल्यं अगदेन ओषधेन यथा आमयं रोगं नियच्छति ३१ ॥

तमेवमंगात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरं आत्मानमन्विच्छ विमुक्तमात्मदृग्यस्मिन्नि
दं भेदमसत्प्रतीयते २९ त्वं प्रत्यगात्मनि तदा भगवत्यनंत आनंदमात्र उपपन्नसमस्तशक्तौ भक्तिं वि
धाय परमां शनकैरविद्याग्रंथिं विभेत्स्यसि ममाहमिति प्ररूढं ३० संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परं ॥
श्रुतेन भूयसा राजन्नगदेन यथामयं ३१ येनोपसृष्टात्पुरुषाल्लोक उद्विजते भृशं न बुधस्तद्वशं गच्छे
दिच्छन्नभयमात्मनः ३२ हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतं यज्जघन्वान्पुण्यजनान्भ्रातृघ्नानित्यम
र्षितः ३३ तं प्रसादय वत्साशु सन्नत्या प्रश्रयोक्तिभिः न यावन्महतां तेजः कुलं नोभिभविष्यति ३४
एवं स्वायंभुवः पौत्रमनुशास्य मनुर्ध्रुवं तेनाभिवंदितः साकमृषिभिः स्वपुरं ययौ ३५ इति श्रीभागव
ते महापुराणे चतुर्थस्कंधे एकादशोध्यायः ११ मैत्रेय उवाच ध्रुवं निवृत्तं प्रतिबुध्य वैशसादपेत
मन्युं भगवान्धनेश्वरः तत्रागतश्चारणयक्षकिन्नरैः संस्तूयमानोभ्यवदत्कृतांजलिः १ ॥

येन रोषेण उपसृष्टात् व्याप्तात् ३२ अन्यच्च त्वया कार्यमित्याह हेलनमिति द्वाभ्यां यत् यतः जघन्वान् घाति शिवो
तवान् ३३ ॥३४॥३५॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकादशोध्यायः ११ द्वादशे धनदेना ३५
भिनंदितः पुरमागतः यशोरिक्षाहरेः स्थानमारुरोहेति कीर्त्यते वैशसात् वधात् निवृत्तं ज्ञात्वा १ ॥

क्षत्रियदायादः क्षत्रियपुत्रः त्यक्तवानसि २ न च वैरस्य कारणमस्तीत्याह न भवानिति अप्ययभावयोः मृत्युजन्मनोः ३
कथं तर्हि अहं हंते त्यादिबुद्धिः तत्राह अहं त्वमिति आभाति प्रकाशते जाय तदस्यार्थः अतथ्यानात् देहादिसंधानात्
यथा धियाबंधः विपर्ययः दुःखादि ४ तत् तस्मात् गच्छ गत्वा च भगवंतं जहे सुत्तरेणान्वयः सर्वभूतात्मकेः विग्रहः

धनद उवाच भोभोः क्षत्रियदायाद परितुष्टोस्मि तेनघ यस्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः २ नभवानवधीद्यक्षान्
न यक्षा भ्रातरं तव काल एव हि भूतानां प्रभुरप्ययभावयोः ३ अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि स्वाप्नीवाभा
त्यतद्ध्यानाद्यया बंधविपर्ययौ ४ तद्गच्छ ध्रुव भद्रं ते भगवंतमधोक्षजं सर्वभूतात्मभावेन सर्वभूतात्मविग्रहं ५ भजस्व
भजनीयांघ्रिमभवाय भवच्छिदं युक्तं विरहितं शक्त्या गुणमय्यात्ममायया ६ वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौ
त्तानपदेविशंकितः वरं वरार्होंबुजनाभपादयोरनंतरं त्वां वयमंग शुश्रुम ७ मैत्रेय उवाच स राजराजेन वराय चो
दितो ध्रुवो महाभागवतो महामतिः हरौ स वव्रेऽचलितां स्मृतिं यया तरत्ययत्नेन दुरत्ययं तमः ८ तस्य प्रीतेन मनसा तां ३०
दत्त्वैडविडस्ततः पश्यतोंतर्दधे सोपि स्वपुरं प्रत्यपद्यत ९ अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षिणैः द्रव्यक्रियादेवता
नां कर्म साध्यफलप्रदं १० सर्वात्मन्यच्युते सर्वे तीव्रौघां भक्तिमुद्वहन् ददर्शात्मनि भूतेषु तमेवावस्थितं विभुं ११
तमेवं शीलसंपन्नं ब्रह्मण्यं दीनवत्सलं गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः १२ षट्त्रिंशद्वर्षसाहस्रं श
शास क्षितिमंडलं भोगैः पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयं १३

पस्य ५ ॥६॥ कामं असंकोचेन अविशंकितः अनंतरं आत्मनिकटं ७ सः ध्रुवः वराय चोदितः स्वस्य अनुवादरूपं ध्रुवस्य
अतः स वव्रे इत्यपौनरुक्त्यं ८ ॥९॥ द्रव्यक्रियादेवतानां कर्मसाध्यफलरूपं कर्मफलप्रदं चेत्यर्थः १० सर्वस्य आत्मनि
असर्वे सर्वोपाधिवर्जिते ११ ॥१२॥ अभोगैः यज्ञाद्यनुष्ठानैः १३ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७

तं कालं त्रिवर्गसाधकं नीत्वा अधिकलामिनि संयतानि इंद्रियाणि यस्य १४
भा० चं०
३६
बहवः सवायागाः संवत्सरा वा यस्मिन् इंद्रियाणीति ततोऽयं विरचितं चरितं मन्यमानः अथ अनिधास्पृष्टैः हृष्टान्तयति अविरचितानि १५ आत्मा धार
दृष्टदेहादि भगवन्मायया आत्मनि स्वास्मिन् चरितं मन्यमानः अथ अनिषास्ति विशालां बदरिकाश्रमं १६ तत्र तत्कृतो अष्टा
देहः आत्मादि मायिकमपि पुनः कालेन उपसृष्टं इति निस आकलय्य आविश्य विशालां बदरिकाश्रमं १६ तत्र तत्कृतो अष्टा
गयोगमाह तस्यां शिवं वा उदकं विगाह्य प्राविश्य इति स्नानादिनियमाः उक्ताः विशुद्धकरणः इति शमादयः यमाः आस
एवं बहु सर्वं कालं महात्माविक्लेंद्रियः त्रिवर्गोपयिकं नीत्वा पुत्रायादान्नृपासनं १४ मन्यमान इदं विश्वं
मायारचितमात्मनि अविद्यारचितस्वप्नगंधर्वनगरोपमं १५ आत्मास्यपत्यस्फूर्द्रोबलमस्यकोशं मंतपुरां
परिविहार भुवश्च रम्याः भूमंडलं जलधिमेखलमाकलय्य कालोपसृष्टमिति सप्रययौ विशालां १६ तस्यां
विशुद्धकरणः शिवबार्विगाह्य बध्वासनं जितमरुन्मनसाहृतास्सः स्थूले दधार भगवत्प्रतिरूपएतत् ध्या
यंस्तदव्यवहितो व्यसृजत्समाधौ १७ भक्तिं हरौ भगवति प्रवहन्नजस्रमानंदबाष्पकलया मुहुरर्द्यमानः
विक्लिद्यमानहृदयः पुलकाचितांगो नात्मानमस्मरदसाविति मुक्तलिंगः १८
नादीनि स्फुटमेव उक्तानि जितः मरुत् प्राणः येन आहृतानि अक्षीणि येन भगवतः प्रतिनिधिभूते स्थूले विराड्रूपे
तत्र मनः दधार धारयन् अव्यवहितः ध्यातृध्येयभेदशून्यः सन् समाधौ स्थितः ततः स्थूलं व्यसृजत् १७ एवं अ शिवो
जस्रं निरंतरं भक्तिं प्रकर्षेण वहन् असौ ध्रुवः अहमिति आत्मानं न सस्मार यतः लिंगं गतः शरीराभिमानः ३६
तत्र हेतवः आनंदबाष्पस्य कलया बिंदुप्रवाहेण अभिभूयमानः विक्लिद्यमानं द्रवत् हृदयं यस्य पुलकैः व्याप्तांगः
अनु अनंतरं देवप्रवादहशो इत्यनुषंगः १९

१९ गदां अवष्टभ्य स्थितौ किरीटादिभिः सहितौ चारुणी कुंडले ययोः २० उत्तमगायः पुण्यश्लोकः तस्य किंकरौ विज्ञाय मधु
द्विषः पार्षदप्रधानौ विनिहितौ साध्वसेन संभ्रमेण विस्मृतपूजाक्रमः केवलं तस्य नामानि गृणन् नाम २१ ॥२२ स्कंभ इति
इति शरीरस्येव विष्णुपदारोहाभिप्रायं अतीत्य पन् तौ दिव्यान् २३ आवां तस्य पार्षदौ २४ सुदुर्जयत्वे हेतुः सूरयः
स ददर्श विमानाग्र्यं नभसोवतरद्ध्रुवः विभ्राजयद्दशदिशो राकापतिमिवोदितं १९ तत्रानु देवप्रवरौ चतु
र्भुजौ श्यामौ किशोरावरुणांबुजेक्षणौ स्थितावबष्टभ्य गदां सुवाससौ किरीटहारांगदचारुकुंडलौ २०
विज्ञाय तावुत्तमगायकिंकरौ अभ्युत्थितः साध्वसविस्मृतक्रमः ननाम नामानि गृणन्मधुद्विषः पार्षत्प्रधाना
विति संहतांजलिः २१ तं कृष्णपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्रयनम्रकंधरं सुनंदनंदावुपसृत्य सस्मि
तं प्रत्यूचतुः पुष्करनाभसंमतौ २२ भो भो राजन् सुभद्रं ते वाचं नोवहितः शृणु यः पंचवर्षस्तपसा भवान्देव
मतीतृपत् २३ तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिणः पार्षदाविह संप्राप्तौ नेतुं त्वां भगवत्पदं २४
दु० सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य विचक्षते परं आतिष्ठ तच्चंद्रदिवाकरादयो ग्रहर्क्षतारोः परियं
ति दक्षिणं २५ अनास्थितं ते पितृभिरन्यैरप्यंग कर्हिचित् आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदं २६
एतद्विमानप्रवरमुत्तमश्लोकमौलिना उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि २७ मैत्रेय उवाच निश
म्य वैकुंठनियोज्यमुख्ययोर्मधुच्युतां वाचमुरुक्रमप्रियः कृताभिषेकः कृतनित्यमंगलो मुनीन्प्रणम्याशि
षमभ्यवादयत् २८
स्थिताः
सर्वैर्पियोपि यत् अप्राप्य केवलं अधः पश्यंति यत् चंद्रादयः प्रदक्षिणं यथा भवति एवं परिक्रामंति २५ तत् आ
तिष्ठ आतितिष्ठ २६ आयुष्मन्निति अपि सशरीरः यानोपि प्राप्य मेव मधुच्युतवत् स्वत्व ते इति मधुच्युत् तौ पोतां तरे मधु
च्युतं यस्य नाम इति तत्स्यापि नौ प्रत्यर्थः कृतनित्यकर्म मंगले चयेन अभ्यवादमत् वाचयामास २८

तदेवरूपंविभ्रत सः तवद्दूयेषरेद्धत २९।३०॥दीनां हित्वा अगं दुर्गमं त्रिविष्टपं यास्यामीत्यन्वयस्मरन् ३१ व्यवसितं अ
तदेवरूपं विभ्रत सः तवद्दूयेषरेद्धत २९।३०॥हित्वा अगं दुर्गमं त्रिविष्टपं यास्यामीत्यन्वयस्मरन् ३१ व्यवसितं अ
भा० चं० ३७ भिप्रायं व्यवसीयित्वात्वा ३२॥३३ देवयानेन देवमार्गेण विमानेन नीतिवामुनीन् सप्तर्षीन् अपितत: परस्तात् यतवि
लो: परमंपदं ततअभ्यगात् ३४ यत्नुभ्राजमानं अनु यस्यरुचा लोका: विभ्राजंते ये अननुग्रहा: निष्कृपा: तेयत

परीत्यार्भ्यर्च्यधिष्ण्याग्र्यं पार्षदावभिवंद्य च इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयं २९ तदोत्तानपादस्य पुत्रो ददर्शांतकमागतम् मृत्योर्मूर्ध्नि पदं दत्त्वा आरुरोहाद्भुतं गृहम्
परीत्यार्भ्यर्च्यधिष्ण्याग्र्यंपार्षदावभिवंद्य च इयेषतदधिष्ठातुं बिभ्रद्रूपं हिरण्मयं २९ तदाडुंदुभयोनेदुर्मृदंगपण
वादय: गंधर्वमुख्या: प्रजगु: पेतु: कुसुमवृष्टय: ३० सचस्वर्लोकमारोक्ष्यन् सुनीतिं जननीं ध्रुव: अन्वस्म
रदगं हित्वा दीनां यास्ये त्रिविष्टपं ३१ इति व्यवसितं तस्य व्यवसाय सुरोत्तमौ दर्शयामासतुर्देवीं पुरो यानेन
गच्छतीं ३२ तत्र तत्र प्रशंसद्भि: पथि वैमानिकै: सुरै: अवकीर्यमाणा ददृशे कुसुमै: क्रमशो ग्रहान् ३३
त्रिलोकीं देवयानेन सोतिव्रज्य मुनीनपि परस्ताद्यद्ध्रुवगतिर्विष्णो: पदमथाभ्यगात् ३४ यद्भ्राजमानं स्व ६५
रुचैव सर्वतो लोकास्त्रयो ह्यनु विभ्राजंत एते यन्नाव्रजन्जंतुषु येननुग्रहा व्रजंति भद्राणि चरंति येनिशं ३५
शांता: समदृश: शुद्धा: सर्वभूतानुरंजना: यांत्यंजसाच्युतपदमच्युतप्रियबांधवा: ३६ इत्युत्तानपद: पु
त्रो ध्रुव: कृष्णपरायण: अभूत्त्रयाणां लोकानां चूडामणिरिवामल: ३७ गंभीरवेगोनिमिषं ज्योतिषां
चक्रमाहितं यस्मिन्भ्रमति कौरव्य मेढ्यामिव गवां गण: ३८ महिमानं विलोक्यास्य नारदो भगवानृषि:
आतोद्यं वितुदन् श्लोकान्सत्रेगायत्प्रचेतसां ३९
नअव्रजन् नगतवंत: ३५ अच्युतप्रिया: बांधवायेषांते ३६ अनिमिषं अनलसं ज्योतिषां चक्रं यस्मिन् आ शिवो ३७
हितं अर्पितं सत् भ्रमति मेढ्यां आहित: गंभीरवेग: गवांगणइव ३७ आतोद्य वीणा वितुदन् वादयन् प्रचेत
सांब्रह्मसत्रे भगवन्माहात्म्यप्रसंगेन ध्रुवमहिमाप्रतिपादनपरान् श्लोकान् अगायत् ३९ ॥६४॥६४

नूनामतिपतिरेव देवतायस्या: तस्या: सुतस्य य: तप: प्रभाव: तस्य तां गतिं फले अधिगंतुं वेदवदनशीला: ब्रह्मर्षयोपि
नैवप्रभवंति अभ्युपायान् भगवद्धर्मान् दृष्ट्वापि किंपुन: नृपा: ४० तत: प्रभावं गतिं च विशिनष्टि द्वाभ्यां गुरु दारा:
पितृपत्नी सुरुचि: तस्या: वाक्शरै: भिन्नेन हृदयेन वनं यत: सन् अजितमपि य: जिगाय वशीकृतवान् ४१ तस्य
अधिरूढं तेन प्राप्तपदं य: भुवि क्षत्रबंधु: क्षत्रिय: भवेत् स: तं अनुवर्षयुगै: समूहैरपि आढुं इच्छेदपि किं न संकल्पो

नारदउवाच नूनं सुनीते: पतिदेवताया स्तप: प्रभावस्य सुतस्य तां गतिं दृष्ट्वाभ्युपायानपि वेदवादिनो नै
वाधिगंतुं प्रभवंति किं नृपा: ३९ य: पंचवर्षो गुरुदारवाक्शरैर्भिन्नेन यातो हृदयेन दूयता वनं मदादेश
करोजितं प्रभुं जिगाय तद्भक्तगुणै: पराजितं ४० य: क्षत्रबंधुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगै:
षट्पंचवर्षो यदहोभिरल्पै: प्रसाद्य वैकुंठमवाप तत्पदं ४१ मैत्रेयउवाच एतत्तेभिहितं सर्वं यत्पृष्टो
हमिह त्वया ध्रुवस्योद्दामयशसश्चरितं संमतं सतां ४२ धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत् स्व
र्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणं ४३ श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रियचेष्टितं भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षय: ४४ महत्त्वमिच्छतो
तीर्थं श्रोतु: शीलादयो गुणा: ४४ यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनां प्रयत: कीर्तयेत्प्रात: स
मवाये द्विजन्मनां ४५ सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत् पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेथवा ४६
प्यशक्य: इरत आरोहणमित्यर्थ: कथंभूतं पदं षट् वा पंच वा वा वर्षाणि यस्य स: अल्पैरेव अहोभि: वैकुंठं प्रसाद्य
यत तस्यपदं अवापतत् ४२ उद्दाम उत्कृष्टं यश: यस्य ४३ धनादे: निमित्तं धन्यं ध्रौव्यं ध्रुवस्थानप्रापकं प्रशस्यं प्रशंसो
र्हं अघमर्षणं पापनाशनं ४४ अच्युतप्रियस्य ध्रुवस्य चेष्टितं श्रुत्वा य: वर्तते तस्य भक्ति: भवेत् ४५ तीर्थमहत्वा
स्थानं गुणा: यत्र भवंति ०४६ समवाये सभायां ४७॥४८ × भवेद्भक्तिर्भगवतियथास्यात्क्लेशसंक्षय: ३

भा०च० ३८ नेछन् निष्कामः सन् तत्र श्रवणे आत्मनैव आत्मानं प्रति संतुष्टो भवतीति हेतोः सिद्धिं प्राप्नोति ४९ किं च सत्सेषु भगव
मार्गे अमृतरूपं ज्ञानं यः दद्यात् ५० ध्रुवस्य चरितं मया अभिहितं मातुः गृहं वहित्वा ५१ इति चतुर्थे द्वादश ः१२
एवं पंचभिरध्यायैः ध्रुवचर्यानुवर्णिता अथैकादशभिश्चित्रं पृथुचारित्रमुच्यते तत्र त्रयोदशे वैकुंठ्यो जन्म ध्रुवान्वये

क्षिमक्षयेव्यतीपाते संक्रमेर्कदिने पि वा श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः ४७ नेछंस्तत्रात्मना॰
त्मानं संतुष्ट इति सिध्यति ज्ञानमज्ञानतत्त्वाय यो दद्यात्सत्पथेमृतं ४८ कृपालोर्दीननाथस्य देवास्त
स्यानुगृह्णते इदं मया तेभिहितं कुरूद्वह ध्रुवस्याविख्यातविशुद्धकर्मणः हित्वार्भकः क्रीडनकानि
मातुर्गृहं च विष्णुं शरणं यो जगाम ५२ इति श्रीभागवते महापुराणे चतुर्थस्कंधे ध्रुवचरिते द्वादशोध्यायः
सूत उवाच निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुंठपदाधिरोहणं प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं
पुनस्तं विदुरः प्रचक्रमे १ विदुर उवाच के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत कस्यान्ववाये प्रख्याताः
कुत्र वा सत्रमासत २ मन्ये महाभागवतं नारदं देवदर्शनं येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः ३
स्वधर्मशीलैः पुरुषैर्भगवान्यज्ञपूरुषः इज्यमानो भक्तिमता नारदेनेरितः किल ४ यास्ता देवर्षिणा त
त्र वर्णिता भागवत्कथाः मह्यं शुश्रूषवे ब्रह्मन्कार्त्स्न्येनाचष्टुमर्हसि ५
अंगो वेन पिता पुत्रः कौर्यात् कृष्णन इतीर्यते प्ररूढभावः भक्तिर्यस्य १ अन्ववाये वंशे २ नारदेन प्रचेतसां सत्रे वर्णि शिवो
ताः प्रष्टुं तन्माहिमानमाह मन्य इति देवस्य दर्शनं यस्य हरेः परिचर्यप्रकारः क्रियायोगः पंचरात्रे येन प्रोक्ताः ३ ३८
स्वधर्मशीलैः प्रचेतोभिः ४ ॥५॥

१ पुरुं कुत्सं त्रितं द्युम्नं सत्यवंतमृतं व्रतं अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकं १५ उल्मुकोजनयत्पुत्रान्पुष्करिण्यां षडुत्तमान् अंगं सुमनसं ख्यातिं क्रतुमंगिरसं गयं १७
ध्रुवस्य वंशे जात इति वक्तुं ध्रुवस्य वंशं अनुक्रामति ध्रुवस्येत्यादिना पितुः सार्वभौमश्रियं न ऐच्छत् अधिराजासनं च ६
अनिच्छायां हेतुमाह स इति चतुर्भिः ७ आत्मानं स्वरूपभूतं ब्रह्म अवरुंधानः प्राप्नुवन् आनने आत्मनः नान्यं तदा ए
क्षत स्वयं तु सर्वस्मात् अन्यः सन् कथंभूतं ब्रह्मनिर्वाणं शांतं अवबोधरसेन एकात्म्यं यस्य ८ कथंभूतः अव्यव
मैत्रेय उवाच ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनं सार्वभौमश्रियं नैच्छदधिराजासनं पितुः ६ स ज
न्मनोपशांतात्मा निःसंगः समदर्शनः ददर्श लोके विततमात्मानं लोकमात्मनि ७ आत्मानं ब्रह्मनिर्वाणं
प्रत्यस्तमितविग्रहं अवबोधरसैकात्म्यमानंदमनुसंततं ८ अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः
स्वरूपमवरुंधानो नात्मनोन्यं तदैक्षत ९ जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः लक्षितः पथि बाला
नां प्रशांतार्चिरिवानलः १० मत्वा तं जडमुन्मत्तं कुलवृद्धाः समंत्रिणः वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः
सुतं ११ स्वर्वीथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान् पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयं १२ पुष्पार्ण
भा७ स्य प्रभा भार्ये दोषा च द्वे बभूवतुः प्रातर्मध्यंदिनं सायमिति ह्यासन्प्रभासुताः १३ प्रदोषो निशिथो व्युष्ट इ
ति दोषासुतास्त्रयः व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे १४ स चक्षुः सुतमाकूत्यां पत्न्याम
नुमवाप ह मनोरसूत महिषी विरजान्नड्वला सुतान् १५ ॥ ॥ ॥ ॥ ॥
छिन्नः वः योगः स एव अग्निः तेन दग्धः कर्ममलः आशयः वासना च यस्य ९ जडादीनामिव आकृतिः यस्य तथा
भूतः लक्षितः अतन्मतिः न तथाभिवमतिर्यस्य सर्वज्ञत्वात् प्रशांतानि अर्चिंषि ज्वालाः यस्य अनलस्य तद्
वत् स्थितः १० यवीयांसं उत्कलात् कनिष्ठं ११ इष्टा प्रिया भार्या १२।१३ निशीथः निशीथ १४ सः सर्व
तेजाः चक्षुः संज्ञं मनुं सुतमवाप मनोः महिषी नड्वला विरजान् षड्जान् पुरुप्रमुखान् द्वादश सुतान् असूत

भा॰४ अंगाविदुरवागेवबन्धयेषां १९ मंथनेहेतुः आराजकइति आधः पुरग्रामादीनां तेनरक्षितत्वात् २० पत्न्यस्याः
३९ प्रजाहेतोः विमनाः सन्नययौ २१ किंच अहः अपराधं वेनंउद्दिश्य आलस्य २२ यतः अयं अधर्मइत्याह नं अवध्ये
यः भवतेयोपिनभवति २३ परावरविदांमध्ये अतिश्रेष्ठोपि अभावीपुत्रः काम्यकर्मणाबलादापादितोपि
नस्करवायभवेदिविद्योतयन् अंगस्यपुत्रोत्पत्तिक्रममाह अंगइत्यादिना २४ ॥२॥ २५ अयातयामानिअगतवी

स्रुनीथांगस्ययापत्नीस्रुषुवेवेनमुल्बणं यद्दौःशील्यात्सराजर्षिनिर्विण्णोनिरगात्पुरा १८ यमंगशेपुःकुपि
तावाग्वज्रामुनयःकिल गतासोस्तस्यभूयस्तेममंथुर्दक्षिणंकरं १९ अराजकेतदालोकेदस्युभिःपीडि
ताःप्रजाः जातोनारायणांशेनपृथुराद्यःक्षितीश्वरः २० विदुरउवाच तस्यशीलनिधेःसाधोर्ब्रह्मण्य
महात्मनः राज्ञःकथमभूद्दुष्टा प्रजायद्विमनाययौ २१ किंवांहोवेनमुद्दिश्यब्रह्मदंडमयूयुजन् दंडव्रत
धरेराज्ञिमुनयोधर्मकोविदाः २२ नावध्येयःप्रजापालःप्रजाभिरघवानपि यदसौलोकपालानांबिभर्त्यो
जःस्वतेजसा २३ एतदाख्याहिमेब्रह्मन्सुनीथात्मजचेष्टितं श्रद्दधानायभक्तायत्वंपरावरवित्तमः २४
मैत्रेयउवाच अंगोश्वमेधंराजर्षिराजहारमहाक्रतुं नाजग्मुर्देवतास्तस्मिन्नाहूताब्रह्मवादिभिः २५ तम्
चुर्विस्मितास्तत्रयजमानमथर्त्विजः हवींषिहूयमानानिनतेगृह्णातिदेवताः २६ राजन्हवींष्यदुष्टा
निश्रद्धयासादितानिते छंदांस्ययातयामानियोजितानिधृतव्रतैः २७ नविदामेहदेवानांहेलनंवयम
ण्वपि यन्नगृह्णंतिभागान्स्वान्येदेवाःकर्मसाक्षिणः २८ मैत्रेयः अंगोद्विजवचःश्रुत्वायजमानःसुदुर्मनाः शिवो
तत्प्रष्टुंव्यसृजद्वाचंसदस्यांस्तदनुज्ञया २९ नागच्छंत्याहुतादेवानगृह्णंतिग्रहानिह सदसस्पतयोब्रूतकिमवद्यंमयाकृतं ३० ३९
यानि २७।२८ यज्ञेगृहीतमोनोपिनावंध्यसृजत्प्रायुंक्त २९ आहुताः ग्रहान् सोमपात्राणि इहयज्ञे नगृह्णंति ३०॥

इहजन्मनितावत् मनाक् ईषदपि अघंनस्थितं कथंचित्तस्य सद्यएवप्रायश्चित्तैःक्षालनात् किंतु प्राक्कृतं एकं अघंअस्ति
यतयस्मात् ईदृग्गुणाधिकोपित्वं प्रजारहितः ३१ अतः यथादेवाः हविः गृह्णंति यथाआत्मानं सुप्रजं साधय कथंसा
धनीयं तदाहुः इष्टइति ३२ तथासतिस्वभागान् ग्रहीष्यंति यतयतः हरिः साक्षात् इष्टतः स्यात् अत तेनसहसर्वे

सदसस्पतयऊचुः नरदेवेहभवतोनाघंतावन्मनाक्स्थितं अस्त्येकंप्राक्तनमघंयदिहेदृक्त्वमप्रजाः ३१
तथासाधयभद्रंतेआत्मानंसुप्रजंनृप इष्टस्तेपुत्रकामस्यपुत्रंदास्यतियज्ञभुक् ३२ तथास्वभागधेया
निग्रहीष्यंतिदिवौकसः यद्यज्ञपुरुषःसाक्षादपत्यायहरिर्हृतः ३३ तांस्तान्कामान्हरिर्दद्याद्यान्यान्कामयते धा॰२
जनः आराधितोयथैवैषस्तथापुंसांफलोदयः ३४ इतिव्यवसिताविप्रास्तस्यराज्ञःप्रजातये पुरोडाशंनिर
वपन्शिपिविष्टायविष्णवे ३५ तस्मात्पुरुषउत्तस्थौहेममाल्यमलांबरः हिरण्मयेनपात्रेणसिद्धमादा
यपायसं ३६ सविप्रानुमतोराजागृहीत्वांजलिनौदनं अवघ्रायमुदायुक्तःप्रादात्पत्न्याउदारधीः ३७
सातत्पुंसवनंराज्ञीप्राश्यवैपत्युरादधे गर्भंकालउपावृत्तेकुमारंसुषुवेप्रजा ३८ सबालएवपु
धा॰८ रुषोमातामहमनुव्रतः अधर्मांशोद्भवंमृत्युंतेनाभवदधार्मिकः ३९ ॥ ॥ ॥ ॥

देवाः आगमिष्यंतीत्यर्थः ३३ ननुअनिष्टन्कामान् हरिः कथंदद्यात् तत्राहुः तांस्तानिति ३४ प्रजातये पुत्रो
त्पत्त्यै शिपिषु पशुषु यज्ञरूपेणाविश्याय तथाचश्रुतिः यज्ञोवैविष्णुः पशवः शिपिर्यज्ञः सएवपशुषुप्रतितिष्ठति
इति ३५ तस्मादाहात योग्यतया अग्नेः ३६ पत्न्यैप्रादात ३७ पुमांसंभवतेसूते अनेनेति तथातत्प्राश्य
पत्युःसकाशात् गर्भंआधत्त अप्रजासती ३८ मातामहंमृत्युंहिपुत्रीसुनीथा ३९ ॥ ॥ ॥

भा० च४ मृगयुः लुब्धकः सन् तं दृष्ट्वा वेनः असौ आगच्छतीति जनः सर्वोपि अरोत् चुक्रोश ४० आक्रीडे क्रीडास्थाने बाला
४० न पशून् इव अमारयत् ४१ विचक्ष्य दृष्ट्वा ४२ स दुर्मनसः तस्य कुपुत्रानंदाद्वाक्यान्याह प्रायेणेति त्रिभिः अप्रजाः
येतैः अभ्यर्चितः तत्रहेतुः कुत्सितेः अपत्यैः सम्भृतं दुर्धरं धारयितुं अशक्यं दुःखं येन विंदंति ४३ सर्वेषांस वैः सस्आ
धिः मानसी व्यथा ४४ तं प्रजापदेशं पुत्रनाममात्रमपि आत्मनः मोहेन बंधनं यदर्थाः यन्निमित्ताः क्लेशदाः

सशरासनमुद्यम्य मृगयुर्वनगोचरः हंत्यसाधुमृगान्दीनान्वेनोसावित्यरौज्जनः ४० आक्रीडे क्रीडतो
बालान्वयस्यानतिदारुणाः प्रसह्य निरनुक्रोशः पशुमारममारयत् ४१ तं विचक्ष्य खलं पुत्रं शासनैर्विवि
न३ धैर्नृपः यदा शासितुं कल्पो भृशमासीत्स दुर्मनाः ४२ प्रायेणाभ्यर्चितो देवो येप्रजा गृहमेधिनः कदप
त्यभृतं दुःखं येन विंदंति दुर्धरं ४३ यतः पापीयसी कीर्तिरधर्मश्च महान्नृणां यतो विरोधः सर्वेषां यत आ
धिरनंतकः ४४ कस्तं प्रजापदेशं वै मोहबंधनमात्मनः पंडितो बहु मन्येत यदर्थाः क्लेशदा गृहाः ४५
कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात् निर्विद्येत गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः ४६ एवं स निर्विण्णमना नृपो
महान्निशीथ उत्थाय महोदयोदयात् अलब्धनिद्रोनुपलक्षितो नृभिर्हित्वा गतो वेनसुवं प्रसुप्तां ४७

गृहाः भवंति ४५ इदानीं निर्वेदहेतुत्वेन कुत्सितमेव अपत्यं अभिनंदति कदपत्यमिति शुचां पदात् शोकानां स्थानात् शिवो
वरत्वे हेतुः निर्विद्येतेति तत्कुतः यत् यतः कदपत्यात् गृहाः क्लेशनिवहाः भवंति ४६ महतां उदयानां विभूति ४०
नां उदयः यस्मिन् तस्मात् गृहान् गतः या वेनसूः तेस्मतां ४७ ७॥७॥ ७॥ ७॥ ७॥ ७॥७

प्रजाः पुरोहितामात्याः सुहृद्गणाः विचिक्युः अन्वेषितवंतः तं तु तत्रैव संतमपि न अपश्यत् इति दृष्टांतेनाह यथेति ४८ साश्च वः
रुदंतः भर्तुः विप्लवं नाशं अदर्शनमित्यर्थः इति चतुर्थे त्रयोदशः चतुर्दशे तु दुष्पुत्रभयाद्गेगाते द्विजैः अभि
षिक्तस्य वेनस्य शिषात्रैवं प्रउच्यते क्षेमदर्शिनः क्षेमचिंतकाः पशुसमानरूपतां पश्यंतः १ अमात्यादी
नां प्रकृतीनां असंमतमपि पाठांतरे प्रकृत्यास्वभावेन असंमतं २ चोराः लीनाः बभूवुः ३ आरूढं नृप

विज्ञाय निर्विद्य गतं पतिं प्रजाः पुरोहितामात्यसुहृद्गणादयः विचिक्युरुर्व्यामतिशोककातरा यथा नि
गूढं पुरुषं कुयोगिनः ४८ अलक्षयंतः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीं ऋषीन्समेतान
भिवंद्य साश्रवोन्यवेदयन् पौरव भर्तुर्विप्लवं ४९ इति श्रीभागवते महापुराणे चतुर्थे त्रयोदशोध्यायः
मैत्रेय उवाच भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः गोप्तर्यसति वै नॄणां पश्यंतः पशुसाम्यतां
१ वीरमातरमाहूय सुनीथां ब्रह्मवादिनः प्रकृत्यसंमतं वेनमभ्यषिंचन्पतिं भुवः २ श्रुत्वा नृपास
नगतं वेनमत्युग्रशासनं निलिल्युर्दस्यवः सद्यः सर्पत्रस्ता इवाखवः ३ स आरूढनृपस्थान उन्नद्धो त
ष्टविभूतिभिः अवमेने महाभागाँल्लब्धः संभावितः स्वतः ४ एवं मदांध उत्सिक्तो निरंकुश इव द्विपः
पर्यटन्रथमास्थाय कंपयन्निव रोदसी ५ न यष्टव्यं न होतव्यं न दातव्यं द्विजाः क्वचित् इति न्यवारयद्ध
र्मं भेरीघोषेण सर्वतः ६ वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितं विमृश्य लोकव्यसनं कृपयोचुः स्म स
त्रिणः ७ अहो उभयतः प्राप्तं लोकस्य व्यसनं महत् दारुण्युभयतो दीप्ते इव तस्करपालयोः ८ ॥६७
स्थाने राजासनं यत् अष्टविभूतिभिः लोकपालैः अर्ध्यैः ४ सत्रिणः मीलिताः संतः ७ स्थलतश्च अग्रतश्च
दीप्ते प्रज्वलिते काष्ठे तन्मध्यवर्तिनां पिपीलिकादीनां उभयतः व्यसनं एवं तस्करेभ्यः पालकाच्च दुःखं प्राप्तमित्यर्थः ८

तदेवाङ्कुः॥अराजकभयादिति अन्तर्दर्हणः राज्यानर्हः ९ अस्माकमपिअनिष्टंजातमित्याङ्कुः अहेः यथापयः पोषः क्षी
भा॰च॰४ रेणपोषणं। पोषकस्यापि। अनर्थं बिभर्ति। पुष्णाति। तदेवाङ्कुः वेनइति। निरूपितः नियुक्तः अस्माभिः १० सांत्वयेमउप
४१ अराजकभयादेषः कृताराजातदर्हणः ततोप्यासीद्भयं त्वद्य कथंस्यात्स्वस्तिदेहिनां ९ अहेरिवपयःपोषः
पोषकस्याप्यनर्थभृत्॥वेनः प्रकृत्यैवखलः सुनीथागर्भसंभवः १० निरूपितः प्रजापालः सजिघांसतिवैप्रजाः
अथापिसांत्वयेमामुंनास्मांस्तत्पातकंस्पृशेत् ११ तद्विद्वद्भिरसद्वृत्तो वेनोस्माभिःकृतोनृपः॥सांत्वि
तोयदिनोवाचंनग्रहीष्यत्यधर्मकृत् १२ लोकधिक्कारसंदग्धंहनिष्यामःस्वतेजसा एवमध्यवसाय्यै
नंमुनयोगूढमन्यवः १३ उपव्रज्याब्रुवन्वेनंसांत्वयित्वाथसामभिः मुनयऊचुः नृपवर्यनिबोधै
तद्यत्तेविज्ञापयामभोः आयुःश्रीबलकीर्तीनांतवतातविवर्धनं १४ धर्मआचरितःपुंसांवाङ्म
नःकायबुद्धिभिः लोकान्विशोकान्वितरत्यथानंत्यमसंगिनां १५ सतेमाविनशेद्वीरप्रजानांक्षेम
लक्षणः सयस्मिन्विनष्टेनृपतिरैश्वर्यादवरोहति। १६ राजन्नसाध्वमात्येभ्यश्चोरादिभ्यःप्रजान्नृप
रक्षन्यथाबलिंगृह्णन्निहप्रेत्यचमोदते १७ यस्यराष्ट्रेपुरेचैवभगवान्यज्ञपूरुषः इज्यतेस्वेनधर्मेण
जनैर्वर्णाश्रमात्मकैः १८ तस्यराज्ञोमहाराजभगवान्भूतभावनः परितुष्यतिविश्वात्मा
तिष्ठतोनिजशासने १९ तस्मिंस्तुष्टेकिमप्राप्यंजगतामीश्वरेश्वरे। लोकाःसपालाह्येतस्मैहरंतिबलिमादृताः २० शिवो ४२
पत्नीभिः प्रार्थयिष्यामः तस्यपातकंस्वस्य तत्पातकास्पर्शेहेतुः तत्पातकं विद्वद्भिः ११।१२ गूढः मन्युर्येषांसामभिः प्रियोक्तिभिः
१३।१४ निष्कामानां अनंत्यंमोक्षमपि १५ माविनशेत्। माविनश्यतु १६ असाधवः येअमात्याः तेभ्यः यथाम् चोरादिभ्यः।१७।१८

सर्वलोकांश्च तत्पालान्। अमरांश्च तत्पापकांश्च यज्ञान्संगृह्णातिनियच्छतीतितथा। तंविचित्रैः द्रव्ययज्ञादिभिः भवाय
सम्रक्षये। स्वदेशान्। तदासिनः जनान् अनुरोद्धुं अनुवर्तितुं २१ युष्मद्विषये त्वद्देशेहरेः कलाः अंशाः सुराः तेषांसुराणां
हेलनं अवज्ञा २२ बालिशाः अज्ञाः वृत्तिदं अन्नादिप्रदं मां हित्वा २३॥२४। भर्तृस्नेहः विदूरे येषां २५॥२६ २७२८
तंसर्वलोकामरयज्ञसंग्रहं त्रयीमयंद्रव्यमयंतपोमयं यज्ञैर्विचित्रैर्यजतोभवतेराजन्स्वदेशाननुरोद्धुमर्हसि
२१ यज्ञेनयुष्मद्विषयेद्विजातिभिर्वितायमानेनसुराःकलाहरेः स्विष्टाःसुतुष्टाःप्रदिशंतिवांछितंत
द्धेलनंवीरचेष्टितुं २२ वेनउवाच॥ बालिशाबतयूयंवैअधर्मेधर्ममानिनः। येवृत्तिदंपतिंहित्वाजा
रंपतिमुपासते २३ अवजानंत्यमीमूढानृपरूपिणमीश्वरं नानुविंदंतितेभद्रमिहलोकेपरत्र
च २४ कोयज्ञपुरुषोनामयत्रवोभक्तिरीदृशी भर्तृस्नेहविदूराणांयथाजारेकुयोषितां २५ वि
ष्णुर्विरिंचोगिरिशइंद्रोवायुर्यमोरविः पर्जन्योधनदःसोमःक्षितिरग्निरपांपतिः २६ एतेचान्ये
चविबुधाःप्रभवोवरशापयोः देहेभवंतिनृपतेःसर्वदेवमयोनृपः २७ तस्मात्मांकर्मभिर्विप्राः
यजध्वंगतमत्सराः बलिंचमह्यंहरतमत्तोन्यःकोग्रभुक्पुमान् २८
देहेभवंतिनृपतेः अतः नृपतिरेवश्रेष्ठः इतरेदतदंशाइतिभावः २७ बलिंचकारादिकं अग्रभुक् आराध्यः २८।२९

एतेन असत्कृताः भग्नायां यांच्यायां ३० ॥ ३१ ॥ ३२ परिचक्षीत विनिंदेत अशुभं वेनं विना कृतघ्नतामाह यद्
नुग्रहविषयः सन्नईदृशं ऐश्वर्यं प्राप्तः ३३ पूर्वं गूढमन्यवः हुंकृतैः हुंकारैः ३४ स्वाश्रमपदं प्रति ऋषिभिः गते
गमने कृते विद्यायोगेन मंत्रसहितया युक्त्यो पुंवद्भावः आर्षः ३५ सरस्वत्याः सलिले आप्लुताः इत्यर्थः ३६

मैत्रेय उवाच। इत्थं विपर्ययमतिः पापीयानुत्पथं गतः अनुनीयमानस्तद्याच्ञां न चक्रे भ्रष्टमंगलः २९
इति ते सत्कृतास्तेन द्विजाः पंडितमानिना ॥ भग्नायां तेन यांच्यायां तस्मै विदुर चुक्रुधुः ३० हन्य
तां हन्यतामेषः पापः प्रकृतिदारुणः जीवन् जगदसावाशु कुरुते भस्मसात् ध्रुवं ३१ नायमर्हत्यसद्
वृत्तो नरदेववरासनं योधियज्ञपतिं विष्णुं विनिंदत्यनपत्रपः ३२ को वैनं परिचक्षीत वेनमेकमृते
शुभं प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः ३३ इत्थं व्यवसिता हंतुमृषयो गूढमन्यवः निजघ्नुर्हुंकृतैर्वे
नं हतमच्युतनिंदया ३४ ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरं सुनीथा पालयामास विद्यायोगेन
शोचती ३५ एकदा मुनयस्ते तु सरस्वत्सलिलाप्लुताः हुत्वाग्नीन् सत्कथाश्चक्रुरुपविष्टाः स
रित्तटे ३६ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंकरान् अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ३७
एवं मृशंतं ऋषयो धावतां सर्वतो दिशं पांसुः समुत्थितो भूरिश्चोराणामभिलुंपतां ३८ शिवो

तदा तु उत्पातान् वीक्ष्य भुवः भद्रं न भवेत् किमित्याहुश्च ३७ एवं विमृशंतः ऋषयः स्थिताः तदा धावतां चोरा ४२
णां भूरिः पांसुः समुत्थितः ३८

तत् तदा तेषां लोकस्य धनं लुंपतां । जिघांसनां च उपद्रवमाज्ञाय ३९ तथा चोरप्रायं अराजकं हीनसत्वं च जनप
दमाज्ञाय· राज्ञा अपि अवारणे दोषदर्शिनोपि जनान् लुंपतः लोकान् न अवारयन् इत्यन्वयः ४० राज्ञां नो क्षत्रिया
णां अवारणे दोष इति किं वक्तव्यं समदृगपि शांतोपि ब्राह्मणोपि यदि दीनानां समुपेक्षकः को भवेत् तर्हि तस्यापि ब्रह्मतपः
स्रवति ४१ अतः उपेक्षादोषपरिहाराय नो गस्येत्यादि विनिश्चित्य ४२ ॥ ४२ ॥ ४२ ॥ ४२ ॥ ४२ ॥ ४२

तदुपद्रवमाज्ञाय लोकस्य वसु लुंपतां भर्तर्युपरते तस्मिन्नन्योन्यं च जिघांसतां ३९ चोरप्रायं ज
नपदं हीनसत्वमराजकं लोकान्नावारयञ्छक्ता अपि तद्दोषदर्शिनः ४० ब्राह्मणः समदृक् शांतो दी
नानां समुपेक्षकः स्रवते ब्रह्म तस्यापि भिन्नभांडात्पयो यथा ४१ नांगस्य वंशो राजर्षेरेष संस्थातुम
र्हति अमोघवीर्या हि नृपा वंशेस्मिन्केशवाश्रयाः ४२ विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः ममं
थुरूरुं तरसा तत्रासीद्बाहुको नरः ४३

महीपतेः उरुं तरसा ममंथुरित्यन्वयः ४२ संस्थातुं नाशं गंतुं यद्वा ऋषय एव लुंपतः लोकान् न अवारयन् कथं
हताः हुंकारैरेव वेनं निवारयितुं शक्ता अपि ताक्ति तस्मिन्निवारणे तन्मरणादि दोषदर्शिनः न च उदासः चो
रोपद्रुतं दीनोपेक्षायां तपोहानिप्रसंगात् अन्यं तस्मिन्निवारकं राजानं अकुर्वन् अंगवंशच्छेदस्य अनर्ह
त्वात् अतः वेनस्यैव तद्देहं ममंथुरिति योज्यं ४२ बाहुकः वामनः ४३

भा॰ च॰ ४ तमेवाह काकइवकृष्णः महत्योहनूकपोलप्रांतोयस्य ह्रस्वोपादोयस्य ४४ ॥४५॥ गिरिकाननंचगोचरः आश्रयः
४३. नतुपुरादिप्रवेशः येषांतेतत्रहेतुः येनकारणेन असौअहरत् ततः तस्यवंश्याः तथाभूताः इतिचतुर्थेचतुर्दशः १४
ततःपंचदशोविप्रैर्मथनार्थेनबाहुतः जातस्यतुपृथोरुक्रममभिषेकार्हणादिकं किमस्युरितत आह एषइतिचतुर्भिः ४

काककृष्णोतिह्रस्वांगोह्रस्वबाहुर्महाहनुः ह्रस्वपान्निम्ननासाग्रोरक्ताक्षस्ताम्रमूर्धजः ४४ तं
तुतेननतंदीनंकिंकरोमीतिवादिनं निषीदेत्यब्रुवन्तात सनिषादस्ततोभवत् ४५ तस्यवंश्या
स्तुनैषादागिरिकाननगोचराः येनाहरज्जायमानोवेनकल्मषमुल्बणं ४६ इतिश्रीभागवतेमहापु
राणेचतुर्थस्कंधेनैषदोत्पत्तिश्चतुर्दशोध्यायः १४ मैत्रेयउवाच अथतस्यपुर्विप्रैरपुत्रस्यम न४
हीपतेः बाहुभ्यांमथ्यमानाभ्यांमिथुनंसमपद्यत १ तंदृष्ट्वामिथुनंजातमृषयोब्रह्मवादिनः ऊचुः
परमसंतुष्टाविदित्वाभगवत्कलां २ ऋषयऊचुः एषविष्णोर्भगवतःकलाभुवनपालिनी इयंचलक्ष्म्याः
संभूतिःपुरुस्यांनपायिनी ३ अयंतुप्रथमोराज्ञांपुमान्प्रथयितायशः पृथुर्नाममहाराजोभविष्यतिपृथु
श्रवाः ४ इयंचदेवीसुदतीगुणाभूषणभूषणा अर्चिर्नामवरारोहापृथुमेवावरुंधती ५

लक्ष्म्याःसंभूतिःकला ३ अत्रयःपुमान्सतुमहाराजःभविष्यति ४ सुदती शोभनदंतवतीगुणानांभूषणानां शिवो
चभूषणरूपा अवरुंधती भर्तृत्वेन भजंतीभविष्यति ५ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ४३

एषइतिलोकस्यारिरक्षयारिरक्षिषया ६ स्वःस्त्रियःअप्सरसःनृत्संतिस्म ७ ॥८ देवैःसहआसन्सआ
गत्य वैन्यस्यपृथोःविक्रमैःरेखात्मकं चक्रं ९ अप्रतिहतं रेखांतरैः अभिन्नं चक्रं सपरमेश्वरस्य अंशः १०
नि॰ अभिषेचनिकानि अभिषेकसाधनानि ११ हैमीरवरं आसनं सलिलस्यस्रावःयस्मात् १२ ॥१३॥१४

एषसाक्षाद्धरेरंशोजातोलोकरिरक्षया इयंचतत्परादेवीरनुजज्ञेनपायिनी ६ मैत्रेयउवाच प्रशं
संतिस्मतंविप्रागंधर्वप्रवराजगुः मुमुचुःसुमनोधाराःसिद्धानृत्यंतिस्वःस्त्रियः ७ शंखतूर्यमृदंग
गाद्यानेदुर्दुंदुभयोदिवि तत्रसर्वउपाजग्मुर्देवर्षिपितॄणांगणाः ८ ब्रह्माजगद्गुरुर्देवैःसहसृत्यसुरे
श्वरैः वैन्यस्यदक्षिणेहस्तेदृष्ट्वाचिह्नंगदाभृतः ९ पादयोररविंदंचतंवैमेनेहरेःकलां यस्याप्रति
हतंचक्रमंशःसपरमेष्ठिनः १० तस्याभिषेकआरब्धोब्राह्मणैर्ब्रह्मवादिभिः अभिषेचनिकान्यस्मै
आजह्रुःसर्वतोजनाः ११ सरित्समुद्रागिरयोनागागावःखगामृगाः द्यौःक्षितिःसर्वभूतानिसमा
जह्रुरुपायनं १२ सोभिषिक्तोमहाराजःसुवासाःसाध्वलंकृतः पत्न्यार्चिषालंकृतयाविरेजेग्निरिवा
परः १३ तस्मैजहारधनदोहैमंवीरवरासनं वरुणःसलिलस्रावमातपत्रंशशिप्रभं १४ वायुश्चवा
लव्यजनेधर्मःकीर्तिमयींस्रजं इंद्रःकिरीटमुत्कृष्टंदंडंसंयमनंयमः १५

अभिषेचनिकानि अभिषेकसाधनानि ११।१२।१३ हैमीरवरंआसनंसलिलस्यस्रावःयस्मात् १४ देवाल
यजने ५

भा·च· ब्रह्ममयं हेममयं वर्मकवचं तत्पत्नीश्रीः श्रियंसंपदं १६ दशचंद्राकाराणि बिंबानिकोशेयस्यतंअसिं।
४४ खड्गं शतचंद्रंचर्म रूपाश्रयं अतिसुंदरं १७ अजस्य गोश्च शृंगाभ्यां निर्मितंचापं योगमय्यो पादस्पर्श
मात्रेण अभीष्टदेशप्रापके १८ नाट्यादिकौशलं खेचराः आत्मजं स्वप्रभवं १९ तंस्तोतुंउपतस्थिरे

ब्रह्माब्रह्ममयंवर्मभारतीहारमुत्तमं हरिःसुदर्शनंचक्रं तत्पत्न्याव्याहतांश्रियं १६ दशचंद्रम
सिरुद्रः शतचंद्रंतथांबिका सोमोमृतमयानश्वान् त्वष्टारूपाश्रयंरथं १७ अग्निराजगवं
चापं सूर्योरश्मिमयानिषून् भूःपादुकेयोगमय्योद्यौः पुष्पावलिमन्वहं १८ नाट्यंसुगीतंवा
दित्रमंतर्धानंचखेचराः ऋषयश्चाशिषस्सत्याः समुद्रः शंखमात्मजं १९ सिंधवःपर्वतान
द्योरथवीथिर्महात्मनः सूतोथमागधोबंदी तंस्तोतुमुपतस्थिरे २० तावत्कांस्तानभिप्रेत्य
पृथुर्वैन्यःप्रतापवान् मेघनिर्ह्रादयावाचाप्रहसन्निदमब्रवीत् २१ पृथुरुवाच भोसूत
हेमागधसौम्यबंदीन् लोकेधुनास्पष्टगुणस्यमेस्यात् किमाश्रयोमेस्तवएषयोज्यतांमाम
य्यस्तवन्वितथागिरोवः २२

उपस्थिताः २० स्तावकान्स्तोतुंउद्यतान् अभित्य ज्ञात्वा २१ लोकेस्पष्टगुणस्यसतः मेस्तुतिःस्यात् अधुनातु किमा ४४
श्रयः मेस्तवःयोज्यतां अतः वः गिरः अधुनामयीवितथामाभूवन् यद्वालोके अधुना अस्पष्टगुणस्यमेकिमाश्रयः
स्तवःस्यात् अतः एषः क्रियमाणः स्तवः मेमदन्यस्ययोज्यतांनतुमेवितथाभिमानापत्तेरित्यर्थः २२

तस्मात्परोक्षेकालांतरेस्पष्टेषुगुणेषुसत्सु अस्माकंउपस्ततानियशांसिप्रति स्तोत्रं अलंअत्यर्थं करिष्यथहेअपीच्य
वाचः मधुरवाचः सभ्यैःप्रेरिताः वयं त्वामेवस्तुमइतिचेत् तत्राह उत्तमश्लोकस्यगुणानुवादेकार्येसति जुगुप्सितं
अर्वाचीनंनस्तावयंति २३ ननुसंभाविते रेवगुणैः आत्मानंजनः स्तावयतीति चेत् तत्राह महतांगुणान् आत्म
निसंपादयितुंशक्तोपि असतः गुणान् संभावनामात्रेणकः स्तावयते यद्वा आदावेव सतोपिकः स्तावयतेस्वतएवप्रख्या
तिसिद्धेः अन्यस्तुमिथ्यागुणास्तुतिश्लाघी मंदएवइत्याह तेइति पद्मयंशास्त्राभ्यासादिकं अकरिष्यत् तर्हिअस्यतेविद्या

तस्मात्परोक्षेस्मदुपस्ततान्यलं करिष्यथ स्तोत्रमपीच्यवाचः सत्युत्तमश्लोकगुणानुवादेजुगुप्सितंनस्त
वयंतिसभ्याः २३ महद्गुणानात्मनिकर्तुमीशः कःस्तावकैःस्तावयतेसतोपि तेस्याभविष्यन्निति
विप्रलब्धोजनावहासंकुमतिर्नवेद २४ प्रभवोप्यात्मनःस्तोत्रंजुगुप्संत्यपिविश्रुताः ह्रीमंतःपर
मोदाराः पौरुषंवाविगर्हितं २५ वयंत्वविदितालोकेसूताद्यापिवरीमभिः कर्मभिःकथमात्मा
नंगापयिष्यामबालवत् २६ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेपंचदशोध्यायः १५ मैत्रे
यउवाच इतिब्रुवाणंनृपतिंगायकामुनिचोदिताः तुष्टुवुस्तुष्टमनसस्तद्वाग्मृतसेवया १

दयः गुणाः अभविष्यन्नितिक्रियातिपत्त्या विप्रलब्धः जनानां अवहासंनवेद २४ प्रभवोपिविश्रुताअपिह्रीमंतः
जुगुप्सितं वेतिदृष्टांते यथाअतिस्तुतौ क्रियमाणायां विगर्हितं आत्मपौरुषादिपौरुषंनिंदंति तथाउचितामपिस्तु
तिनसहंतइत्यर्थः २५ वरीमभिःशिविदीर्घमार्षं भवितप्रधानश्चायंनिर्देशः वरिष्ठकर्मभिः अविदिताइत्यर्थः २६
इतिचतुर्थेपंचदशः षोडशेसर्वलोकेशःसत्कृतंभावयायुतं मुनिप्रयुक्तास्सूताद्याः स्तुवंतिस्मेतिवर्ण्यते गायकाः सूतादयः १

भा॰ त॰ ४
४५

नअलंनसमर्थाः यः भवान्अवतारेष्वपिअस्यआधिक्यंआकृः वेनस्यअंगात्जातस्यतेपौरुषाणिप्रातिअवित
र्क्यंतथाब्रह्मादीनामपि धियः बभ्रमुः कुतःपुनः वयंतद्वर्णनेसमर्थाभवेम २ अथापि यथावत् वर्णयितुं अशक्ता
अपिकथामृतेसादराः मुनिभिःउपदेशंयोगबलेनहृदिप्रकाशनंतत् अनतिक्रम्य प्रवितन्महिविस्तारयामः ३
४ तनौस्वदेहेलोकपालानां तनूः मूर्तयः काले काले बिभर्ति यथाभागं पालनपोषणानुरंजनादिकार्यानुसा

नालंवयंतेमहिमानुवर्णनेयोदेवर्याचततारमायया वेनांगजातस्यचपौरुषाणितेवा० १
चस्पतीनामपिबभ्रमुर्धियः २ अथाप्युदारश्रवसःपृथोर्हरेः कलावतारस्यकथा
मृताहृताः यथोपदेशंमुनिभिःप्रचोदिताः श्लाघ्यानिकर्माणिवयंवितन्महि ३ एष
धर्मभृतांश्रेष्ठोलोकंधर्मेनुवर्तयन् गोप्ताचधर्मसेतूनांशास्तातत्परिपंथिनां ४ एषवैलोक
पालानांबिभर्त्येकस्तनौतनूः कालेकालेयथाभागंलोकयोरुभयोर्हितं ५ वसुकालउपा
दत्तेयथाकालंविमुंचति समःसर्वेषुभूतेषुप्रतपन्सूर्यवद्विभुः ६ तितिक्षत्यक्रमंवै
न्यउपर्याक्रमतामपि भूतानांकरुणः शश्वदार्तानांक्षितिवृत्तिमान् ७

रेणयज्ञादिप्रवर्तनेनस्वर्गस्यहितं वृष्ट्यादिनाचभूर्लोकस्यहितं यथाभवतितथा ५ सूर्यादितनुधारणेमे
वाह आष्टभिः वसुधनंकरादानं आलेआदत्ते दुर्भिक्षादिकाले विमुंचतिच अष्टोमासान् सूर्यः वसुजलंआ
दत्तेविमुंचातिचवर्षासु तद्वत् ६ मस्तकेपादेन। आक्रामतामपि आर्तानांभूतानांअतिक्रमंसहिष्यते

देवेअवर्षत्येषःरुद्धंगतःप्राणायांसांताःप्रजाःस्वयंवृष्टिंकृत्वा रक्षिष्यति अत्रहेतुःअसौनरदेवपुर्हरिरिति ८
वदनमेवअमृतमूर्तिः चंद्रः तेनसानुरागः अवलोकः यस्मिन्विशदंस्मितंतेनचारुणा अन्यच कथितव
र्तमाननिर्देशः वर्तमानसामीप्येवर्तमानवद्वा इतिभूतवन्निर्देशश्च आशंसायांभूतवच्चेतिद्रष्टव्यः ९

देवेवर्षत्यसौदेवोनरदेववपुर्हरिः कृच्छ्रप्राणाःप्रजाह्येषरक्षिष्यत्यंजसेंद्रवत् ८ आप्या
ययत्यसौलोकंवदनामृतमूर्तिना सानुरागावलोकेनविशदस्मितचारुणा ९ अव्यक्त
वर्त्मैषनिगूढकार्योगंभीरवेधाउपगुप्तवित्तः अनंतमाहात्म्यगुणैकधामापृथुःप्रचेता
इवसंयतात्मा १० दुरासदोदुर्विषहआसन्नोपिविदूरवत् नैवाभिभवितुंशक्योवेनारण्यु
त्थितोनलः ११

नव्यक्तंवर्त्मप्रवेशनिर्गमयो। मार्गःयस्य निगूढं निष्पत्तेः पूर्वंअविज्ञातंकार्यंयस्य गंभीरंकिमर्थं
एतत्कृतमिति अन्यैःअज्ञाताभिप्रायंविधानइतितथा तथाउपगुप्तंस्फुरक्षितंवित्तंयस्य अनंतमाहा
त्म्यश्चासौगुणानांएकंधामनिलयः यस्मिन अनंतमाहात्म्योपेताःगुणाएवधामस्थानंयस्येतिवासंयता
त्मासंयतमूर्तिः १० दुरासदःशत्रौःमनसापिप्राप्तुंअशक्यः दुर्विषहः शत्रुभिःसोढुंअशक्यःविदूरवत्
पौरुषेणअभिभवितुंअशक्यःवनेएवअरणिःतस्मादुत्थितः ११

२ यथासमस्तअस्य: मरीचसंस्तुतहृदसः स्थितेः स्थितेः
शि॰वो॰ ४५

भा॰च॰ चारणैः गुप्तभृत्यैः पश्यन्नपि स्वस्तुतिनिंदादौ उदासीन इव वर्तिष्यते यथा देहिनां अध्यक्षः अविकृतः आत्मस्तुतः
४६ वायुः सूत्रात्मा तद्वत् १२ आत्मद्विषां सुतमपि सुतग्रहणं स्वात्मजस्वाम्यर्थं धर्मपथे यमस्य इत्यनेनस्थितः १३ चक्रं
आज्ञा सेना वा रथस्य वा चक्रं मानसाचलमभिव्याप्य प्रवर्तते किंपर्यंतं इत्याह अर्कः रश्मिगणैः यावत् तपति तावत्
१४

अंतर्बहिश्च भूतानां पश्यकर्माणि चारणैः उदासीन इवाध्यक्षो वायुरात्मेव देहिनां १२ नादं
डंदंडयत्येषः सुतमात्मद्विषामपि दंडयत्यात्मजमपि दंड्यं धर्मपथे स्थितः १३ यस्याप्रतिहतं च
क्रं पृथोरामानसाचलात् वर्तते भगवानर्को यावत्तपति गोगणैः १४ रंजयिष्यति यल्लोकमयमा
त्मविचेष्टितैः अथामुमाहू राजानं मनोरंजनकैः प्रजाः १५ दृढव्रतः सत्यसंधो ब्रह्मण्यो वृ
द्धसेवकः शरण्यः सर्वभूतानां मानदो दीनवत्सलः १६ मातृभक्तिः परस्त्रीषु पत्न्यामर्ध इ
वात्मनः प्रजासु पितृवत्स्निग्धः किंकरो ब्रह्मवादिनां १७ देहिनामात्मवत्प्रेष्ठः सुहृदां नंदव
र्धनः मुक्तसंगप्रसंगोयं दंडपाणिरसाधुषु १८ अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ
आत्मा कलयावतीर्णः यस्मिन्नविद्यारचितं निरर्थकं पश्यंति नानात्वमपि प्रतीतं १९ ६२॥

यत् यस्मात् रंजयिष्यति थ अथ तस्मात् मनोरंजनैः हेतुभिः अमुं राजानं आहुः मनोरंजनकैरिति चेष्टितविशेषणं वा
१५ मातरि व भक्तिः भजनं यस्य आत्मनः देहस्य अर्धमिव पत्न्यां प्रीतिमान् १६।१७ नंदिं सुखं वर्धयतीति तथा मुक्तसं शो
गेषु प्रकृष्टः संगो यस्य दंडपाणिरिवेति अपराधानुपेक्षणमुच्यते नादंड्यमित्यत्र तु पक्षपाताभाव उक्तः १८ अयं ४६
स्तिति तुशब्देन निरूपमत्वं

ईश्वरांतानानात्वमपि तत्प्रतीतं यस्मिन् आत्मा भासो कौतिकयित २

आउदयाद्रेः तत्पर्यंतं गोप्ता गोपायिष्यति तदर्थं पर्यस्यते पर्यटिष्यति प्रदक्षिणीकरीष्यतीत्यर्थः २० अस्मै तथा
प्रदक्षिणं कुर्वते मंस्यंते ज्ञास्यंति तस्य यशः उद्धरंत्यः कीर्तयंत्यः २१ इंद्र इव अद्रीन् विभिंदन् २२ लांगूलं
उन्नमय्य यथा मृगेंद्रः चरति तथा धनुः विस्फूर्जयन् यदा क्ष्मां अचरत् यत्र प्रादुरभावि प्रादुर्भूता कर्मकर्तरि
विण् तत्र अहार्षीत् २३ विश्रुताः विक्रमाः यस्य गाथाः प्रबंधान् २५।२६ उपगीयमानः अनुभावः यस्य २७
अयं भुवो मंडलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो
यथार्कः २० अस्मै नृपालाः किल तत्र तत्र बलिं हरिष्यंति सलोकपालाः मंस्यंत एषां स्त्रिय आदिराजं च
क्रायुधं तद्यश उद्धरंत्यः २१ अयं महीं गां दुदुहेधिराजः प्रजापतिर्वृत्तिकरः प्रजानां योलीलयाद्रीन्स्वशरास
कोट्या भिंदन्समां गामकरोद्यथेंद्रः २२ विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ ॥
तदा निलिल्युर्दिशि दिश्यसंतो लांगूलमुद्यम्य यथा मृगेंद्रः २३ एषोश्वमेधान् शतमाजहार सरस्व
ती प्रादुरभावि यत्र अहार्षीद्यस्य हयं पुरंदरः शतक्रतुश्चरमे वर्तमाने २४ एष स्वसद्मोपवने स
मेत्य सनत्कुमारं भगवंतमेकं आराध्य भक्त्यालभतामलं तत् ज्ञानं यतो ब्रह्म परं विदंति २५ तत्र तत्र
गिरस्तास्ता इति विश्रुतविक्रमः श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथुपराक्रमः २६ दिशो विजित्याप्र शो
तिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः सुरासुरेंद्रैरुपगीयमानमहानुभावो भविता पतिर्भुवः २७
इति श्रीभा॰ चतुर्थस्कंधे षोडशोध्यायः मैत्रेय उवाच एवं स भगवान्वैन्यः ख्यापितो गुणकर्मभिः।
छंदयामास तान्कामैः प्रतिपूज्याभिनंद्य च १
ततः स सप्तदशे लोकक्षुधाः प्रजा मेयन् पृथुः ग्रस्तबीजां महीं हंतुं यत्ताभीत्या स्तुत्या स्तुतः छंदयामासतोषि
तवान्

भा॰च॰
४७

श्रेष्ठान् अमात्यान् पुरोधसः पुरोहितान् श्रेणीः तैलिकतांबूलकारीन् पौरविशेषान् प्रकृतीः नियोगि
नः २ दोहनं पात्रं मेध्यं पवित्रं अर्हं ३।४ सविज्ञानं अपरोक्षज्ञानसहितं ५ पूर्वदेहः पृथ्ववतारः तत्कथाश्रयं

ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः पौरान्जानपदान्श्रेणीः प्रकृतीः समपूजयत् २
विदुरउवाच कस्माद्दधारगोरूपंधरित्रीबहुरूपिणी यांदुदोहपृथुस्तत्रकोवत्सोदोहनंचकिं ३
प्रकृत्याविषमादेवीकृतानेनसमाकथं तस्यमेध्यंहयंदेवः कस्यहेतोरपाहरत् ४ सनत्कुमारा
द्भगवतोब्रह्मन्ब्रह्मविदुत्तमात् लब्ध्वाज्ञानंसविज्ञानंराजर्षिःकांगतिंगतः ५ यच्चान्यदपि
कृष्णस्यभगवान्भगवतःप्रभो श्रवःसुश्रवसःपुण्यंपूर्वदेहकथाश्रयं ६ भक्तायमेऽनु
रक्तायतवचाधोक्षजस्यच वक्तुमर्हसियोऽदुह्यद्वैन्यरूपेणगामिमां ७ सूतउवाच चोदितोविदुरे
णैवंवासुदेवकथांप्रति प्रशस्यतंप्रीतमनामैत्रेयःप्रत्यभाषत ८ मैत्रेयउवाच यदाभिषिक्तः
पृथुरंगविप्रैरामंत्रितोजनतायाश्चपालः प्रजानिरन्नेक्षितिपृष्ठएत्यक्षुत्क्षामदेहाःपतिमभ्यवोचन् ९

६।७।८। सुश्रवः यस्य अदुह्यत दुग्धवान् जनतायाः त्वंपालः इति आमंत्रितः नियुक्तः तदा निरन्ने क्षितितले सति
क्षुधा क्षामाः क्षीणाः देहाः यासां ताः प्रजाः एत्य पतिं पृथुं अनुब्रुवन् ९ ६।७।८।९

श्री॰
४७

जाठरेण अग्निना अभितप्ताः यः साधितः विप्रैः मथनेन संपादितः तं त्वां शरणं याताः १० तत् तस्मात्
नः अस्माकं अन्नरातवे रातुं दातुं ईहतु ईहितां यत्नं करोतु उज्झितोर्जाः त्यक्ताः न्नाः सत्यः वार्तायाः जीवि

वयंराजन्जाठरेणाभितप्तायथाग्निनाकोटरस्थेनवृक्षाः त्वामद्ययाताःशरणंशरण्यंयःसाधि
तोवृत्तिकरःपतिर्नः १० तन्नोभवानीहतुरातवेन्नंक्षुधार्दितानांनरदेवदेव यावन्ननंक्ष्याम
हउज्झितोर्जावार्तापतिस्त्वंकिललोकपालः ११ मैत्रेयउवाच पृथुःप्रजानांकरुणंनिशम्य
परिदेवितं दीर्घंदध्यौकुरुश्रेष्ठनिमित्तंसोऽन्वपद्यत १२ इतिव्यवसितोबुद्ध्याप्रगृहीतशरास
नः संदधेविशिखंभूमेः क्रुद्धस्त्रिपुरहायथा १३ प्रवेपमानाधरणीनिशाम्योदायुधंचतं ॥
गौःसत्यपाद्रवद्भीतामृगीवमृगयुद्रुता १४ तामन्वधावत्तद्वैन्यः कुपितोऽत्यरुणेक्षणः शरं
धनुषिसंधाययत्रयत्रपलायते १५ सादिशोविदिशोदेवीरोदसीचांतरंतयोः धावंतीतत्रतत्रैनंद
दर्शानूद्यतायुधं १६ लोकेनाविंदतत्राणंवैन्यान्मृत्योरिवप्रजाः त्रस्तातदानिववृतेहृदयेनविदूयता १७
उवाचचमहाभागधर्मज्ञापन्नवत्सल त्राहिमामपिभूतात्मन्भूतानेवास्थितोमहान् १८

कायाः पतिः ११ परिदेवितं विलापं निमित्तं हेतुं अन्वपद्यत ज्ञातवान् १२ पृथिव्या ओषधीः बीजानि ग्रस्ता
नीति १३ निश्चितवान् मृगयुना द्रुता अनुगता मृगीव १४।१५ रोदसी द्यावापृथिव्यौ तयोः अंतरं अंतरि
क्षं अनुपश्यत उद्यतं आयुधं यस्य तं १६।१७।१८ श्रीरामः शरणं ममेति परमो मंत्रोयमष्टाक्षरः ६०

भा॰ च॰ यः धर्मज्ञ इति मतः सभवान् योषां मां कथं अहनिष्यत् हनिष्यति १९।२० अजरं दृढं धास्यसि धारयिष्यसि २१
४८ बर्हिषि यज्ञ्याभवती देवतारूपेण भागं हुंक्ते भजते वसुधान्यादिकं २२ गोरूपेण यवसं तृणं जग्धि अत्ती
त्यर्थः पयस्तु नैव दोग्धि दुग्धं न स्रवती अत्र अपराधे २३ आत्मनि देहे रुद्धानि २४ मद्वधे सर्वथा अ

सत्त्वं जिघांससे कस्माद्दीनाम् अकृतकिल्बिषां अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः १९ प्रहरंति
न वै स्त्रीषु कृतागस्वपि जंतवः किमुत त्वद्विधा राजन् करुणा दीनवत्सलाः २० मां विपाट्याजरां
नावं यत्र विश्वं प्रतिष्ठितं आत्मानं च प्रजाश्चेमाः कथमंभसि धास्यसि २१ पृथुरुवाच वसुधे त्वां
हनिष्यामि मच्छासनपराङ्मुखीं भागं बर्हिषि या वृङ्क्ते न तनोति च नो वसु २२ यवसं जग्ध्यनुदि
नं नैव दोग्ध्यौधसं पयः तस्यामेवं हि दुष्टायां दंडो नात्र प्रशस्यते २३ त्वं खल्वोषधिबीजा
नि प्राक्सृष्टानि स्वयंभुवा न मुंचस्यात्मरुद्धानि मामवज्ञाय मंदधीः २४ अमूषां क्षुत्प
रीतानां निशाम्य परिदेवितं शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा २५ पुमान् योषि
दुत क्लीब आत्मसंभावनो धमः भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः २६ त्वां स्तब्धां दुर्मदां नी
त्वा मायागां तिलशः शरैः आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः २७ छ श्रीराम : ने॰

त्वं तस्याहिति चेत् अत आह अमूषां प्रजानां मेदसा मांसेन २५ यदुक्तं योषां कथं हनिष्यतीति तत्राह द्
पुमानिति तस्य वधः अवध एव २६ यत्तु उक्तं कथं अंभसी धास्यतीति तत्राह त्वामिति तिलशः तिलशो
प्रमाणानि खंडानीति एवंभूतां अवस्थां नीत्वा २७ श्री श्री छ श्री छ श्री: ४८

मन्युमयीं मूर्तिं बिभ्रतं कृतांतं तुल्यत्वं उच्यते तेन कृतांतस्य मन्युमयीं मूर्तिं इति २८ शुद्धसत्त्वतनुं देवमक
स्मादतिदारुणां वीक्षणा पृथुं पृथ्वी तु श्लवकरुणोक्तिभिः मायया विन्यस्ताः रचिताः नानाचोराः इति तनवः येनगु
णीमयत्वेन प्रतीयमानाय वस्तुतस्तु निर्धूताः निरस्ताः द्रव्यक्रियाकारकेषु अधिभूताध्यात्माधिदैवेषु यः

एवं मन्युमयीं मूर्तिं कृतांतमिव बिभ्रतं प्रणता प्रांजलिः प्राह मही संजातवेपथुः २८ धरोवाच ॥
नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने नमः स्वरूपानुभवेन निर्धुतद्रव्य
क्रियाकारकविभ्रमोर्मये २९ येनाहमात्मायतनं विनिर्मिता धात्रा यतोयं गुणसर्गसंग्रहः स
एव मां हंतुमुदायुधः स्वराडुपस्थितोन्यं शरणं कमाश्रये ३० य एतदादौ व्यसृजच्चराचरं स्व
माययात्माश्रययाविवतर्क्यया तयैव सोयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति ३१

विभ्रमः अहंकारः तन्निमित्ताः ऊर्मयः रागद्वेषादयश्च यस्मिन् तस्मै २९ अहो सर्वजीवाश्रयत्वेन सृष्टां मां क
थं हंतुं प्रवर्तते इत्याह येन विधात्रा आत्मनां जीवानां आयतनं अहं विनिर्मिता यतः यस्मात् अपि गुण
सर्गस्य चतुर्विधभूतग्रामस्य संग्रहः धारणा स्वराट् स्वतंत्रः ३० सृष्टिसंहारकर्तृकः अहमेवेति चेत्
तथापि प्रजापालने प्रवृत्तस्य मद्वधः अनुचित एवेत्याह य एतदादिति आत्माश्रयया जीवविषयिण्या ३१

[illegible]

भा॰च॰४
४९

अतः हेतुर्विलेयं ईश्वरचेष्टितमित्याह नूनमिति अकृतात्मभिः विक्षिप्तचित्तैः यः ईश्वरः स्वतंत्रः अकरोत् ब्रह्माणं पर
तरति तेन ब्रह्मणा चराचरं अकारयत् यश्च स्वतंत्रः एकः परतः मायया अनेकः ३२ तस्मात् आविंसशक्तये केर
लं नमस्त्याह सर्गादीति सर्गादि जन्मस्थितिभंगं अस्य जगतः अनुरूपाः अनुवर्तते करोति द्रव्याणि महाभूता
नि क्रियाः इंद्रियाणि कारकाः देवाः चेतना बुद्धिः आत्मा अहंकारः तैः स्वशक्तिरूपैः समुन्नद्धाः समुकटा निरु
द्धाः शक्तयः यस्य ३३ प्राणिनां धारणार्थं रसातलात् उद्धृत्य इदानीं प्रजारक्षणे प्रवृत्तस्य मद्ध्यान युक्त इति सकरुणा
मा [illegible] ह द्वाभ्यां हे अजय स दृष्टवान् स एव मां भवान् स्वनिर्मितं चराचरं जगत् सम्यक् स्थापयितुं आदिसूकरः
नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जयया ऽकृतात्मभिः न लक्ष्यते यस्त्वकरोदकारयद्योनेक एक
कः परतश्च ईश्वरः ३२ सर्गादियोस्यानुरुणाद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः तस्मै समुन
द्धनिरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे ३३ स वै भवानात्मविनिर्मितं जगत् भूतेंद्रियांतः करणात्म
कं विभो संस्थापयिष्यन्नज मां रसातलादभ्युज्जहारांभस आदिसूकरः ३४ अपामुपस्थे मयि नाव्य
वस्थिताः प्रजा भवानद्य रिरक्षिषुः किल स वीरमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांससि
३५ नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरय
शस्करेभ्यः ३६ इति श्रीभागवते महापुराणे चतुर्थस्कंधे सप्तदशोध्यायः १७
स त्वं मां अभ्युज्जहार ३४ स एव धराधरः वराहः अद्य अपां उपस्थे उपरि मयि नावि आ[illegible] धारभूतायां अवस्थिताः प्रजाः
रक्षितुं इच्छुः वीरमूर्तिः पृथुरूपः समभूत् यः एवंभूतः सः त्वं पयसि निमित्ते मां जिघांससि इति चित्रमित्यर्थः ३५ तस्मा
त् ईश्वरचेष्टितं दुर्ज्ञेयमिति केमुत न्यायेन उपसंहरति नूनमिति तस्य ईश्वरस्य गुणसर्गरूपया मायया मोहितचि
त्तमेव येषां मोहितानि चित्तवर्त्मानि येषामिति वा तैः जनैः ईश्वराणां हरिभक्तानामपि तावत् ईहितं न ज्ञायते किं पुनः
अष्टादशोमहीवाक्यादुत्सपात्रादिभिः हृतः इत्यादिभिस्तु क्रमशः सा वसुंधा लितीर्यते हे अभिभो प्रभो यद्वा भो देव अ
क्षि अक्षयं यथा भवत्येवं मत्युं सान्त्वयच्छ आरितं विज्ञापितं न चमद्वाक्ये अनादरः कर्तव्य इत्याह बुधो हि सर्वतः सार
आदत्ते ३ मयि जीर्णाः ओषधीः उपायेन गृहाणेति वक्तुं उपायेन सर्वं सिध्यति नान्यथेत्याह अस्मिन्निति त्रिभिः पुं
सां श्रेयसः पुरुषार्थस्य प्रसिद्ध्यै अस्मिंल्लोके कृष्यादयः अमुष्मिंश्च लोके अग्निहोत्रादयः योगाः उपायाः दृष्टाः
मैत्रेय उवाच इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरं पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना १ धरोवा॰
संनियच्छाभिभो मन्युं मे निबोध श्रावितं च मे सर्वतः सारमादत्ते यथा मधुकरो बुधः २ अस्मिन्लोकेथवा
मुष्मिन्मुनिभिस्तत्त्वदर्शिभिः दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयः प्रसिद्धये ३ तानातिष्ठति यः सम्य
गुपायान्पूर्वदर्शितान् अवरः श्रद्धयोपेत उपायान्विंदते ञ्जसा ४ ताननादृत्य यो विद्वानर्थानारभ
ते स्वयं तस्य व्यभिचरंत्यर्था आरब्धाश्च पुनः पुनः ५ पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशांपते
भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः ६ अपालितानादृता च भवद्भिर्लोकपालकैः चोरीभू
ते थ लोके हं यज्ञार्थे ग्रसमोषधीः ७ नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा तत्र दृष्टेन योगेन
भवानादातुमर्हति ८ वत्सं कल्पय मे वत्स येनाहं वत्सला तव धोक्ष्ये क्षीरमयान्कामाननुरूपं च दोहनं ९
प्रयुक्ताः अनुष्ठिताश्च पूर्वैः दर्शितान् अर्वाचीनः ४ अविद्वान् विद्वानपीति वा व्यभिचरंति नासिध्यंति ५ सृष्टे
त्युपायमहापुरतिषद्भिः ६ भवद्भिरिति राजसामान्याभिप्रायेण अपालित चोराधनिवारणात् अनाद
तत्वं प्रवर्तनाभावात् यज्ञार्थे अग्रसं गिलितवती अन्यथा [illegible] श्रेयसादयः तस्मि

४९

भा॰ स्कं॰ ४ अतः त्वं उपकल्पय या धोक्ष्ये प्रपूरयिष्यामि भूतानां ईप्सितं ऊर्ज... ...नतेपिवपि
४९ तम: वर्तेत ११।१२ प्रसंगात् अर्थांतरमाह तथेति यथेति यथापृथुः एवं सर्वत्र राजपरोपि सारं आददत्तम

दोग्धारंचमहाबाहोभूतानांभूतभावन अन्नमीप्सितमूर्जस्वत्भगवान्वांछतेयदि १० समां
चकुरुमांराजन्देववृष्टंयथापयः अपर्तावपिभद्रंतेउपावर्ततमेप्रभो ११ इतिप्रियंहितं
१३ वाक्यंभुवआदायभूपतिः वत्संकृत्वामनुंपाणावदुहत्सकलौषधीः १२ तथापरेचसर्वत्रसा
रमाददतेबुधाः ततोन्येचयथाकामंदुदुहुःपृथुभाविताम् १३ ऋषयोदुदुहुर्देवीमिंद्रियेष्व
थसत्तम वत्संबृहस्पतिंकृत्वापयश्छंदोमयंशुचि १४ कृत्वावत्संसुरगणाइंद्रंसोममदूदुह
त् हिरण्मयेनपात्रेणवीर्यमजोबलंपयः १५ दैतेयादानवावत्संप्रह्लादमसुरर्षभं विधायो
दूदुहन्क्षीरमयःपात्रेसुरासवं १६ गंधर्वाप्सरसोधुक्षन्पात्रेपद्ममयेपयः वत्संविश्वावसुं
कृत्वागांधर्वंमधुसौभगं १७

मनुर्वर्णयातिततः अन्येचऋष्यादयः पंचदशदुदुहुः पृथुनांभावितांवशीकृतां १३ देवीं पृथ्वीं वा... इं
द्रियेषु श्रवणेः वेदग्रहणात् इंद्रियाणांपात्रत्वं १४ सोमंअमृतं वीर्यंमनः शक्तिं ओजः इंद्रियशक्तिंबलं टीको
देहशक्तिंचतद्रूपंपयः १५ सुरांच आसवंचतालादिमयं १६ मधुवाङ्माधुर्यं सौभगं सौंदर्यं तत्सहितं १७ ५०

कव्यंपितृणांअन्नं आमपात्रे अपक्वेमृन्मये अधुक्षत दुदुहुः १८ संकल्पनामयींअणिमादिसिद्धिं येविद्याधरादयःते
चतमेववत्सं प्रकल्प्य नभसिखपात्रे खेचरत्वादिरूपां विद्यांदुदुहुः १९ अन्येचकिंपुरुषादयः अंतर्धानेन अद्भु

वत्सेनपितरोर्यम्णाकव्यंक्षीरमधुक्षत आमपात्रेमहाभागाश्श्रद्धयाश्राद्धदेवताः १८ प्रकल्प्यव
त्संकपिलंसिद्धाःसंकल्पनामयीं सिद्धिंनभसिविद्यांचयेचविद्याधरादयः १९ अन्येचमायिनो
मायामंतर्धानाद्भुतात्मनां मयंप्रकल्प्यवत्संतेदुदुहुर्धारणामयीं २० यक्षरक्षांसिभूतानिपि
शाचाःपिशिताशनाः भूतेशवत्सादुदुहुः कपालेक्षतजासवं २१ तथाहयोदंदशूकाःसर्पा
नागाश्चतक्षकं वत्संविधायदुदुहुर्बिलपात्रेविषंपयः २२ पशवोयवसंक्षीरंवत्संकृत्वाचगो
वृषं अरण्यपात्रेचाधुक्षन्मृगेंद्रेणचदंष्ट्रिणः २३ क्रव्यादाःप्राणिनःक्रव्यंदुदुहुःस्वेकलेवरे॥
सुपर्ण...वत्साविहगाश्चरंचाचरमेवच २४ वटवत्सावनस्पतयःपृथग्रसमयंपयः गि
रयोहिमवद्वत्सानानाधातून्स्वसानुषु २५

तात्मनांसंबंधिनीं मायांधारणामयीं संकल्पमात्रप्रभवां २० भूतेशः रुद्रः सएववत्सोयेषां क्षतजंरुधिरं
तदेवआसवं २१ अहयः निष्फणाः दंदशूकाः वृश्चिकादयः सर्पाः सफणाः तेएव कद्रुसंततिजाः नागाः
बिलपात्रेमुखे २२ यवसं तृणं गोवृषं बलीवर्दं वा हंसं वृषभं मृगेंद्रेण सुकरिणान्वयः २३ क्रव्यंमांसं चरंकीटादि अचरंफलादि २४

सजः ईहा: यस्यपरम: उरय: अभिवृद्धि: यस्मिन तत्कर्म असूयन नसहमान: प्रतिघातं विघ्नंचकार
भा·च·८ अर्थे: १० वैन्ये यज्ञ: पतिं विलुयज्ञमानेसति स्पर्धमान: इंद्र: तिरोहित: सन तंअश्वं अपहृतवान ११ त्वरमाणे
४० यावंतं आमुक्त प्रतिमुक्तश्चापिनद्धश्चापिनद्धवत सन्नद्धो वार्मित: सक्तः इत्यमर: पारवंडवेषं कवचामिव गृह्णी
तवंतमित्यर्थ: अधर्मेधर्म विभ्रमः धर्मोयमितिभ्रांतिकर: यत: १२।१३ नमुंचतिस्म हंतवे हंतुं यज्ञहनं ये

इति वाचोक्षजे राम... कर्म परमोदयं असूयन्भगवानिंद्र: प्रतिघातमचीकरत १० चरमेण
श्वमेधेनयज्ञं सर्वकामदुघ: वैन्ययज्ञपशुंस्पर्धन्न पोवाहतिरोहित: ११ तमत्रिर्भगवानैक्षत्त्वरमाणं वि
हायसा आमुक्तमिव पाखंडमधर्मेधर्मविभ्रमः १२ अत्रिणा चोदितो हंतुं पृथुपुत्रो महारथः॥
अन्वधावत संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत १३ तं तादृशाकृतिं वीक्ष्य मेने धर्मं शरीरिणं जटि
लं भस्मनाच्छन्नं तस्मै बाणं नमुंचति १४ वधान्निवृत्तं तं भूयो हंतवेऽत्रिरचोदयत जहि यज्ञहनं ता
त महेंद्रं विबुधाधमं १५ एवं वैन्यसुत: प्रोक्तस्त्वरमाणं विहायसा अन्वद्रवदभिक्रुद्धो रावणं
गृध्रराडिव १६ सोश्वं रूपं च तद्धित्वा तस्मा अंतर्हित: स्वराट् वीर: स्वपशुमादाय पितुर्यज्ञमुपेयि
वान १७ तत्तस्य चाद्भुतं कर्म विचक्ष्य परमर्षय: नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो १८ उप
सृज्य तमस्तीव्रं जहाराश्वं पुनर्हरि: चषालरूप तच्छन्नो हिरण्यरशनं विभु: १९

चषाल
तं हतवंतं १४।१५।१६ तस्मै हित्वा तदर्थं उत्सृज्य १७ विचक्ष्य दृष्ट्वा १८ उपसृज्य सृष्ट्वा तेन छन्न: सन च
यूपाग्रे निक्षिप्त: काष्ठकटक: तद्युक्तात यूपात हिरण्यनिर्मिता रशना यस्य तं रशनाया: छन्नत्वेन छेदाश

वालख्याना महितमवउपयस्य मखायागहीती
नगानिहरार्थः विभुः समर्थः १८।२०॥

५२

56

...द्धिः यस्मिन् तत्कर्मः ...
...यान: इद्धः निरो...
...भ्रतःस...

भा·द्वा· श्रीगणेशायनमः श्रीसप्तकोटीश्वरायनमः जयंतिश्रीपरानंद ... द्दृशः यान्निस्मनुवर्तंतेसंपदोविगताद्दृशः
१ उक्तस्त्रयोदशाध्यायेद्वादशोवाश्रयः सतः अधिष्ठानावधि ... १२।१२ ... तःस्तः २ उक्तोलयावधित्वेनप्राकृता
१ संतिकालये अधिष्ठानतयाचोक्तोमहापुरुषवर्णने ३ तत्रादौषड्भिर्यायैः कुरुकः प्राहपरीक्षिते शेषैस्तत्रखिलान्या
हसूतः पृष्टोथसत्रिभिः व्याश्रयः श्रवणेकार्योनविलंबोमनीषिणा इत्येष्यत्कालवैषम्यं चतुर्भिस्ताव्दुच्यते ५ तत्रतु
प्रथमेभाविमागधान्वयान्तृमिपान् कलिप्रभावतः प्राहसंकरादिमलीमसान् ६ एवंकृते सोमवंशे मुकुंदस्वैरक्रीडावर्णि

ॐ नमोभगवतेवासुदेवाय राजोवाच स्वधामानुगतेकृष्णे यदुवंशविभूषणे कस्यवंशोऽभवत्पृथ्व्यामे
तदाचक्ष्वमेमुने १

तार्थोसएव वंशोभावीवर्ण्यते कृष्णभक्तिं मुक्तामुक्त्येवर्त्मनास्तीतिवक्तुं ~ तदेवंवैवस्वतमनुवंशे सोमवंशप्रस्तावेनश्री
कृष्णावतारचरितानिप्रपंचमनुवर्णितानि अथेदानींभाविसोमवंशः कलौविजातीयसंकरादिमलीमसोवैराग्यद्वाराश्रीकृ
ष्णैकभक्तिनिगमनाय अनुवर्ण्यते तत्रतु सोमवंशशाखासु चिरकालानुवर्तितया मागधवंशोनुकृष्यते तत्रपुरोर्वंशे उपरि १
चरोवसुस्तस्य बृहद्रथः तस्यजरासंधः तस्यसहदेवः पुत्रोभूदित्युक्तं नवमस्कंधे तत्रैवसहदेवान्मार्जारिस्ततः श्रुतश्रवाद्यस्मा
दयोरिपुंजयांताविंशतिर्भाविनोराजानो निरूपितास्तदुपरितनं वंशं संकरादिदोषैः प्रपंचयति १ श्रीकृष्णः शरणंमम
× नविगताआर्दृष्टद्दृष्टिकृशानं याभिस्ताः विशिष्टेवविगता आसमंतात् दृक्दर्शनंयासांताः निरुपमाइत्यर्थः ~

६ नंदिवर्द्धनआजेयोमहानंदिस्तुतत्सुतः ६

योंत्यइति रिपुंजयएवपुरंजयः स्वामिनंपुरंजयंहत्वा स्वपुत्रंप्रद्योतंराजानंकरिष्यति यस्यपालकोनामसुतोभविष्यति २।२ प्रद्योतनाः प्रद्योतसं
ज्ञाः ४।८ नंदोनामकश्चिमहापद्मसंख्यायाः धनस्यवापतिर्भविष्यति अतएवमहापद्मइत्यपितस्यनाम ९ एकमेवछत्रंयस्यांतांपृथिवीं १३

श्रीशुकउवाच योंत्यः पुरंजयोनामभाव्योबार्हद्रथोनृपः तस्यामात्यस्तुशुनको हत्वास्वामिनमात्मजं २ प्रद्योतसंज्ञं
राजानं कर्तायत्पालकः सुतः विशाखयूपस्तत्सुतोभविताराजकस्ततः ३ नंदिवर्धनस्तत्सुत्रेपंचप्रद्योतनाइमे अष्टत्रिंशो
त्तरशतंभोक्ष्यंतिपृथिवींनृपाः ४ शिशुनागस्ततोभाव्यः काकवर्णस्तुतत्सुतः क्षेमधर्मातस्यसुतः क्षेत्रज्ञः क्षेत्र[illegible]धर्मजः
५ विधिसारः सुतस्तस्याजातशत्रुर्भविष्यति दर्भकस्तत्सुतोभावीदर्भकस्याजयः स्मृतः ६ शैशुनागादशैवैतेषष्ठ्युत्त
रंशतत्रयं समाभोक्ष्यंतिपृथिवींकुरुश्रेष्ठकलौनृपाः ७ महानंदिसुतोराजन्शूद्रीगर्भोद्भवोबली महापद्मइतिख्या
तोनंदः क्षत्रविनाशकृत् ततोनृपाभविष्यंतिशूद्रप्रायास्त्वधार्मिकाः सएकछत्रांपृथिवीमनुल्लंघितशासनः शासिष्यति
महापद्मोद्वितीयइवभार्गवः ~ नवनंदान्द्विजः कश्चि तस्य चाष्टौभविष्यंतिसुमाल्यप्रमुखाः सुताः यइमांभोक्ष्यंतिमहीं
राजानः स्मशतंसमाः नवनंदान्द्विजः कश्चित्प्रपन्नानुद्धरिष्यति ११ तेषामभावेजगतींमौर्याभोक्ष्यंतिवैकलौ सएव
चंद्रगुप्तंवैद्विजोराज्येभिषेक्ष्यति १२ तत्सुतोवारिसारस्तु ततश्चाशोकवर्धनः सुयशाभवितातस्यसंगतः सुयशः सुतः १३

शासिष्यतिप्रतिपालयिष्यति क्षत्रोत्सादनेदृष्टांतः परशुरामइव १० ... वित्सरान् ११ नवनंदान्नंदंचतत्सुतांश्चेसेवं
नवप्रपन्नान् विख्यातान्वाद्विजः कौटिल्यवात्स्यायनादिपर्यायश्चाणक्य उद्धरिष्यति उन्मूलयिष्यति मौर्याः मौर्यसंज्ञाताः १२

[illegible] १३

भा० द्वा० २

तेषांप्रथमोदशरथःपराशरादिभिरुक्तोत्राप्यनुसंधेयः तेनसहमौर्याः ... त्रिंशोत्तरंशतंसमाः १५।१६।१७। बृहद्रथस्यसेनाप
तिः पुष्यमित्रोनामस्वामिनंहत्वाराज्यंकरिष्यति सचशुंगानांप्रथमः ततोग्निमित्राद्यान्वेतेदशशुंगाः दशवर्षशताधिकंद्वाद
शाधिकंवर्षशतं १८ कथंकण्वान्यास्यतितदाह शुंगमिति परस्त्रीव्यसनिनंदेवभूतिनामानंशुंगंहत्वातदमात्योवसुदेवनामा

शालिशूकस्ततस्तस्यसोमशर्माभविष्यति शतधन्वाततस्तस्यभविताबृहद्रथः १४ मौर्याह्येतेदशनृपाःसप्तत्रिंशच्छ
तोत्तरं समाभोक्ष्यंतिपृथिवींकलौकुरुकुलोद्वह १५ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठोथभविष्यति वसुमित्रोभद्रक
श्चपुलिंदोभवितासुतः १६ ततोघोषःसुतस्तस्माद्वज्रमित्रोभविष्यति ततोभागवतस्तस्माद्देवभूतिरितिश्रुतः १७
शुंगादशैतेभोक्ष्यंतिदशवर्षशताधिकं ततःकण्वानियंभूमिर्यास्यत्यल्पगुणान्नृप १८ शुंगंहत्वादेवभूतिंकण्वोमात्य
स्तुकामिनं स्वयंकरिष्यतेराज्यंवसुदेवोमहामतिः १९ तस्यपुत्रस्तुभूमित्रस्तस्यनारायणःसुतः कण्वायनाइमे
भूमिंचत्वारिंशच्चपंचच २० शतानित्रीणिभोक्ष्यंतिवर्षाणांचकलौयुगे हत्वाकाण्वंसुशर्माणंतद्भृत्योवृषलोबली
२१ गांभोक्ष्यत्यंध्रजातीयःकंचित्कालमसत्तमः कृष्णनामाथतद्भ्राताभवितापृथिवीपतिः २२ श्रीशांतक
र्णस्तत्पुत्रःपौर्णमासस्तुतत्सुतः लंबोदरस्तुतत्पुत्रस्तस्माच्चिबिलकोनृपः २३ मेघस्वातिश्चिबिलकादटमा
मानस्तुतस्यच अनिष्टकर्माहालेयस्तलकस्तस्यचात्मजः २४ पुरीषभीरुस्तत्पुत्रःस्ततोराजसुनंदनः चको
रोवटकोयत्रशिवस्वातिररिंदम २५ श्रीरामःशरणंमम श्रीकृष्णार्पणमस्तु
कण्वोराज्यंकरिष्यति १९ कण्वानांचतुर्थःसुशर्माइमेवसुदेवादयःकण्वायनाः वर्षाणांत्रीणिशतानिपंचचत्वारिंशद्वर्षाणि
चभूमिंभोक्ष्यंति २० कण्वानामंतिमंसुशर्माणंहत्वावलिहिकनामातद्भृत्योगांभोक्ष्यति २१।२२।२३।२४ यत्रयेषुबहुः

... नामाभविता ... शिवस्वातिनामा ... वमः ...

श्री० २

२६। २७ आवभृत्याःअवभृतिर्नगरीतद्राजानः २८ २९ एतेआभीरादयोमौनव्यतिरिक्ताःपंचषष्टिनृपाःएकोनशताधिकंवर्षे
सहस्रंपृथिवींभोक्ष्यंतितनः पूर्वोक्ताएवएकादशमौनाः त्रीण्यब्दशतानिक्षितिंभोक्ष्यंतेःसंस्थितेतेषुमौनेषुस्तेषुकिलिकि
लायांपुर्यांनृपतयोभविष्यंतीत्युत्तरेणान्वयः ३० अधिकानिषड्वर्षाणि ३१ तेषांभूतनंदादीनांयथायथंबाल्हिकास्त

तस्यापिगोमतीपुत्रःपुरीमान्भविताततः मेदशिराःशिवस्कंदोयज्ञश्रीस्तत्सुतस्ततः २६ विजयस्तत्सुतोभाव्यश्चंद्र
विज्ञःसलोमधीः एतेत्रिंशन्नृपतयश्चत्वार्यब्दशतानिच २७ षट्पंचाशच्चपृथिवींभोक्ष्यंतिकुरुनंदन सप्ता
भीराआवभृत्यादशगर्दभिनोनृपाः २८ कंकाःषोडशभूपालाभविष्यंत्यतिलोलुपाः ततोष्टौयवनाभाव्याश्चतु
र्दशतुरुष्कराः २९ भूयोदशगुरुंडाश्चमौनाएकादशैवतु एतेभोक्ष्यंतिपृथिवींदशवर्षशतानिच ३० नवाधिकां
चनवतिंमौनाएकादशक्षितिं भोक्ष्यंत्यब्दशतान्यंगत्रीणितैःसंस्थितेततः ३१ किलिकिलायांनृपतयोभूतनंदोथवंगि
रिः शिशुनंदश्चतद्भ्रातायशोनंदिःप्रवीरकः ३२ इत्येतेवैवर्षशतंभविष्यंत्यधिकानिषट् तेषांत्र
योदशसुताभवितारश्चबाल्हिकाः ३३ पुष्यमित्रोथराजन्योदुर्मित्रोस्यतथैवच एककालाइमेभूपाःस
प्तांध्राःसप्तकोशलाः ३४
नामानस्त्रयोदशसुताभविष्यंतिपुष्यमित्रोनामान्योराजन्यःअस्यचदुर्मित्रोनामपुत्रः ३२ तथाआंध्राःकोशलाः
वेदूरपतयःनिषधाश्चएतेचतत्तद्देशानामधिपाःप्रख्याताःस्वल्पकालाःखंडमंडलभूपाततएतेभ्योबाल्हिकेभ्यएवभाव्याविश्वस्फूर्जिः
ष्यंति ३३ ततश्चमागधानांतुराजाविश्वस्फूर्जिर्नामभवितापूर्वोक्तात्पुरंजयादितिप्रसिद्धःसन्वर्णान्ब्राह्म
णादीन्पुलिंदयमद्रकसंज्ञान्म्लेच्छप्रायान्करिष्यतिअथसच ... अन्यान्पुलिंदादिसंज्ञान्वर्णान्करिष्यतीत्यर्थः
३४

भा० द्वा० सचैवं कृत्वा अब्रह्मप्रायिष्ठाः अत्रैवर्ण्यप्रचुराः सतीः प्रजाः स्थापयिष्यति स च पद्मवत्यां पुरि अनुगंगा गंगाद्वारमारभ्य प्रयाग
पर्यंतं गुप्तां पालिता मेदिनीं भोक्ष्यति ३५ तदनंतरं च सौराष्ट्रादिदेशा[illegible]ना द्विजाः व्रात्या उपनयनरहिता भविष्यंति ३६ अब्रह्म
३ वर्चसः वेदाचाररहिताः ३७ इमे च प्रायः स्वस्तिनः तुल्यकाला भविष्यंति [illegible] तेऽसर्वे अधर्मानृतपराः अधर्मे अनृते च पराः निरि

वैदूर्यपतयो भाव्या नैषधास्तत एव हि मागधानां तु भविता विश्वस्फूर्जिः पुरंजयात् ३५ करिष्यत्यपरो वर्णान्पुलिंद
यदुमद्रकान् प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ३६ वीर्यवान्क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि अनुगंगामप्र
यागं गुप्तां भोक्ष्यति मेदिनीं ३७ सौराष्ट्रावंत्याभीराश्च शूद्रा अर्बुदमालवाः व्रात्या द्विजा भविष्यंति शूद्रप्राया
जनाधिपाः ३८ सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ३९ तुल्य
कालाइमे राजन्म्लेच्छप्रायाश्च भूभृतः एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ४० स्त्रीबालगोद्विजघ्नाश्च परदार
धनादृताः उदितास्तमितप्राया अल्पसत्वाल्पकायुषः ४१ असंस्कृताः क्रियाहीना रजसा तमसावृताः प्रजास्ते
भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ४१ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः अन्योन्यतो राजभिश्च क्षयं यास्यं श्री० ४
ति पीडिताः ४२ इति श्रीभागवते महापुराणे द्वादशस्कंधे कोशलराजवंशानुकीर्तनं नाम प्रथमोध्यायः १ २

षिताः फल्गुदा अल्पदातारः ३८ उदितास्तमितप्रायाः हर्षशोकादिव्याकुलाः ३९ असंस्कृताः गर्भाधानादिसंस्काररहिताः सं
ताः प्रजा भक्षयिष्यंति धनाद्यपहारादिना पीडयिष्यंति ४० किं च तन्नाथाः ते नाथा येषां ते जनपदाः देशवर्तिनो मनुष्यास्त
च्छीलाचारवादिनः तेषामिव शीलमाचारो वादश्च येषां ते ४१ इति श्रीमहाभागवते महापुराणे द्वादशस्कंधे कोश०

ती
द्विष्टियेतु कलेर्दोषवृद्धोऽकैश्च चत्वारतः अधार्मिष्ठे जने नष्टे पुनः कृतयुगागमः १ कलधर्मान्प्रपंचयति ततश्चेत्यादिना १
धर्मन्याययोर्व्यवस्थायां बलमेव दांपत्ये पतिभावे अभिरुचिरेव हेतुः न कुलगोत्रादिः व्यावहारिके क्रयविक्रयादौ स्त्रीत्वे
पुंस्त्वे च तयोः श्रेष्ठरति कौशलमेव हेतुः न कुलमाचारो वा ३ आश्रमाणां ख्यातौ ज्ञाने लिंगमेव दंडाजिनादिकं हेतुः

श्रीशुक उवाच ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृतिः १ वित्त
मेव कलौ नॄणां जन्माचारगुणोदयः धर्मन्यायव्यवस्थायां कारणं बलमेव हि २ दांपत्येऽभिरुचिर्हेतुर्मायैव
व्यावहारिके स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ३ लिंगमेवाश्रमख्यातावन्योन्यापत्तिकारणं अव
[illegible]त्त्या न्यायदौर्बल्यं पांडित्ये चापलं वचः ४ अनाढ्यतैवासाधुत्वे साधुत्वे दंभ एव तु स्वीकार एव
चोद्वाहे स्नानमेव प्रसाधनं ५ दूरे वार्ययनं तीर्थं लावण्ये केशधारणं उदरंभरता स्वार्थः सत्यत्वे धार्ष्ट्यमे
व हि ६ दाक्ष्यं कुटुंबभरणं यशोऽर्थे धर्मसेवनं एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमंडले ७ ब्रह्मविट्क्षत्रशूद्राणां
यो बली भविता नृपः प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः ८ आच्छिन्नदारद्रविणा यास्यंति गिरि
काननं शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ९ अनावृष्ट्या विनंक्ष्यंति दुर्भिक्षकरपीडिताः
शीतवातातपप्रावृड्हिमैरन्योन्यतः प्रजाः १० क्षुत्तृड्भ्यां व्याधिभि[illegible]संतापेन च चिंतया त्रिंशद्विंश
तिवर्षाणि परमायुः कलौ नृणां ११ श्रीमज्जगदंबायै नमः

नं ताचारविशेषः अन्योन्यापत्तिकारणं च आश्रमादाश्रमांतरप्राप्तौ च कारणं यद्वा ब्रह्मदकहंसादीनामन्योन्यापत्तौ
नमस्कारादि व्यवहारेण कारणं अवृत्त्या मुद्रार्पणादिदानात्साम
र्थ्येन न्यायदौर्बल्यं पराजयः चापलं वचः वक्रभाषणं ४ असाधुत्वे चार्या
द्यभियोगे च स्नानमेव धनमलंकारः ५ दूरे च तं मान्ये वार्ययनं जलाशयस्तीर्थं
न तु गुर्वादि स्वार्थः पुरुषार्थः ६।७।८ आच्छिन्ना अपहृता दारा द्रविणानि च या
सां ताः आष्टि बीजं ९।१०।११

भा॰ द्वा॰ क्षीयमाणेष्वित्यादीनामुक्तं कलौ गतप्राय इति पंचमेनान्वयः क्षीयमाणेषु अल्पप्रायेषु १२ दस्युप्रायेषु चोरतुल्येषु चौर्यानृत
वृथाहिंसाद्या नानावृत्तयो येषां तेषु १३ छागप्रायासु प्रमाणतः क्षीरतश्च अजातुल्यासु १४ स्थास्नुषु वृक्षेषु विद्युत्प्रायेषु
४ तडिद्दण्डलेषु शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु १५ जनेषु खरधर्मिषु [illegible] इत्थं कलौ गतप्राये समाप्तप्राये १६ एत
त्सप्तचर्यातिचतुर्भिः चराचरगुरोरित्यादि ईश्वरस्यैव धर्मत्राणहेतुः गुरुत्वेश्वरत्वयोरुपपादने अखिलस्य विश्वस्यात्मनः कारणस्येति ए

क्षीयमाणेषु देहेषु देहिनां कलिदोषतः । वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणां १२ पाषंडप्रचुरे धर्मे दस्युप्राये
षु राजसु । चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु १३ शूद्रप्रायेषु छागप्रायासु धेनुषु १४ अणु
प्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु । विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु १५ इत्थं कलौ
गतप्राये जनेषु खरधर्मिषु । धर्मत्राणाय सत्वेन भगवान् अवतरिष्यति १६ चराचरगुरोर्विष्णोरी
श्वरस्याखिलात्मनः । धर्मत्राणाय साधूनां जन्म कर्मापनुत्तये १७ शंबलग्राममुख्यस्य ब्रा
ह्मणस्य महात्मनः । भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति १८ अश्वमाशुगमारुह्य देवदत्तं जगत्प
तिः । असिनाऽसाधुदमनम् अष्टैश्वर्यगुणान्वितः १९ विचरन्नाशुना क्षौण्यां हयेनाप्रतिमद्युतिः ।
नृपलिंगच्छदो दस्यून्कोटिशो निहनिष्यति २० श्रीमज्जगदंबार्पणमस्तु सतां मुदेऽस्तु

वंशः तस्य विष्णोर्जन्म साधूनां धर्मत्राणाय धर्मत्राणस्य प्रयोजनमाह कर्मापनुत्तये मोक्षाय १७ शंबलग्रामे
मुख्यस्य प्रधानस्य नाम्ना विष्णुयशसो ब्राह्मणस्य भवने गृहे १८ धर्मत्राणप्रकारमाह अश्वमिति असाध
दम्यं॰ वेति येन तमश्वमारुह्य असिना दस्यून्कोटिशो निहनिष्यतीत्युत्तरेणान्वयः असाधुदमन इति पाठे कल्किविशेषणं
१९

[illegible] २०

ततश्च पुनः कृतयुगप्रवृत्तिं वक्तुमाह अथेति साधर्ध्यां तेषां पौरजानपदानां मनांसि विशदानि भविष्यंति तत्र हेतुः वासुदेवस्यांगरागेण
क्षि॰ चंदनादिना पुण्यगंधो निलः तस्य स्पृशंतीति तथा तेषां २१ स्थविष्ठः स्थूलः २२ कृतयुगप्रवृत्तिमाह यदावतीर्ण इति प्रजानां सूतिः प्रसूतिः
२३ तदवतारकालोपलक्षणमाह यदा चंद्रश्चेति तिष्यः पुष्यः अयमर्थः चंद्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगः तदा तत्कृतयु
गं भविष्यतीति यद्यपि च प्रतिद्वादशाब्दं कर्कराशौ बृहस्पतौ वर्तमाने द्वित्रामावास्यासु तेषां त्रयाणामपि पुष्ययोगः संभवति तथा

अथ तेषां भविष्यंति मनांसि विशदानि वै । वासुदेवांगरागातिपुण्यगंधानिलस्पृशां २१ पौरजानपदानां वै हतेष्वखिल
दस्युषु । तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति वासुदेवे भगवति सत्वमूर्तौ हृदि स्थिते २२ यदावतीर्णो भगवा
न् कल्किर्धर्मपतिर्हरिः । कृतं भविष्यति तदा प्रजा वासुदेवे सूतिश्च सात्विकी २३ यदा चंद्रश्च सूर्यश्च तथा तिष्यबृहस्प
ती । एकराशौ समेष्यंति तदा भवति तत्कृतं २४ ये तीता वर्तमाना ये भविष्यंति च पार्थिवाः । ते त उद्देशतः प्रोक्ता वंशीयाः सो
मसूर्ययोः २५ आरभ्य भवतो जन्म यावन्नंदाभिषेचनं । एतद्वर्षसहस्रं तु शतं पंचदशोत्तरं २६ श्रीमज्जगदंबायै नमः

पि तेषां सहस्रवर्षो नत्र विवक्षितः समेष्यंतीति वचनात् अतो नातिप्रसंगः २४ एवं नवमस्कंधमारभ्यानुक्रांतैर्वैवस्वतमनोर्वंशद्वयं निगम
यति ये तीता इति उद्देशतः संक्षेपतः २५ कलियुगावांतरविशेषमाह आरभ्येत्यादिना वर्षसहस्रं पंचदशोत्तरं शतं चेति कियाचिद्वि
विवक्षायां वांतरसंख्येयं वस्तुतः परीक्षिन्नंदयोरंतरं द्वाभ्यां न्यूनं वर्षाणां सार्धसहस्रं भवति यतः परीक्षित्समकालं मागधं मार्जारिमा
रभ्य रिपुंजयांता विंशती राजानः सहस्रं संवत्सरं भोक्ष्यंतीत्युक्तं नवमस्कंधे बार्हद्रथाः भूपाला भाव्याः साहस्रवत्सरमिति ततः परे
च प्रद्योतनव्यष्टत्रिंशोत्तरशतं शिशुनागाश्च षष्ठ्युत्तरशतत्रयं [illegible] भिः त्ये नैवोक्तत्वात् २६ सतां मुदेऽस्तु

भा० द्वा० कलेः प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपलक्षणमाह सप्तर्षीणामिति अयमर्थः प्रागग्रशकटाकारं तारसप्तकं सप्तर्षिमंडलं
५ तत्र किंचिदुन्नतेषां समग्रस्थानियो मरीचिः ततः पश्चादानम्रयुगकंधराकारो वसिष्ठः सभार्यः ततः पश्चादुन्नतेषां मूलस्थानीयो
ऽङ्गिराः ततः पश्चाच्चतुरस्रतारा चतुष्के ईशान्ये त्रिः तौ तु दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहस्ततः उत्तरतः क्रतुः एवं स्थितेषां
मध्ये यो पूर्वौ उदयसमये प्रथममुदितौ पुलहक्रतुसंज्ञौ तयोस्तु पूर्वयोस्तु मध्ये यत्समं दक्षिणतः समदेशावस्थितमश्विन्यादिषु
दर्शनक्षत्रं दृश्यते २७ तेन तथैव युक्तान्नृणामब्दशतं तिष्ठन्ति ते च द्विजास्त्वदीये काले अधुना मघा आश्रिता वर्तन्ते २८ यदावि

सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि २७ तेनैत ऋषयो युक्तास्ति
ष्ठन्त्यब्दशतं नृणां ते त्वदीये द्विजाः काले अधुना चाश्रिता मघाः २८ विष्णोर्भगवतो भानुः कृष्णाख्यो सौ दिवं गतः त
दाविशत्कलिर्लोकं पापे यद्रमते जनः २९ यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः तावत्कलिर्वै पृथिवीं परा
क्रांतुं न चाशकत् ३० यदा देवर्षयः सप्त मघासु विचरंति हि तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः
३१ यदा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ३२ ॥

कृष्णो भानुः शुद्धसत्वात्मको देहः दिवं वैकुंठं गतः तदा कलियुगमाविशत् यस्मिन्युगे जनः पापे रमत इति कलियुगस्य ल— तु श्रीकृष्णे पृ श्री: ५
थिव्यां वर्तमानेपि संध्यारूपेण कलिः प्रविष्ट एवासीत् सत्यं तथापि तावत्तस्य पराक्रमो नाभवदित्याह यावदिति पराक्रांतुं अभि
क भावितुं ३० अतो यथोक्त एव कलिप्रवेशकाल इत्याह यदा देवर्षय इति द्वादशाब्दशतात्मक इति दिव्येन मानेन संध्यांशाभ्यां स
हयोर्द्वादशाब्दशतात्मकः स कलिः तदा संध्यामतिक्रम्य प्रविष्ट इत्यर्थः ३१ कलेः प्रवेशकालमुक्त्वा तस्य वृद्धिकालमाह यदे
ति तदा प्रद्योतनात्प्रभृति वृद्धिं गछं नंदात्प्रभृत्यति वृद्धिं गमिष्यतीत्यर्थः ३२ श्रीरामचंद्रार्पणमस्तु ॥ ॥ ॥ ॥ ॥

ननु यदा कलेर्लिंगमुपलब्धं तदैव प्रविष्ट इति युक्तं ततः पूर्वमेव प्रवेशः ततः परं वृद्धिरित्यत्र किं प्रमाणं तत्राह यस्मिन्निति प्रतिपन्नं
प्रविष्टमिति ज्ञातं पुराविदः पूर्वज्ञातारः ३३ कलेरनंतरं कृतयुगप्रवेशमाह दिव्याब्दानामिति चतुर्थे कलौ प्रवेशनाब्दपरिमि
तेनांशेनापि सहातीते सतीत्यर्थः कृतयुगप्रवेशमाह यदा नृणां मन आत्मप्रकाशकं भविष्यति तदेति ३४ राजवंशो उक्तो स्थिति
ब्राह्मणादिवंशे व्याप्तिं दिशति इत्येष इति यथा याभिर्युक्ता नीचावस्थाभिः तास्ता अवस्थाः वंशा इति च पाठः ३५ एतत्कीर्ति

यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ३३ दिव्याब्दानां सहस्रांते चतुर्थे तु पुनः
कृतं भविष्यति यदा नृणां मन आत्मप्रकाशकं ३४ इत्येष मानवो वंशो यथा संख्यायते भुवि तथा विट्शूद्रविप्राणां
ताश्च ज्ञेया युगे युगे ३५ एतेषां नामलिंगानां पुरुषाणां महात्मनां कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ३६ देवा
पिः शांतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः कलापग्राम आसाते महायोगबलान्वितौ ३७ ताविहैत्य कलेरंते वासुदेवानुशि
क्षितौ वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः ३८ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं अनेन क्रमयोगेन भुवि प्राणिषु
वर्तते ३९ राजन्नेते मया प्रोक्ता नरदेवास्तथापरे भूमौ ममत्वं कृत्वांते हित्वेमां निधनं गताः ४० श्रीसप्तकोटीश्वरो विजे०

न स्यवैराग्योपयोगितामाह एतेषामिति नामैव लिंगं ज्ञापकं येषां तेषां कथामात्रेणैवावशिष्टानां कीर्तिरेव स्थिता न तु राज्यं पुत्रा
दयो वा ३६ कलापग्रामे नानाराजवंशादीनां पुनः प्रवृत्तिप्रकारं देवापिः सोमवंशजः मरुस्तु सूर्यवंशजः कलापग्रामो नाम यो
गिनामावासः प्रसिद्धः ३७।३८ इममेव प्रकारं प्रतिचतुर्युगं दर्शयति कृतमिति ३९ तेषां नामलिंगानामित्यादि युक्तं तल्लप
चयति राजन्निति पंचभिः ४० ममत्वं कृत्वेत्यनेन नरदेवितो भूतद्रोहं प्रवृत्तिं निंदति कृमीति राजनाम्नः राजेति नाम यस्य तत् .
स्यापि देहस्यांते कृमयो विषभस्मेति या संज्ञा स्याद्विष्यामि तत्कृते तेन मद्धर्मो वा कृतं भूतेभ्यो द्रुह्यति सा किं स्वार्थं वेद कृतं इत्यपक्षामो
हेतुत्वेन भूतद्रोहं विशिनष्टि यतो भूतद्रोहान्निरयाय भवतीति ४१ ॥ भूत० ॥ श्रीसप्तकोटीश्वरप्रसन्नोस्तु ॥ सतां सुदृशस्तु ॥

ममत्वप्रकारं प्रपंचयति कथमिति. सेयमखंडाभूर्मत्पूर्वजैः पुरुषैर्धृतासती इदानीं मत्सुतस्य च सतीमत्सुताद्येः कथं स्यादिति
वं ४२ उभौ महीकायं च अदर्शनं गताः ४४ उपसंहरति येयेति तेषां कथा कथामात्राः कालेन कृताः ४५ इति
श्रीभागवते० द्वादशस्कंधे वंशानुकीर्तने द्वितीयोध्यायः २ तृतीये भूमिगीतिभिः राज्य दोषादि वर्ण्यते कलौ च दोषभूयिः
मौ छेदो शहंत्रीहरेर्नीतिः १ देहेहंतात्त्वमुमतां कुर्वत्यतः बुधा इत्युक्तान् देवीहृभिगीतैः प्रपंचयति दृष्ट्वेत्यादिना आत्मनिधृषिः
व्याजयेष्यपयोन्मुद्रा कृत्वा नृहासज्ज कारमेवाह अहोरति १ येन कामेन केनोपमेपिंडदेहे विश्रंभिता विश्वा संनीतायतेः शानरेः
कृमिविट्भस्मसंज्ञोते राजंनाम्नोपि मस्य च भूत ध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ४२ कथं सेयमखंडा भूः पूर्वैर्मे पुरु
षैर्धृता मत्सुतस्य च पुत्रस्य मत्स्वी वंशजस्य वा ४३ तेजोबनमयं कायं गृहीत्वात्मतया बुधाः महीं ममतया चोभौ हित्वाते
ऽदर्शनं गताः ४४ येयेऽपतयो राजन्भुंजंति भुवमोजसा कालेन ते कृताः सर्वे कथामात्राः कथासु च ४५ इति श्री
भागवते महापुराणे द्वादशस्कंधे वंशानुकीर्तनं नाम द्वितीयोध्यायः २ श्रीशुकः० दृष्ट्वात्मनि जये व्यग्रान्नृपान्हसं
ति भूरियं अहो मा विजिगीषंते मत्युक्रीडनकान्नृपाः १ काम एष नरेंद्राणां मोघस्याद्विदुषामपि येन फेनोपमे पिंडेयेति
विश्रंभिता नृपाः २ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः ततः सचिवपौराप्तकरींद्रानस्य कंटकान् ३ एवं क्रमेण जेष्या
मः पृथ्वीं सागरमेखलां इत्याशाबद्धहृदया न पश्यंत्यंतिकेंतकं ४ समुद्रावरणं जित्वा मां विशंत्यब्धिमोजसा किय
दात्मजयस्यैतन्मुक्तिरात्मजये फलं ५ यांविसृज्यैव मनवः सस्कृताश्च कुरूद्वह गता यथागतं युद्धे तां मां जेष्यंत्यबुद्धयः ६
एवं कामो मोघ एव स्यात् कामम एव दर्शयति द्वाभ्यां पूर्वमिति इंद्रियपार्थिवं परस्परेन राज्यप्राप्तिः स्यादिति प्रथममिंद्रियषड्वर्गनिर्जित्य राजं
मंत्रिणो जेष्यामः सचिवा अमात्याः करींद्रा हस्तिपाः स्तांश्च जेष्यामः कंटकान्प्रतिपक्षान् अस्य अपास्य अथकंटकानिति पाठः ३ इति ए
वं केचिदाशाबद्धहृदयाः ४ एवं केचिन्मां जित्वाप्यतिरिक्तमात्मनो विशंति तदेवमिंद्रियजयेन यो राज्यं साधयितुमिच्छंति तन्मंदात्स्या हि कि

अवश्यं इत्युक्तं प्रपंचयति मत्कृत इति ७।८ रामो नाम कश्चिद्राजा यद्वालोकः हृत्वा दशरथैः निर्दिष्टैः ९।१० लोकं रावयति रोदय
तीति लोकरावणः ११।१२ ममिमं च मत्कृता येऽवर्तंत ते कालेन कथावशेषाः कृताः विभो इति संबोधनं कुरुद्वहेति वत् १२ राजवंशा
नुकथनस्य तात्पर्यमाह कथा इमास्ते विज्ञानं विषयासारता ज्ञानं ततो वैराग्यं ततो विरक्षमापरेयुषां सतां च वोविभूतीः वाग्विलासमात्र
मत्कृते पितृपुत्राणां भ्रातॄणां चापि विग्रहः राज्येषु सतां राज्ये ममताबद्धचेतसां ७ ममैवेयं मही कृत्स्ना न ते मूढेति वादिनः स्पर्धमा
ना मिथो घ्नंति म्रियंते मत्कृते नृपाः ८ पृथुः पुरूरवा गाधिर्नहुषो भरतोऽर्जुनः मांधाता सगरो रामः खट्वांगो धुंधुहा रघुः ९ तृण
बिंदुर्ययातिश्च शर्यातिः शंतनुर्गयः भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः १० हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः नमु
चिः शंबरो भौमो हिरण्याक्षोऽथ तारकः ११ अन्ये च बहवो दैत्या राजानो ये महेश्वराः सर्वे सर्वविदः शूराः सर्वे सर्वजितोजिताः १२
ममतां मय्यवर्तंत कृत्वोच्चैर्मर्त्यधर्मिणः कथावशेषाः कालेन ह्यकृतार्थाः कृता विभो १३ कथा इमास्ते कथिता महीयसां वि
ताय लोकेषु यशः परेयुषां विज्ञानवैराग्यविवक्षया विभो वचो विभूतीर्न तु पारमार्थ्यं १४ यस्तूत्तमश्लोकगुणानुवादः सं
गीयतेऽभीक्ष्णममंगलघ्नः तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः १५ राजोवाच केनोपायेन
भगवन्कलेर्दोषान्कलौ जनाः विधमिष्यंत्युपचितांस्तन्मे ब्रूहि यथा मुने १६ ४ श्री॥ श्रीमद्युगादेऽमेऽपि तत्कृतं ऽपवत्मः॥

तृपाः पारमार्थ्यं परमार्थयुक्तं कथनं न भवतीत्यर्थः कस्तर्हि पुरुषार्थं युक्त इत्याह परमार्थः तमाह यस्त्विति नित्यं पठत्वहं तमाप्य
भीक्ष्णं १५ कलिदोषोपचये सति सत्कारसंभवं मन्यमानः पृच्छति केनोपायेनेति विधमिष्यंति पथयथा यथावत् १६
कलियुगकृः परमोपधर्म इति युगतत्त्वं चापृच्छत युगानीति तत्त्वं युगानां प्रकृत्या इतिकेजे तास्समतापुनः एकाति प्रलयकल्पयोः
प्रथम कालेषु रुद्रः प्रश्नस्यात्कालस्येति १७

भा० द्वा० स्कं० ३ तत्र युगधर्मान्विभागेनाह कृत इति तज्जनैस्तत्कालीनैः दानं अस्वागस्त्यः ... तया अयं दानं तदेव प्रथमस्कंधे शौचशब्देनोक्तं विप्रोः संप्र
पस्य धर्मस्य १८ तद्वानीतिं तज्जनानाह संतुष्टा इति मैत्राः ... मैत्रीयुक्ताः श्रमणाः आत्माराम्याः सर्वतः १९।२० ब्रह्मोत्तराः ब्राह्म
णाधिकाः २१ अनृतेन सत्यं हिंसया दया असंतोषेण तपः विग्रहेण दानमिति यथासंख्यं योज्यं हिंसा तुष्ट्यनृतद्वेषैरित्यत्र

श्रीशुक उवाच कृते प्रवर्त्तते धर्मश्चतुष्पात्तज्जनैर्धृतः सत्यं दया तपो दानमिति पादा विभोर्नृप १८ संतुष्टाः करुणा मैत्राः शां
ता दांतास्तितिक्षवः आत्मारामाः समदृशः प्रायशः श्रमणा जनाः १९ त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः अधर्मपादैरनृ
तहिंसासंतोषविग्रहैः २० तदा क्रियातपोनिष्ठा नातिहिंस्रा न लंपटाः त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप २१ तपःसत्यदया
दानेष्वर्द्धं ह्रस्वति द्वापरे हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः २२ यशस्विनो महाशीलाः स्वाध्यायाध्ययने रताः आ
ढ्याः कुटुंबिनो हृष्टा वर्णाः क्षत्रद्विजोत्तमाः २३ कलौ तु धर्मपादानां तुर्यांशोऽधर्महेतुभिः एधमानैः क्षीयमाणो ह्यंते सोपि
विनंक्ष्यति २४ तस्मिन्लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः २५ श्रीराम
सत्वं रजस्तम इति दृश्यंते पुरुषे गुणाः कालसंचोदितास्ते वै परिवर्त्तंत आत्मनि २६ प्रभवंति यदा सत्वे मनोबुद्धींद्रियाणि च तदा कृतयुगं

क्रमो न विवक्षितः धर्मस्यार्धं ह्रसति क्षीयते अधर्मस्य लक्षणैश्चिह्नैः पादैरित्यर्थः २२ यशस्विनः कीर्तिप्रियः क्षत्रद्वि
जोत्तमाः क्षत्रियब्राह्मणप्रधानाः २३ कलौ धर्मपादानां तुर्यांशस्तु चतुर्थांशो विशिष्यते २४ शूद्रदासोत्तराः शूद्रकैवर्तप्रधानाः २५॥
युगानामेवंभूतवैषम्ये कारणमाह सत्वमिति पंचभिः २६ मनश्च बुद्धिश्चेंद्रियाणि च सत्वे यदा प्रभवंति आतिशयेन वर्तंते २६

यदा कर्मादिषु भक्तिः प्रीतिस्तदा रजोवृत्तिप्रधानं त्रेतायुगमिति जानीहि २८ काम्यानां कर्मणां विषये यदा प्रीतिः तदा रजस्तमःप्रधानं
द्वापरं जानीहि २९ विषादं दुःखं ३० कलिदोषान्प्रपंचयति यस्मादित्यादिना यस्मात्कलेर्हेतोः क्षुद्रदृशः मंदमतयः क्षुद्रभाग्याः अ
ल्पभाग्याः महाशनाः बह्वाहाराः वित्तहीना अपि कामिनः स्वैरिण्यः पुंश्चल्यः असतीः असत्यः ३२ दस्युभिः उत्कृष्टाः प्रचुरा येषु ते ३३
अव्रता विहिताचाररहिताः अशौचाः शौचरहिताः ... वटवो ब्रह्मचारिणो भविष्यंति कुटुंबिनश्च गृहस्थाः स्वयं भिक्षां भिक्षणं परान्नं

यदा कर्मसु काम्येषु भक्तिर्यशसि देहिनां तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् २८ यदा लोभस्त्वसंतोषो मानो दंभोऽथ मत्सरः
कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः २९ यदा मायानृतं तंद्रा निद्रा हिंसा विषादनं शोको मोहो भयं दैन्यं स कलिस्तामसः
स्मृतः ३० यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ३२ दस्यूत्कृ
ष्टा जनपदा वेदाः पाषंडदूषिताः राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ३३ अव्रता बटवोऽशौचा भिक्षवश्च कुटुंबिनः
तपस्विनो ग्रामवासा न्यासिनोत्यर्थलोलुपाः ३४ ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः शश्वत्कटुकभाषिण्यश्चौ
र्यमायोरुसाहसाः ३५ पणयिष्यंति वै क्षुद्राः किराटाः कूटकारिणः अनापद्यपि मंस्यंते वार्तां साधु जुगुप्सितां ३६ पतिं
त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमं भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ३७ श्रीरामचंद्रार्पणमस्तु श्रीः

त तिन तु भिक्षोदास्यंति पि तपस्विनो वनस्थाः वनं हित्वा ग्रामवासा भविष्यंति न्यासिनो यतयः अतिधनादिलोलुपाः भविष्यंति ३४
पुनरपि स्त्रीणां स्वभावमाह ह्रस्वकाया इति कटुकभाषिण्यः अप्रियवादिन्यः चौर्यं च माया कपटं च उरु बहु साहसं यासां ताः ३५ कि
राटाः वणिजः पणयिष्यंति क्रयविक्रयादिव्यवहारं प्रवर्तयिष्यंति किंतु सर्वेषामपि अनापद्यपि जुगुप्सितां निंदि
तां वार्त्तां साधु मंस्यंते ३६ सर्वेति ममापि पातित्यं ... भृत्यास्त्यक्ष्यंति पतयश्च विपन्नं रोगादिभिर्व्याप्तं दासं कौलं कुलक्रमागत

भा० द्वा० ३ सौरतं स्त्रवनिमित्तं सौहृदं येषां ते अत एव ननंदारो ऽत्र भार्या भगिन्यः श्यालाः भार्याभ्रातरः तैः संवादो मंत्रालोचनं दुरितमिति
८ वा पाठः ३८।३९।४० पिशाचसंदर्शाः पिशाचसदृशाः ४१ काकिण्यिके विंशतिवराटिकामात्रे विगृह्य स्वैरं कृत्वा ४२।४३ महांतमर्थमाह द्वाभ्यां कलाविति त्रिलोकनाथैर्नतं नम्रं कृतं यक्ष्यंति न यजिष्यंति पाषंडैर्विभिन्नम्

पितृभ्रातृसुहृत्ज्ञातीन्हित्वा सौरतसौहृदाः ननंदृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ३८ शूद्राः प्रतिग्रहीष्यंति तपोवेषोपजीविनः धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनं ३९ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः निरन्ने भूतले राजन्ननावृष्टिभयातुराः ४० वासोन्नपानशयनव्यवायस्नानभूषणैः हीनाः पिशाचसंदर्शा भविष्यंति कलौ प्रजाः ४१ कलौ काकिणिकेप्यर्थे विगृह्य त्यक्तसौहृदाः त्यक्ष्यंति च प्रियान्प्राणान्हनिष्यंति स्वकानपि ४२ न रक्षिष्यंति मनुजाः स्थविरौ पितरावपि पुत्रान्सर्वार्थकुशलान्क्षुद्राः शिश्नोदरंभराः ४३ कलौ न राजन् जगतां परं गुरुं त्रैलोक्यनाथानतपादपंकजं प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति पाषंडविभिन्नचेतसः ४४ यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान् विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः ४५ पुंसां कलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः ४६ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोपि वा नृणां धुनोति भगवान्हृत्स्थो जन्मायुताशुभं ४७ श्रीनारायणपरसेनोसक्त- ८
मन्यथाकृतं चेतो येषां ते ४४ विवशो गृणन् विमुक्ताः कर्मरूपाः अर्गलाः प्रतिबंधा यस्य सः ४५ तदेवं कलिदोषान्प्रपंच्य
॰ प्रस्तुतं तन्निरासोपायमाह पुंसामिति षड्भिः द्रव्यदेशात्मभिः संभवो येषां तान् चित्तस्थः चित्ते स्फुरितः ४६।४७ श्री

अयमेवोपायो नान्य इति सदृष्टांतमाह यथेति धातुजं ताम्रादिसंश्लेषजातं हेम्नो दुर्वर्णं मालिन्यं तत्र स्थितो वह्निर्हंति न तु तो- [illegible]
यादिरेवं योगिनामपि विष्णुरेव न तु योगादिकमित्यर्थः ४८ एतदेव विवृणोति विद्येति विद्यादिभिस्तपसनापानाभावे स्व- ४९
५०।५१ इदानीं कलिं स्तौति द्वाभ्यां कलेर्दोषनिधे राजन्निति तत्सर्वं हरिकीर्तनादेव कलौ भवति ५२।५३ इति द्वादशे तृतीयः ३
चतुर्थे तु चतुर्धा कालयाने मित्तिकादयः तत्र संसारनिस्तारो हरिकीर्तिविवर्ण्यते १ कलिदोषनिवर्तकं हरिनामसंकीर्तनं

यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हंति धातुजं एवमात्मगतो विष्णुर्योगिनामशुभाशयं ४८ विद्यातपःप्राणनिरोधमै-
त्रीतीर्थाभिषेकव्रतदानजप्यैः नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदिस्थे भगवत्यनंते ४९ तस्मात्सर्वात्मना राजन्हृदि-
स्थं कुरु केशवं म्रियमाणो ह्यवहितस्ततो यासि परां गतिं ५० म्रियमाणैरभिध्येयो भगवान्परमेश्वरः आ-
त्मभावं नयत्यंग सर्वात्मा सर्वसंश्रयः ५१ कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः कीर्तनादेव कृष्णस्य मुक्तबंधः
परं व्रजेत् ५२ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ५३ इति
श्रीभागवते महापु० द्वादशस्कंधे तृतीयोध्यायः श्रीशुकः कालस्ते परमाण्वादिर्द्विपरार्धावधिर्नृप कथि-
तो युगमानं च शृणु कल्पलयावपि १ चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते स कल्पो यत्र मनवश्चतुर्दश विशांपते
२ तदंते प्रलयस्तावान्ब्राह्मी रात्रिरुदाहृता त्रयो लोका इमे यत्र कल्पंते प्रलयाय हि ३
दिकं स एव च परमो धर्म इति प्रश्नद्वयस्योत्तरमुक्तं यच्चान्यत्पृष्टं प्रलयकल्पयोर्मानं तद्वाहीतिता इदानीं तृतीयस्कंधोक्त का-
नुवादपूर्वकं निरूपयति काल इति स कालः परमाण्वादिर्यो भुंक्ते परमाणुतामित्यादिना कालः कथितः चत्वारि त्रीणि द्वे
चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि चेति युगमानं कथितं १ तत्र कल्पमानमाह चतुर्युगे-
ति तत्र च चतुर्दश मनवः क्रमेण भवंति प्रत्येकं स्वस्य चतुर्विधः २ नैमित्तिक आत्यंतिको नित्य इति तत्र नैमित्तिकप्रलयमानमाह

भा० द्वा० ४ नैमित्तिकत्वं दर्शयति यत्र यदा विश्वस्य कृष्णो नारायणः विश्वमात्मसात्कृत्य आत्मभूः स्वस्मिन् उपसंहृत्य शेते आत्मभूः ब्रह्मा च तस्मिन् शेते तयोः से
९ दिविक्षया वा ब्रह्मण एवानंता सनत्वमुक्तं ब्रह्मणो निद्रानिमित्तीकृत्य प्रवर्तमानो लोकप्रलयो नैमित्तिक इत्यर्थः ४ प्राकृतिकं प्रलयमाह
द्राभ्यां द्विपरार्धे तु ब्रह्मण आयुषि सप्त प्रकृतयः महदहंकारपंचतन्मात्राणि ५ संघातः महदादिकार्यभूतः प्रकृतीनां तत्कार्यं ब्रह्मांड
स्य च लयावस्था प्राकृतिक इत्यर्थः विघातो विघातकारणे उपसादिते ६ तदेवाह पर्जन्य इत्यादि वृष्ट्यादिपादिरूपेणेत्यतः प्राक् तेनेत्यर्थेन ७

एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् शेतेऽनंतासनो विश्वमात्मसात्कृत्य चात्मभूः ४ द्विपरार्धे त्वतिक्रांते ब्रह्मणः प
रमेष्ठिनः तदा प्रकृतयः सप्त कल्पंते प्रलयाय हि ५ एष प्राकृतिको राजन्प्रलयो यत्र लीयते आंडकोशस्तु संघातो विघा
त उपसादिते ६ पर्जन्यः शतवर्षाणि भूमौ राजन्न वर्षति तदा निरन्ने ह्यन्योन्यं भक्ष्यमाणाः क्षुधार्दिताः ७ क्षयं या
स्यंति शनकैः कालेनोपद्रुताः प्रजाः सामुद्रं दैहिकं भौमं रसं सांवर्तको रविः रश्मिभिः पिबते घोरैः सर्वं नैव विमुंचति ८ ततः
संवर्तको वह्निः संकर्षणमुखोत्थितः दहत्यनिलवेगोत्थः शून्यान्भूविवरानथ ९ उपर्यधः समंतात् च शिखाभिर्वह्निसूर्य
योः दह्यमानं विभात्यंडं दग्धगोमयपिंडवत् १० ततः प्रचंडपवनो वर्षाणामधिकं शतं परः सांवर्तको वाति धूम्रं खं रजसा
वृतं ११ ततो मेघकुलान्यंग चित्रवर्णान्यनेकशः शतं वर्षाणि वर्षंति नदंति रभसस्वनैः १२ तत एकोदकं विश्वं ब्रह्मांडविवरांतरं
१३ तदा भूमेर्गंधगुणं ग्रसंत्याप उदप्लवे ग्रस्तगंधा तु पृथिवी प्रलयत्वाय कल्पते अपां रसमथो तेजस्ता लीयंतेऽथ नीर
साः १४ ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा १४ लीयते चानिले तेजो वायोः खं ग्रसते गुणं स वै विशति खं राजंस्ततश्च
नभसो गुणं १५
सामुद्रादिकं सर्वं रसं रविः पिबति आकर्षति ८ अनिलवेगोत्थः वायुवेगोद्धतः अनिलवेगवानिति पाठे अनिलवेगो यस्य स च वा रवि
णा रश्मिभिः पीतमुदकं च दहतीत्यर्थः अनिलवेगो वेदेति तु पाठः क्रमः भूविवरान् पातालादीनि इत्यान् रविणा दैहिकरसाकर्षणात्सर्वाणि

भूतादिस्तामसोऽहंकारः गुणैर्वैकारिकैः सह १६ अव्याकृतं प्रधानं १७ तस्य तु लयो नास्तीत्याह न तस्येति कालावयवैः अहोरात्रादि
भिः गुणास्तावद्विकाराः परिणामः विपरिणामः अव्यक्तं भास्तित्वविकारैरित्यनित्यं सर्वं दैकं रूपं षड्विकाररहितमित्यर्थः अव्ययः
पक्षयशून्यं सर्वत्र हेतुः कारणमिति १८ किंच गावादिगोचरस्य सविशेषस्य विकारा भवंति इदं तु न तथेत्याह नयत्रेति द्वाभ्यां

शब्दं ग्रसति भूतादिर्नभस्तमनु लीयते तैजसश्चेंद्रियाण्यंग देवान्वैकारिको गुणैः १६ महान्ग्रसत्यहंकारं गुणाः
सत्वादयश्च तं ग्रसतेऽव्याकृतं राजन्गुणान्कालेन नोदितं १७ न तस्य कालावयवैः परिणामादयो गुणाः अनाद्यन
ंतमव्यक्तं नित्यं कारणमव्ययं १८ न यत्र वाचो न मनो न सत्वं तमो रजो वा महदादयोऽमी न प्राणबुद्धींद्रियदेवता वा न सं
निवेशः खलु लोककल्पः १९ न स्वप्नजाग्रन्न च तत्सुषुप्तं न खं जलं भूरनिलोऽग्निरर्कः संसुप्तवच्छून्यवदप्रतर्क्यं
तन्मूलभूतं पदमामनंति २० लयः प्राकृतिको ह्येषः पुरुषाव्यक्तयोर्यदा शक्तयः संप्रलीयंते विवशाः कालविद्रुताः
बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयं दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु यत् २२
लोककल्पः लोकरूपः सन्निवेशो रचनाविशेषः १९ स्वप्नजाग्रत्स्वप्नजागरावस्था सुसुप्तवत् इंद्रियाद्यभावात् शून्यसादृश्ये २१
हेतुः अप्रतर्क्यं न पुनः शून्यमेवेत्याह तदिति २० उपसंहरति लय इति शक्तयः सत्वाद्यः २१ अस्य आत्यंतिकं लयमाह बुद्धींद्रियेति
द्वादशभिः आत्यंतिको लयो मोक्षः स च ब्रह्मज्ञानेन सर्वप्रपंचलयात्मकः न च प्रपंचस्यात्मवत्सत्यत्वे लयः संभवतीति तस्य रूपा
दीत् ब्रह्मणः पृथक् सत्तस्य तस्या सत्वमुपपादयति बुद्धिश्च इंद्रियाणि च अर्थाश्च तत्ये च ग्राहक करण ग्राह्य रूपेण तेषामेवा
यज्ज्ञानमेव भाति न पृथक् तत्र हेतुमाह दृश्यत्वाव्यतिरेकाभ्यामिति अतो यत्ता घत रहितं दृश्यं तत्र प्रयोगः विमतं सन्मा

भा० द्वा० स्कं० ४ तत्राव्यतिरेकं दृष्टांतेन प्रपंचयति दीप इति दीपवद्रूपरूपाणां तेजोविशेषाणां यथा तेजसो न व्यतिरेकः तथा धीः खानि करणानि
मात्राः विषयाः ऋतात् ब्रह्मणः पृथक् न स्युः ब्रह्मकार्यत्वात् नन्वेवं कार्यकारणयोरभेदे कास वे कारणस्याप्यसत्त्वं प्रसज्येतत
१० त्राह अन्यतमादिति कार्याद्दृष्टांत व्यतिरिक्ताद्ब्रह्मणः प्रपंचात् ब्रह्मणोस्ति व्यतिरेकः प्रपंचस्य तु ततो नास्ति व्यतिरेक इत्यर्थः २३
तत्पदोतु बुद्धेस्तत्वं तत्तदवस्थानां स्फुरतामसत्वं दर्शयति नाहबुद्धेरिति ननु विश्वतैजसप्राज्ञानां एता अवस्थाः न बुद्धेरित्याशंक्याह मा
यामात्रमिति इदं विश्वतैजसप्राज्ञरूप २४ आद्यंतवत्वादित्यस्य हेतोरसिद्धिमाशंक्य सावयवत्वेन साधयति यथेति अवयवीति
यत्सावयवं तदाद्यंतवत् घटादिवदित्यर्थः अतउदयाप्ययात् आद्यंतवत्वाद्विश्वं सन्न भवतीत्यर्थः यद्वा पृथगेवागमापायित्वाद्विश्वं
मिथ्या ब्रह्म तु तदवधित्वात्सत्यमित्यनेन न साध्यते दृष्टांतस्तु पूर्वोक्त एव यथा जलधरा व्योम्नीति दृष्टांतस्त्वागमापायितदवधि
दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् २३ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्य
ते मायामात्रमिदं राजन् नानात्वं प्रत्यगात्मनि २४ यथा जलधरा व्योम्नि भवंति न भवंति च ब्रह्मणीदं तथा विश्वमवयव्युद
याप्ययात् २५ सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह विनार्थेन प्रतीयेरन् पटस्येवांग तंतवः २६ ॐ तत्सद्ब्रह्मार्पणमस्तु

तन्मात्रे न तु मिथ्यात्वेति २५ अन्यतमादिति प्रतिज्ञातं कारणस्य सत्यत्वमुपपादयति सत्यं हीति अवयवः कारणं प्रोक्तः वा
चारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादि श्रुतिभिः अत्र युक्तिमपि दर्शयति विनेति अंग हे राजन् हि यस्मादर्थं रामकृष्ण
न अवयवं विना विनापृथगेव अवयविनः प्रतीयेरन् यथा पटस्यावयवाः तंतवः पटात् पृथक् प्रतीयंते तेन इदिति २६ राम १०
नमस्तेनमस्तेनमस्तेनमस्तेनमस्तेनमस्ते रामरामरामरामरामरामरामरामरामराम सप्तकोटीश्वरायनमः रामरामरामवान्
नारायण रामसीतला वासुदेवायनमः ॥ सांबसदाशिवायनमः ॥ हरयेनमः नारायणायनमः

ननु कार्याभावे कारणत्वं ब्रह्मणः कुतो घटेत सत्यं तदपि नातीव सत्यमित्याह यदिति सामान्यं कारणं विशेषः कार्यं तद्रूपेण अन्योन्याश्रयत्वात्
स्यरापेक्षत्वेन न निरूपणासहत्वादित्यर्थः अतः कारणत्वमवधित्वं व्यापकत्वमित्यादिकमपि यत्परापेक्षत्वात् नवेतरं अन्योन्यापाश्रयादिती
दमप्यहेतुंतरं गुणगुणि विशेषणविशेष्य व्याप्यव्यापकत्वादिरूपेण परस्पराधीनसिद्धित्वात् ४ तस्य सर्वमवस्त्वित्यर्थः यद्वा तत्रैव हेत्वंतरमेव तत्पदुपल
भ्येत स भ्रमः सामान्यरूपविशेषरूपत्वात् स्वप्नवत् ४ तथाभूतस्य भ्रमवदिति निगमनं अतो यदाद्यंतवत् सर्वमवस्त्विति २७ तदेवं अनेकैर्हेतु
पं भिः प्रपंचस्यासत्वं प्रसाधितं तत्र शंकाननु प्रपंचस्यापि प्रकाशमानत्वादात्मवत्सत्वं किं न स्यादिति तत्राह विकार इति ख्याप्यमानः
प्रकाशमानोपि विकारः प्रपंचः प्रत्यगात्मप्रकाशं विना अणुमात्रोपि न निरूप्योस्ति तं विना निरूप्यः स्याच्चेत्तर्हि सोपि चित्समः स्यात्

सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह विनार्थेन प्रतीयेरन्
यत्सामान्यविशेषाभ्यामुपलभ्येत स भ्रमः अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तु यत् २७ विकारः ख्यायमानोपि प्रत्यगात्मानमंतरा
रा न निरूप्योस्त्यणुरपि स्याच्चेच्चित्सम आत्मवत् २८ न हि सत्यस्य नानात्वमविद्वान्यदि मन्यते नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वा
तयोरिव २९ यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकै
र्जनैः ३०
चिद्रूपेणात्मना समः स्वप्रकाशो भवेत् तथा च सति सोप्यात्मवत्स्यात् एकरूपः स्यादित्यर्थः २८ कुतस्तत्राह न हीति ननु सत्य
स्यात्मनो जीवब्रह्मरूपनानात्वमिति तत्राह छिद्रयोर्घटाकाशमहाकाशयोरिवेति परिच्छेददृष्टांतः ज्योतिषोः आकाशजलस्थसूर्य
योरिवेत्युपाधिकृतविकारसद्भावे वातयोर्बाह्यशरीरस्थवायोरिवेति क्रियाभेदे २९ ब्रह्मण एव प्रपंचव्यवहारावलंबनत्वं दृष्टांतेन
नस्पष्टयति तथेति क्रियाभिस्तत्तद्रचनाभेदैर्बहुधा कटककुंडलादिरूपेण लौकिकैर्वैदिकैर्वचोभिः जनैः अहंकारोपहितैः ३०॥

भा० द्वा० ४ नन्वहंकारस्य कथं ब्रह्मरूपावरणेन भेदव्यवस्थाहेतुत्वं तस्य स्वकारणभूतब्रह्मावरकत्वासंभवात् आवरणे वा स्वस्यापि प्र ४८
काशाभावादित्याशंक्य सदृष्टांतमाह यथेति अर्करश्मय एव मेघरूपेण परिणता वर्षन्तीति अग्नौ प्रास्ताहुतिः सम्यगादित्यमुप
११ तिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्यादिवचनात् दृश्यमाद्दर्कप्रभवः अर्केणैव दर्शितः प्रकाशितश्च तमः स्वरूप
भूतार्कदर्शनप्रतिबंधको भवति अहंकारः ब्रह्मगुणः ब्रह्मकार्यभूतः तद्दीक्षितस्तेनैव प्रकाशितश्च आत्मनो जीवस्य आत्मबं
धनेः ब्रह्मस्वरूपदर्शनप्रतिबंधको भवति ३१ अत एवाहंकारनाशे स्वरूपदर्शनं भवतीति तेनैव दृष्टांतेनाह घन इति आ

यथा घनोर्कप्रभवोर्कदर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंध
नः ३१ घनो यदार्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा यदा ह्यहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्म
रेत् ३२ यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबंधनं छित्वाच्युतात्मानुभवोवतिष्ठते तमाहुरात्यंतिकमंग संप्लवं
३३ नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ३४ कालस्रोतोजवेनाशु ह्रिय
×माणस्य नित्यदा परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ३५
स्मन् उपाधिः जिज्ञासया विचारेण नहि तदा अनुस्मरेत् ब्रह्माहमिति पश्यतीत्यर्थः ३२ सोयमात्यंतिकः प्रलय इत्युपसंहरति य
दैवमिति विवेकहेतिना ज्ञानशास्त्रेण अहंकारणमेवात्मनं धनं अच्युतं परिपूर्णमात्मानमनुभवतीत्यर्थः ३३ नित्यप्रलयमाह ११
नित्यदेति ३४ कुत इत्यत आह कालेति परिणामिनां नदीप्रवाहप्रदीपज्वालादीनां या उच्चनीचावस्थाः ताः कालरूपस्रोतसो
वेगेनाशु ह्रियमाणस्य देहादेर्दृश्यमानाः तद्वदेवानित्यदा जन्मप्रलयहेतवो भवंति देहः प्रतिक्षणं प्रतिध्वंसी प्रतिक्षणं अवस्थै

सिद्धोस्मीत्युक्तं तदेवाविः करोति भगवन्निति यत्त्वया दर्शितं ब्रह्म प्रविष्टः कथंभूतं अभयं यतो निर्वाणं कैवल्यरूपं ५ किं भूयः श्रोतुमिच्छसीति
यदुक्तं तत्रासिद्धोहं न किंचिच्छ्रोतुमिच्छामि केवलमनुज्ञां देहीत्याह अनुजानीहीति वाचमित्युपलक्षणं सर्वेंद्रियाणां वाचं नियम्य किं करिष्यसि तदाह
मुक्ताः कामाशया यस्तद्वासनीयेन ततः चेतः अधोक्षजे प्रवेश्य असून् विसृजामि ६ ननु किं प्राणत्यागेन केवलं ज्ञाननिष्ठो भवेति तत्राह अ
न चेति चकारात् तत्संस्काराश्च तत्कृपयेवेत्याह भवतेति ७ आत्मनं बुध्या आत्मैमनः आत्मनि प्रत्यक्प्रकाशे समाधाय परमात्मानं दध्यौ भ्र

भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहं प्रविष्टो ब्रह्म निर्वाणमभयं दर्शितं त्वया ५ अनुजानीहि मां ब्रह्मन्वाचं यच्छाम्यधोक्षजे मु
क्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ६ अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया भवता दर्शितं क्षेमं परं भगवतः पदं ७ इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः जगाम भिक्षुभिः साकं नरदेवेन पूजितः ८ परीक्षिदपि राजर्षिरात्मन्यात्मानमात्मना स
माधाय परं दध्यावस्पंदासुर्यथा तरुः ९ प्राक्कूले बर्हिष्यासीनो गंगाकूल उदङ्मुखः ब्रह्मभूतो महायोगी निःसंगश्छिन्नसंशयः
१० तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना हंतुकामो नृपं गच्छन्ददर्श पथि कश्यपं ११ तं तर्पयित्वा द्रविणैर्निवर्त्य विष
हारिणं द्विजरूपप्रतिच्छन्नः कामरूपोदशन्नृपं १२ ॥ श्रीमद्गुडादुत्प्रितवक्रतुंजयनमः ॥ श्रीसप्तकोटीश्वरायनमः

स्पंदासुः लीनप्राणाः तथा तरुः स्थाणुः ९ तमेव विशिनष्टि प्राक्कूले प्रागग्रबर्हिषि १० तदेवं ब्रह्मभूते तस्मिन् तक्षकागमनादि कृपि
रूपवर्णमिवाप्सवादिति दर्शयति तक्षक इति त्रिभिः हे विप्राः तं विषचिकित्सया परीक्षिद्रक्षणेन द्रव्यार्जनाय आगच्छंतं ११ तत्र स्थलीवट
वृक्षस्य भस्मीभूतस्य पुनरंकुरादिक्रमेण ज्ञापनात् विषहारिणं तद्वयासक्तं तद्द्रविणैः संतर्प्य तत्र लोभितवत्यां द्विजरूपेण तिरोहितः स्पर्
अदशत् १२ ॥ ॥श्रीवासुदेवायनमो नमो राधारमणायनमो नारायणायनमो श्रीरामचंद्रायसीतापतये रुक्मिण्यै वासुदेवायनमः

भा०द्वा०६ तत्र पुत्रकल्पमिव जातमित्याह ब्रह्मभूतस्येति १३ तत्र क्षणं सर्वेषां दुःखं चतलः परमुत्सवं चाह द्वाभ्यां हाहाकार इति १४।१५ जासंगि कस्मा
१४ द् जनमेजय इत्यादि सर्पाभिचारमात्रे द्विजैः सह यत्नेमानः यथावदाजुहाव जुहाविति वा संवर्सर्पा वाहनेकारणमाह सर्पकुंड इति १६।१७
१८॥

ब्रह्मभूतस्य राजर्षेर्देहोहिगरलाग्निना बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनां १३ हाहाकारो महानासीभुवि खे दि
क्षु सर्वतः विस्मिता ह्यभवन्सर्वे देवासुरनरादयः १४ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः ववृषुः पुष्पवर्षाणि विबु
धाः साधुवादिनः १५ जनमेयस्व पितरं श्रुत्वा तक्षकभक्षितं यथाजुहाव संक्रुद्धो नागान्सत्रे सहद्विजैः १६ सर्पसत्रे
समिद्धेग्नौ दह्यमानान्महोरगान् दृष्ट्वेंद्रं भयसंविग्नस्तक्षकः शरणं ययौ १७ अपश्यंस्तक्षकं तत्र राजा पारीक्षि
तो द्विजान् उवाच तक्षकः कस्मान्न दह्येतोरगाधमः १८ तं गोपायति राजेंद्र शक्रः शरणमागतम् तेन संस्तंभितः
सर्पस्तस्मान्नाग्नौ पतत्यसौ १९ पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः सहेंद्रः तक्षको विप्राः सहेंद्रं तक्षकं मखे त
क्षकाशु पतस्वेह सहेंद्रेण मरुत्वता २० श्रीसप्तकोटीश्वरप्रसन्नोस्तु ×× श्रीशुभंभवतु श्रीरस्तु

तस्मात्तक्षको न दह्येतेत्युक्ताः संतो द्विजा ऊचुः तमिति तेन इंद्रेण असौ सर्पः १९ ऋत्विजः प्रति प्राह सहेंद्र इ श्री
इंद्रसहितः किमिति नैपात्यते २० तद्वाक्तोवचः श्रुत्वा आजुहुवुः साक्षेपमाह्वानं दर्शयति तक्षकेति इहाशु आवश्यपतनम् १४
रुता मरुद्वता इंद्रेण सह २१ श्रीवासुदेवायनमो राधारमणायनमो श्रीरामचंद्राय सीतापतये नमोस्तु

ब्रह्मणो उक्तैराक्षेपैः परुषवाक्यैः सतक्षः २२ आंगिरसः अंगिरसः पुत्रो बृहस्पतिः प्राह २३।२४ भवतु नाम अजरामरस्तथापि पितृमारकोऽयं वध्या
मीति चेत्तत्राह जीवितमिति गतिः परलोकः अतो दुर्मरणनिमित्तापि तु दुर्गतिः स्वेनैन कृतेत्यपि न वाकनीयमित्यर्थः २५ कथमन्यः सुख
दुःखप्रदाता नास्ति सर्पादीनामुपलभ्यमानत्वादिति चेत्तत्राह सर्पादीनापि जंतुः पंचत्वमृच्छति प्राप्नोतीति यत् आरब्धं कर्म भुंक्ते तत्
कर्मप्रयुक्ता एव सर्पादयो न स्वतंत्रा इति भावः २६ संस्थीयत समाप्यतां आभिचारकं हिंसाफलं २७ दिष्टं प्राचीनं कर्म अतः ×× सर्पाद

इति ब्रह्मोदिताक्षेपैः स्थानादिंद्रः प्रचालितः बभूव संभ्रांतमतिः सविमानः सतक्षकः २२ तं पतंतं विमानेन सहतक्षकमंबरात्
विलोक्यांगिरसः प्राह राजानं तं बृहस्पतिः २३ नैष त्वया मनुष्येंद्र वधमर्हति सर्पराट् अनेन पीतममृतमथवा अजरामरः
२४ जीवितं मरणं जंतोर्गतिः स्वेनैव कर्मणा राजंस्ततोन्यो नास्यस्य प्रदाता सुखदुःखयोः २५ सर्पचौराग्निविद्युद्भ्यः क्षु
त्तृड्व्याध्यादिभिर्नृप पंचत्वमृच्छते जंतुर्भुंक्ते आरब्धकर्म तत् २६ स्त्य× तस्मात्सत्रमिदं राजन्संस्थीयेताभिचारकं सर्पा अनाग
सो दग्धा जनैर्दिष्टं हि भुज्यते २७ इत्युक्तः स तथेत्याह महर्षेर्मानयन्वचः सर्पसत्रादुपरतः पूजयामास वाक्पतिं २८ सैषा
विष्णोर्महामाया बाध्ययालक्षणा यया मुह्यंत्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः २९

प्रयुक्तस्य तव अप्ययन्न अपराध इति भावः २७ वाक्पतिं बृहस्पतिं २८ ननु कथं विदुषामप्येवं संमोहः यतो ब्रह्मकोपात्परीक्षि
तो मृत्युः जनमेयकोपात्सर्पाणामित्यादि तत्राह सैषेति तस्य मोहकत्वं दर्शयति अलक्षणा न लक्ष्यते इत्यलक्षणा अप्रतर्क्ये
त्यर्थः कासावित्यत आह यया अस्य विष्णोरेव आत्मभूता आत्मांशभूताः प्राणिनः गुणवृत्तिभिः क्रोधादिभिः भूतेषु देहेषु
मुह्यंति बाध्यबाधकतां प्रजंतीत्यर्थः ननु श्रवणादिना बाधितया कुतो मोहः स्यात्तत्राह अबाध्यया बाधितुमशक्यया २९
श्री-

भा० द्वा० स्कं० ६ कथं तर्हि माव्यात् तत्कार्यनिवृत्तिरित्याशंक्याह श्रीविष्णुरूपनिरूपणपूर्वकं तद्भजनात्सर्वानर्थनिवृत्तिरिति शास्त्रार्थमुपसंहरति न यत्रेति पंच
भिः दंभीति मायाकपटवान् अयं पुमान् इत्येवं रीता या बुद्धावसकृदुल्लिख्यमाना यामायेत्यर्थः सा आत्मवादे क्रियमाणे आत्मवादिभिर्यत्रा
१५ भयानकविराजिता न प्रकाशिता किंतु प्रीते नैव स्वकार्यं मोहादिकमकुर्वती कथं विद्वत्ति इति आतिप्रादिनेत्यर्थः तदुक्तं तस्मै नमो भगव
ते वासुदेवाय धीमहि यन्मायादुर्जयया मां ब्रुवंति जगद्गुरुं विलज्जमानया यस्य स्थातुमीक्षापथेमुया विमोहिता विकत्थंते ममाहमि
ति दुर्धियः इति किंच यद्यस्मिन् तदाश्रयो मायाश्रयो विविधो वादोपि नास्ति विशेषविषयत्वाद्वादानां तस्य च विशेषातीतत्वात् तद्
विभावः संकल्पविकल्पात्मतयो यस्य तन्मनोपि यत्र नास्ति संकल्पविकल्पानामपि विशेषविषयत्वात् ३० किंच सृज्यं कर्मेति

न यत्र दंभीत्यभया विराजिता मायात्मवादे सकृदात्मवादिभिः न यद्विवादो विविधस्तदाश्रयो मनश्च संकल्पविकल्पवृत्ति य
त् ३० न यत्र सृज्यं सृजतोभयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहं यदेतदुत्सादितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत त
न्मुनिः ३१ परं पदं वैष्णवमामनंति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं समाहितैः ३२

जता कारकवर्गेण सह उभयोः सृज्यस्रष्ट्रोः परं साध्यं श्रेयः फलमपि अतः त्रिभिः सृज्यस्रष्टृफलैरन्वितो जीवश्च अहंकारात्मको
यत्र नास्ति अतदुत्सादितो निरस्तो बाध्यबाधकोपाधिर्यस्मिंस्तदेतत् स्वयं आत्मस्वरूपमित्यर्थः ततस्तस्मात् ऊर्मीन् अहंकारादीन् निषि श्रीः
ध्य विरमेत् विशेषणं क्रीडेदित्यर्थः ३१ यतस्तदेव वैष्णवं पदमामनंतीत्याह परमिति यदेतत्तदेव परं वैष्णवं पदं स्वरूपं आमनंति के अतत् १५
आत्मव्यतिरिक्तं उत्सिसृक्षवः त्यक्तुमिच्छवः यतः अनन्यासौहृदाः नास्ति अन्यस्मिन्सौहृदं येषां ते कुतः दौरात्म्यं देहाद्यहंभावं वि
सृज्य देहे अहंकाराभावादन्यत्र सौहृदं नास्ति अतस्त्यक्तुमिच्छवः इत्यर्थः कथं नेति नेतीत्येवं अत्रा विद्वत्तुमेवमपि प्रमाणयति हृदा
परमध्यानादिना ततः समाहितैरवसितं निश्चितं यदा अवसितं अवबद्धं आत्मतया गृहीतमित्यर्थः ३२

एवंज्ञानावधिकारिणो दर्शयति त एतदिति देहजं अहंममेति गेहजं ममेति ३३ ज्ञाने सुपायमाह अतिवादानिति ३४ शास्त्रसमाप्तौ गुरुं
प्रणमति नम इति कृष्णाय व्यासाय अध्यगां अधिगतवानस्मि ३५ इमां संहितामध्यगामित्युक्ते पुराणसंहिताविभागविशेष
तो बुभुत्सुर्वेदविभागमपि प्रसंगात् पृथक्पृथक् पृच्छति पैलादिभिरिति हे सौम्य ३६ तत्र प्रथमं वेदाविर्भावप्रकारमाह समा
हितात्मन इत्यष्टभिः ब्रह्मणो हृदि य आकाशस्तस्मान्नादोऽभूत् यः कर्णपुटपिधाने श्रोत्रेंद्रियवृत्तिनिरोधात् अस्मादिभिर्विभाव्यते

त एतदधिगच्छंति विष्णोर्यत्परमं पदं अहंममेति दौर्जन्यं न येषां देहगेहजं ३३ अतिवादांस्तितिक्षेत नावमन्येत कंचन न चे
मं देहमाश्रित्य वैरं कुर्वीत केनचित् ३४ नमो भगवते तस्मै कृष्णायाकुंठमेधसे यत्पादांबुरुहध्यानात्संहितामध्यगामि
मां ३५ शौनक उवाच पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महर्षिभिः वेदाश्च कथिता व्यस्ता एतत्सौम्याभिधेहि नः ३६
सूत उवाच समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ३७ यदुपासनया
ब्रह्मन्योगिनो मलमात्मनः द्रव्यक्रियाकारकाख्यं धूत्वा यांत्यपुनर्भवं ३८ ततोऽभूत्त्रिवृदोंकारो योऽव्यक्तः प्रभवः स्व
राट् यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ३९

वितर्क्यते ३७ प्रसंगान्नादोपासकानां मोक्षफलमाह यस्य नादस्योपासनया आत्मनो मलं धूत्वा अपोह्य कथंभूतं म
लमाह द्रव्यमधिभूतं क्रिया अध्यात्मं कारकमधिदैवं एवं त्रिधा धारयता आरब्ध्या यस्येति तथा तं ३८ त्रिवृत् त्रिमात्रः के
वर्णादिभिरुच्चार्यमाणस्योंकारस्य अक्षरसमाम्नायातीतत्वात् अमतयालं विशिनष्टि अव्यक्तः प्रभवो यस्य सः तदेवाह स्वरा
ड् स्वतः प्रकाशमानः तमेव कार्यं लक्षयति यत्तदिति सः नपुंसकत्वं लिंगशब्दविशेषत्वात् लिंगं गमकं ३९

भा० द्वा० ६ कोसौपरमात्मातमाह श्रृणोतीति इमंस्फोटं अव्यक्तमोंकारं ननुजीवस्वतं श्रृणोतीत्याह सुप्तश्रोत्रेकर्णपिधानादिना अश्रुति
१८ केपि श्रोत्रेसतिजीवस्य कारणाधीनज्ञानत्वात् नतदा श्रोतातदुपलब्धिस्तु तस्यपरमात्मद्वारिकैवेतिभावः ईश्वरस्तुनैवंयतः शू
न्यदृक् शून्येषु ऐंद्रियवर्गेदृक् ज्ञानंयस्य तथाहि सुप्तोयदाशब्दं श्रुत्वाप्रबुध्यते नतदाजीवः श्रोतालीनेंद्रियत्वात् अतयस्तदाशब्दं
श्रुत्वाजीवंप्रबोधयतिसयथा परमात्मैवतद्वत् कोसावोंकारः तंविशिनष्टि साधनियेनवाक् बृहस्पती व्यज्यते यस्येचहृद्याका
शेआत्मनः सकाशाद्व्यक्तिः अभिव्यक्तिः ४० किंचस्वधाम्नः स्वस्याश्रयः कारणायतत् ब्रह्मणस्याकेवपरमात्मभोशस्ततसमस्तदेवतावाचको
पीत्याशयेनाहसइति सर्वमंत्राणामुपनिषद्रहस्यंसूक्ष्मंरूपमित्यर्थः तत्रहेतुः वेदानांबीजंकारणंबीजत्वेप्यविकारितामाह सनातनंसदैक

श्रृणोतियइमंस्फोटंसुप्तश्रोत्रेचशून्यदृक् येनवाग्व्यज्यतेयस्यव्यक्तिराकाशआत्मनः ४० स्वधाम्नोब्रह्मणः साक्षाद्वाचकः परमा
त्मनः ससर्वमंत्रोपनिषद्वेदबीजंसनातनं ४१ तस्यह्यासंस्त्रयोवर्णाअकाराद्याभृगूद्वह धार्यंतेयैस्त्रयोभावागुणाना
र्थवृत्तयः ४२ ततोक्षरसमाम्नायमसृजद्भगवानजः अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं ४३ तेनासौचतुरोवेदांचतु
र्भिर्वदनैर्विभुः सव्याहृतिकान्सोपचारानचातुर्होत्रविवक्षया ४४

रूपंतस्यब्रह्मरूपत्वात् ४१ इदानींततःसर्वप्रपंचोत्पत्तिप्रकारमाह तस्यहीति यस्त्रिसंख्यायुक्ताभावाः येरकारोकारमकारैर्धा
र्यंतेतत्कारणत्वात् तानेवाह गुणाः सत्वादयः नामानि ऋग्यजुःसामानि अर्थाः भूर्भुवः स्वर्लोकाः वृत्तयोजाग्रदाद्याः ४२ ततस्त
भ्योवर्णेभ्यः अक्षराणांसमाम्नायंसमाहारं तमेवाह अंतस्थाः उष्माणः शषसहाः स्वराअकाराद्याः स्पर्शाः कादयः ह्रस्वदीर्घ
श्चआदिशब्दाज्जिह्वामूलीयोपध्मानीयादिलक्षणं ४३ विभुश्चतुर्मुखस्वरूपोभगवान् असृजदितिपूर्वस्यैवानुषंगः चातुर्हो
त्रविवक्षया चत्वारोहोत्रुपलक्षिता ऋत्विजश्चतुर्होतारस्तेषांकर्माध्वर्यवादिकंकर्मेचातुर्होत्रं तद्विवक्षया ४४ श्रीः श्रीः १८
स्यादयः तेएवलक्षणंस्वरूपंयस्यतं ४३

पुत्रान्मरीच्यादीन्ब्रह्मकोविदान्वेदोच्चारणादिनिपुणान् ४५ एवंचतुर्युगेषुप्राप्ताद्द्वापरादौद्वापरं आदिर्यस्यतत् अंत्यांशलक्षणस्यकालस्यत
स्मिन् द्वापरांतेवेदविभागप्रसिद्धः शंतनुसमकालव्यासावतारप्रसिद्धेश्चव्यस्ताविभक्ताः ४६ तत्रहेतुः क्षीणायुषांजनानां तानपुरुषाणां
प्रसादकत्वात् अनादरणीयस्यादित्याशंक्याह हृदिस्थेति ४७ एवंसामान्यतोवेदविभागक्रममुक्त्वावैवस्वतमन्वंतरेविशेषतोनिरूपयितु
माह अस्मिन्नपीति ४८ अंशोमत्स्यादिस्तस्यांशः संतस्यकलयाअंशेनअवतीर्णः सन् ४९ चातुर्विध्यमेवाह सामिति ऋगादिमंत्राणां

पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् तेतुधर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशत् ४५ तेपरंपरयाप्राप्तास्त
त्तच्छिष्यैर्धृतव्रतैः चतुर्युगेष्वथव्यस्ता द्वापरादौमहर्षिभिः ४६ क्षीणायुषःक्षीणसत्वान्दुर्मेधान्वीक्ष्यकालतः वेदान्
ब्रह्मर्षयोव्यस्यन्हृदिस्थाच्युतनोदिताः ४७ अस्मिन्नप्यंतरेब्रह्मन्भगवान्लोकभावनः ब्रह्मेशाद्यैर्लोकपालैर्या
चितोधर्मगुप्तये ४८ पराशरात्सत्यवत्यामंशांशकलयाविभुः अवतीर्णोमहाभागवेदंचक्रेचतुर्विधं ४९ ऋगथर्व
यजुःसाम्नां राशीनुद्धृत्यवर्गशः चतस्रःसंहिताश्चक्रे मंत्रैर्मणिगणानिव ५० तासांसचतुरःशिष्यानुपाहूयमहामतिः एकै
कांसंहितांब्रह्मन्नेकैकस्मैददौविभुः ५१ पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह वैशंपायनसंज्ञायनिगदाख्यंय
जुर्गणं ५२ साम्नांजैमिनयेप्राहतथाछंदोगसंहितां अथर्वांगिरसीनामस्वशिष्यायसुमंतवे ५३ भगवान्वे

राशीन्वर्गशायथातथाकरणाभेदं उद्धृत्ययथानेकविधमणिराशेर्मणिगणाः पद्मरागादयोविविच्योद्ध्रियंते तद्वद्
स्यतैर्मंत्रैश्चतस्रःऋगादिसंहिताश्चक्रे ५० तासांसंहितानांएकैकां ५१ ऋक्समुदायरूपत्वाद्बह्वृचाख्यांनिगदा
छंदस्सुगीयमानत्वाच्छंदोगाख्यांसंहितां ५२

भा० द्वा० ६

७

तत्र त्वृग्वेदशाखाविभागमाह पैलऋतिस्व संहितां द्वेधा विभज्य इंद्रप्रमितये बाष्कलाय च ऊचे ५४ स बाष्कलोपि स्वसंहितां चतुर्धा व्यस्य बोध्या
दिभ्यः शिष्येभ्य आह हे भार्गव ५५ इंद्रप्रमितिरपि स्वसंहितां स्वसुतं मांडूकेयमध्यापयामास तस्य मांडूकेयस्य शिष्यो देवमित्रः ५६ तत्सु
तः मांडूकेयसुतः शाकल्यो वात्स्यायनादिषु पंचस्वधात् तानध्यापयामासेत्यर्थः ५७ तच्छिष्यः शाकल्यशिष्यः स्वसंहितां द्वेधा वि
भज्य चतुर्थं वैदिकं पदार्थव्याख्यानरूपं निरुक्तं च कृत्वा बलाकादिभ्यश्चतुर्भ्यो ददौ ५८ बाष्कलिः पूर्वोक्तस्य पुत्रः प्रतिशाखाभ्यः बा
लायन्यादयस्तामादधुः अधीतवंतः ५९ कृत्स्नशाखोपसंहारपूर्वकं तच्छ्रवणफलमाह बह्वृचा इति एतच्छंदसां एतेषां छंदसां ६० यजु

पैलः स्वां संहितामूचे इंद्रप्रमितये मुनिः बाष्कलाय च सोप्याह शिष्येभ्यः संहितां स्वकां ५४ चतुर्धा व्यस्य बोध्याय याज्ञवल्क्या
य भार्गव पराशरायाग्निमित्रे इंद्रप्रमितिरात्मवान् ५५ अध्यापयत्संहितां स्वां मांडूकेयमृषिं कविं तस्य शिष्यो देवमित्रः सौ
भर्यादिभ्य ऊचिवान् ५६ शाकल्यस्तत्सुतः स्वां तु पंचधा व्यस्य संहितां वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ५७
जातूकर्ण्यस्तु तच्छिष्यः सनिरुक्तां स्वसंहितां बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ५८ बाष्कलिः प्रतिशाखाभ्यो वालखिल्या
ख्यसंहितां चक्रे बालायनिर्भज्यः काशारस्तां दधुः ५९ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः श्रुत्वैतच्छं
दसां व्यासं सर्वपापैः प्रमुच्यते ६० वैशंपायनशिष्या वै चरकाध्वर्यवोऽभवन् यच्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतं ६१ श्रीः श्री४

वेदेषु तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह वैशंपायनशिष्या इत्यादिना चरकनामनिरुक्तिमाह यस्माद्गुरोर्ब्रह्म ७
हत्याख्यमंहः क्षपयतीति तथा तत्स्वगुरोरनुष्ठेयं व्रतं तच्चरणाच्चरका इत्यर्थः ६१ श्रीसप्तकोटीश्वराय०

तच्छिष्यः वैशंपायनशिष्यः अल्पसाराणामेतेषां चरितेन किं यद्दुश्चरमहं चरिष्यामीति ६२ विप्राणामवमंता अवज्ञाकर्ता मत्तोऽधीत
माशु त्यजेति ६३ देवरातसुतो याज्ञवल्क्यः ६४ छर्दितस्यादानं विप्ररूपेणानुचितमिति तित्तिराः पक्षिविशेषा भूत्वा आददुः त
तः तैत्तिरीया इति प्रसिद्धाः सुपेशलाः प्रतिरम्याः ६५ शुक्लयजुर्वचनमवांतरभेदविवक्षया काण्वमाध्यंदिनादिशाखाप्रसंगमाह याज्ञ
वल्क्य इत्यादिना गुरोर्वैशंपायनस्य व्यासेन विभज्यानुक्तत्वाद्विद्यमानानि अधि अधिकानि गवेषयन् मृगयन् सूपतस्थे सम्यक्

याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन्कियत् चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरं ६२ इत्युक्तो गुरुरप्याह कुपितो या
ह्यलं त्वया विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्विति ६३ देवरातसुतः सोपि छर्दित्वा यजुषां गणं ततो गतोथ मुनयो ददृशु
स्तान्यजुर्गणान् ६४ यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः तैत्तिरीया इति यजुःशाखा आसन्सुपेशलाः ६५ याज्ञ
वल्क्यस्ततो ब्रह्मंश्छंदांस्यधिगवेषयन् गुरोरविद्यमानानि सूपतस्थेर्कमीश्वरं ६६ याज्ञवल्क्य उवाच ॐ नमो भगवते
आदित्यायाखिलजगतामात्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तंबपर्यंतानां अंतर्हृदयेषु बहि
रपि चाकाश इवोपाधिनाऽव्यवधीयमानो भगवानेक एव क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानवि
सर्गाभ्यामिमां लोकयात्रामनुवहति ६७

कंकुत्रावर्तईश्वरं स्तुत्या चित्रं देवानां तथा च श्रुतिः ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्ये अह्नः सामवेदेनास्तमये मही
यते वेदैरशून्यस्त्रिभिरेति सूर्य इति ६७ नमो भगवते तुभ्यं आदित्याय भवानेक एव इमां लोकयात्रामनुवहतीत्यन्वयः तदेव दर्शय
ति अखिलजगतामात्मस्वरूपेणांतर्हृदयेषु कालस्वरूपेण चाकाशे बहिरपि वर्तमान इति अखिलजगतामित्यस्य प्रपंचः चतुर्वि
धेति हृदयांतर्वर्तित्वेपि जीववत्तेनोपाधिनाऽव्यवधीयमानः अनाच्छाद्यमानः कालस्वरूपतामाह क्षणलवादयो येऽव

भा० द्वा० द्वितीयपादार्थानुवर्णनेनस्तौति यदुहेति हेविबुधर्षभिस्सेसवितः यदयदोभगवतस्तवमंडले नयातितसमभिधीमहिसम्यग्गायेम पुनस्तस्यैवसंबोधनं अस्यहेत्रिपथवर्णवेदोक्तकर्ममार्गेण सूक्तवतांभक्तानां मान्यखिलानि दुर्जेनानि दुःखानि तेषांबीज
१८ मज्ञानंच तेषामवकर्जनविनाशकहेतवेनेति ६७ तृतीयपादेनस्तौति यइहेति योभवान्स्थावरजंगमसमूहानां स्वाश्रयाणां जीवानामनइन्द्रियप्राणगणानां अनात्मनोजडानां त्वयनात्मैवांतर्यामीसन्प्रचोदयति ६८ तृतीयपादमेवमंडलरूपरतयाव्याचक्षाणः स्तौति यएवेतियएकएवभगवान् अतिकरालवदनोयोंधकारस्तोजगरस्तेनगिलितं अतएवमृतकमिवविचेतनंस्वधर्मोरव्यं यदात्मावस्थाने प्रत्यक्षवत्त्वे तदेवश्रेयस्तस्मिन्प्रवर्तयति किं चयोभवानवनिपरिवाटतिगच्छति ७० आशापालैरि
यदुवात्युवविबुधर्षभसवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्जनभगवतः समभिधीमहितपनमंडलं ६८ यइहवावस्थिरचरनिकराणां निजनिकेतनानांमनइंद्रियासुगणानात्मनःस्वयमात्मांतर्यामीप्रचोदयति ६९ यएवेमंलोकमतिकरालवदनांधकारसंज्ञाजगरग्रहगिलितंमृतमिवविचेतनमवलोक्यानुकंपयापरमकारुणिकईक्षयैवोत्थाप्याहरहरनुसवनं श्रेयसिस्वधर्माख्यात्मावस्थाने प्रवर्तयत्यवनिपतिरिवासाधूनांभयमुदीरयंनटति ७० अरितआशापालैस्तत्रतत्रकमलकोशांजलिभिरुपहृतार्हणः ७१ अथहभगवंस्तवचरणनलिनयुगलं त्रिभुवनाभिवंदितमहमयातयाममयजुःकाम उपसरामीति ७२ सूतउवाच एवंस्तुतःसभगवान्वाजिरूपधरोहरिः यजूंष्ययातयामानिमुनयेऽदात्प्रसादितः ७३ यजुर्भिरकरोच्छाखादशपंचशतैर्विभुः जगृहुर्वाजसन्यास्ताः काण्वा
डादिभिः कमलकोशयुक्तैस्तत्तुल्यैर्वांजलिभिरुपहृतार्हणःदत्तार्घः ७१ यतएवंभूतस्त्वंअतोंऽतःस्फुटं अयातयामानि अन्यैर्येषांनदृष्टविज्ञातानि यजूंषितत्कामोऽहं उपसरामिभजामि ७२ एवंस्तुतः प्रसादितश्च ७३ पंचदशशाखाभ्यः शतैरपरामितैर्यजुर्भिरकरोत् सतैरितिपाठे सएवयाज्ञवल्क्यःतैर्यजुर्भिरकरोदितिजगृहुःअधीतवंतःरविणाअश्वरूपेणवाजेभ्यःकेशेभ्यःवाजेनवेगेनवासेन्यस्ताःत्यक्ताःशाखाःवाजसनीसंज्ञाः
१८

सामशाखाविभागमाह जैमिनेरितितत्कृतःताभ्यांपुत्रपौत्राभ्यांएकैकांप्राह ७५ तच्छिष्यःजैमिनेःशिष्यःमहानतिमेधावीसहस्रंसंहितात्रयंभेदंचक्रेसाम्नांतंसंहितानिभेदंततस्तदनंतरं ७६ सुकर्मणःशिष्यएकःकौशल्यो हिरण्यनाभःपौष्यंजिर्नामैकस्तौजगृहतुः अवंत्यश्चान्यःतस्यैवशिष्यः सोपिजग्राह ७७ पौष्यंजावंत्ययोरपिचाकाराहिरण्यनाभस्यापिपंचशतानिशिष्याआसन्नतेतावतीःशाखायथायथंजगृहुःतानुदीच्यासतःकातःकात्स्वितःशाख्यास्तेइत्यर्थः यथोक्तेवेषुवेदुदीच्याःसामगाःशिष्यास्तस्यपंचशतानिस्मृताः हिरण्यनाभाआवंत्यःसंहितायेद्विजोत्तमैःगृहीताःप्रचक्षिसतापिचोच्यंतेपंडितैः प्राच्यं
जैमिनेःसामगस्यासीत्सुमंतुस्तनयोमुनिः सुत्वांस्तुतसुतस्ताभ्यांएकैकांप्राहसंहितां ७५ सुकर्माचापितच्छिष्यःसामवेदतरोर्महान् सहस्रसंहिताभेदंचक्रेसाम्नांततोद्विजः ७६ हिरण्यनाभःकौशल्यःपौष्यंजिश्चसुकर्मणः शिष्योजगृहतुश्चान्यआवंत्योब्रह्मवित्तमः ७७ उदीच्यासामगाःशिष्याआसन्पंचशतानिवै पौष्यंजावंत्ययोश्चापितांश्चप्राच्यान्प्रचक्षते ७८ लौगाक्षिर्मांगलिःकुल्यःकुसीदःकुक्षिरेवच पौष्यंजिशिष्याजगृहुःसंहितास्तेशतंशतं ७९ कृतोहिरण्यनाभस्यचतुर्विंशतिसंहिताः शिष्यऊचेस्वशिष्येभ्यःशेषाआवंत्यआत्मवान् ८० इतिश्रीभागवतेमहा० द्वादशस्कंधेवेदशाखाप्रणयनंनामषष्ठोध्यायः ६ सूतउवाच अथर्ववित्सुमंतुश्चशिष्यमध्यापयत्स्वकांसंहितांसोपिपथ्यायवेददर्शायचोक्तवान् १ श्रीनारायणप्रसादोस्तु ॥ श्रीसांबसदाशिवप्रसादोस्तु
सामगाइति ७८ पुनरप्येषांत्रयाणांसुकर्मणःशिष्याणांशाखाबाहुल्यंदर्शयतिलौगाक्षिरितिद्वाभ्यां ७९ कृतोहिरण्यनामस्यशिष्यःस्वशिष्येऊचेशेषाअन्याअपियाःशाखास्ताआवंत्यःस्वशिष्येभ्यऊचइति ८० इतिद्वादशे०षष्ठः६ सप्तमेसर्वविस्तारःपुराणाख्यसनंतनः पुराणलक्षणादीनिफलेभागवतश्रुतेः१ क्रमप्राप्तमथर्ववेदविभागमाह शिष्यंकंचनामानेस्वकांस्वकीयांसंहितांसोपिशिष्योपिपथ्यानामास्त्रतर्ककवेअथर्ववेदसमुनिःसुमंतुरमितद्युतिःशिष्यमध्यापयामास

भा० टी०७ तत्र वेददर्शः स्वसंहितां चतुर्धा विभज्य चतुरः शिष्यानध्यापयामास पथ्यश्च त्रिभागे सत्यत्रीनिति सार्धेनाह शौल्कायनिरिति २
अंगिरसः शुनकस्य शिष्यो बभ्रुः सैंधवायनश्च तदुक्तं शुनकस्तु द्विधा कृत्वा ददौ चैकां तु बभ्रवे द्वितीयां संहितां प्रादात् सैंधवायनसं
ज्ञिने इति सावर्ण्यद्याः सैंधवायनादीनां शिष्याः २ नक्षत्रकल्पः शांतिकल्पश्चेति होतदुक्तं नक्षत्रकल्पो वेदानां संहितानां तथैव च
+ पंचमः चतुर्थः स्यादांगिरसः शांतिकल्पश्च शुति नक्षत्रकल्पादीनां कर्तारः स्वनाम्ना संप्रोच्यते ४ मत्पितुर्मुखादित्यस्मन्व्यासः षट्संहि
ताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात् तस्य च मुखाद् एते त्रय्यारुण्यादयः एकैकां संहितामधीयन्त एते पौराणिकाः शिष्याः तेषां सर्वां

शौल्कायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः वेददर्शस्य शिष्यास्तेषां पथ्यशिष्यानथो शृणु कुमुदः शुनको ब्रह्मन् जाबालिश्चाथ
वंशवित् २ बभ्रुः शिष्योथांगिरसः सैंधवायन एव च अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथापरे ३ नक्षत्रकल्पः शांतिश्च क
श्यपांगिरसादयः एते आथर्वणाचार्याः शृणु पौराणिकान्मुने ४ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः शिंशपाय
नहारीतौ षड्वै पौराणिका इमे ५ अधीयंत व्यासशिष्यात्संहितां मत्पितुर्मुखात् एकैकामहमेतेषां शिष्यः सर्वाः समध्य
गां ६ कश्यपोहं च सावर्णी रामशिष्योऽकृतव्रणः अधीमहि व्यासशिष्याच्चत्वारो मूलसंहिताः ७ पुराणलक्षणं ब्रह्मर्षि
भिर्निरूपितं शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ८ सर्गोस्याथ विसर्गश्च वृत्ती रक्षांतराणि च वंशो वंशानुचरि
तं संस्थो हेतुरपाश्रयः ९
समधीतवान् ६ रामशिष्योऽकृतव्रणः एवं चत्वारो वयं मूलसंहितास्त्यनेन ततः संहितांतरकल्पनं सूचितं शुकपरीक्षित्संवादेनि
रुपितमपि पुराणलक्षणं तद्भेदकथनाय दर्शयितिपुराणोति ८ अस्य विश्वस्य अन सर्गो विसर्गश्च स्थानं पोषणमूतयः
मन्वंतरेशानुकथा निरोधो मुक्तिराश्रय इत्यत्रोक्ते स्थानपोषणे वृत्ती रक्षा शब्दाभ्यामुच्यते अंतराणि मन्वंतराणि वंशो वंशानुचरि
यानुचरितामिति ईशानुकथाः संस्थानिरोधः अनेनैवात्यंतिकलय उपमुक्तिरप्युक्ता हेतुशब्देन जीवाश्रयवासनाशब्दवाच्या
कृतयोऽग्रहीताः ९ श्री १९

दशभिरेतैर्लक्षणैर्युक्तं महापुराणं विदुः केचित्पंचविधं सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च वंशानुचरितं चेति पुराणं पंचलक्षणं
णमिति महापुराणं अल्पं चेति व्यवस्थया यत्र सर्वाण्यपि लक्षणानि दृश्यंते तन्महापुराणं यत्र त्वन्यानि पंच तदल्पमित्यर्थः
ज्ञातदल्पमिति व्यवस्थयेत्यर्थः १० सर्गादिलक्षणानि व्याचष्टे पुरुषपूर्वेण अव्याकृते त्यादिना प्रधानस्य गुणानां क्षोभात्
यो महान् तस्मादहंकारः तस्मात् भूतमात्राणां इंद्रियाणां तदर्थानां स्थूलानां तद्देवतानां च संभवः सर्गः कारण
सृष्टिः सर्ग इत्यर्थः उच्यत इति यथापेक्षं तत्र व्याप्यनुषंगः ११ विसर्गं व्याचष्टे पुरुषेणेश्वरेणानुगृहीतानां तेषां महदादी
नां पूर्वकर्मवासनाप्रधानोयं समाहारः कार्यभूतश्चराचरप्राणिरूपो बीजाद्बीजमिव प्रवाहापन्नो विसर्ग उच्यते इत्यर्थः १२ ये
षां भूतानां सामान्यतो चराणि चेत्काराचराणि च कामा द्वृत्तिः तत्र तु नृणां स्वेन स्वभावेन कामाच्चोदनया पि वा यानि
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः केचित्पंचविधं ब्रह्मन् महदल्पव्यवस्थया १० अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽह
हः भूतसूक्ष्मेंद्रियार्थानां संभवः सर्ग उच्यते ११ पुरुषानुगृहीतानामेतेषां वासनामयः विसर्गोयं समाहारो बीजाद्बीज
चराचरं १२ वृत्तिर्भूतानि भूतानां चराणामचराणि च कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा १३ रक्षाच्युतावतारेहा विश्व
स्यानुयुगे युगे तिर्यङ्मर्त्यर्षिदेवेषु हन्यंते यैस्त्रयीद्विषः १४ मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः ऋषयोंशावतारा
श्च हरेः षड्विधमुच्यते १५ राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोन्वयः वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये १६ नैमित्ति
कः प्राकृतिको नित्य आत्यंतिको लयः संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः १७
युगे युगे तिर्यङ्मर्त्यर्षिदेवेषु च्युतावतारास्तेषां ईहा लीलाः सा विश्वस्य रक्षा
यतारक्षति इति रक्षा कृता सा वृत्तिरुच्यते इत्यर्थः तिर्यङ्मर्त्यर्षिदेवेषु ये च्युतावताराः तेषां ईहा १४ षड्विधं मन्वंतरमुच्यते षड्विधत्वमेवाह मनुरिति
च्यतेत्यर्थः तेषां मन्वंतराणां वंशः चित्तं येषां त्रयी द्विषो दैत्याः १४ षड्विधं मन्वंतरमित्यर्थः १५ १८
मन्वादयस्तस्यापि कारणाय प्रवर्ततेति मन्वंतरमित्यर्थः

× पौरवतारोदितस्समासाम्नाशिष्यकथं ×१

भा० द्वा० ८
२०

अस्य जगतः सर्गादेर्हेतुर्निमित्तं जीवः सोऽत्र हेतुरुच्यते तस्यार्थः तस्य निमित्तमाह अविद्ययाकर्म कर्ता जीवो ह्यस्य युक्त्वा हि स सर्गादेः स तत्र हेतुरित्यर्थः नन्वनुशायी निमित्तमिति किंचित् अव्याकृतमित्यपरे तत्राह यमिति चैतन्यप्राधान्येनानुशायिनं उपाधिप्राधान्यविवक्षया अव्याकृतं १८ अथाश्रयमाह व्यतिरेकेऽन्वयात् आदिवस्थासु जीवतया वर्तते इति जीवः स त्वयं विश्वतैजसप्राज्ञाः स्विषु मायामयेषु साक्षितया अन्वयः समाध्यादौ च व्यतिरेको यस्य तद्ब्रह्म संसारप्रतीतिबाधयोरधिष्ठानावधिभूतमपाश्रय उच्यते इत्यर्थः १९ तदेवं संदृष्टान्तं प्रपंचयति पदार्थेषु घटादिषु द्रव्यं मृदादि यथा युक्तं अन्वितं अयुतं च बहिरपि वस्थानात् रूपनामसु च सन्मात्रं यथा एवं बीजं गर्भाधानमादिर्यासां तासु देहावस्थासु नवस्वपि अ

हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः यं चानुशयिनं प्राहुरव्याकृतमुतापरे १८ व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः १९ पदार्थेषु यथा द्रव्यं सन्मात्रं रूपनामसु बीजादिपंचतान्तासु ह्यवस्थासु युतायुतं २० विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयं योगेन वा तदात्मानं वेदेहाया निवर्तते २१ एवं लक्षणलक्ष्याणि पुराणानि पुराविदः मुनयोऽष्टादश प्राहुः क्षुल्लकानि महान्ति च
२२ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडं नारदीयं भागवतमाग्नेयं स्कंदसंज्ञितं २३ भविष्यं ब्रह्मवैवर्तं मार्कंडेयं सवामनं वाराहं मात्स्यं कौर्मं च ब्रह्माण्डाख्यमिति त्रिःषट् २४ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविवर्धनं २५ इति श्रीभागवते महा० द्वादशस्कंधे सप्तमोऽध्यायः ७ ॥ ॥ श्रीनारायणाय नमो वासुदेवाय नमो श्रीकृष्णाय नमो रामचंद्राय नमः

धिष्ठानसाक्षित्वेन च युतमयुतं च यत्तत्तदपाश्रय इति २० एवं दशापि लक्षणानि व्याख्याय वर्णयंति महात्मानः इति यदुक्तं तदाह विरमेतेति यदा सर्गादीनां मायामयत्वानुसंधानेन वा मन्देवादरि वस्तुत्रयमेव चित्तं विरमेत् इहैवानुतिष्ठेत योगेन वा देव कृत्यादिवत् तदा विक्षेपोपरमादात्मा वेदतत्त्वाविद्यानिवृत्तेरीहायाः संसाररूपायाः निवर्तते इत्यर्थः २१ पुराणादि भागवत प्रस्तावेन तल्लक्षणादि प्रासंगिकमुक्त्वा प्रस्तुतमाह एवं विधैर्लक्षणैर्लक्ष्याणि २२।२३ त्रिःषट् अष्टादश २४ उपसंहरति ब्रह्मन्निति मुनेर्व्यासशिष्यादीनां च ब्रह्मतेजो ब्रह्मवर्चसं तद्विवर्धनं श्रोतॄणामिति शेषः २५ इति श्रीभागवते महापुराणे० द्वादशस्कंधे टीकायां सप्तमोऽध्यायः समाप्तिमगमत् ७ ॥ वासुदेवाय नमः ॥ — श्री० ४ २०

॥ अष्टमे तु तपश्चर्या मार्कंडेयस्य मोहकैः कामादिभिरसंमोहो नरनारायणस्तुतिः १ पुराणविभागप्रसंगेन पुराणकर्तुर्मार्कंडेयस्य चरितं प्रस्तुतमाह सूतेति वर्त्मेव वक्तुं योग्याद्इत्याह तमसि संसारे भ्रमतां पारदर्शनः तन्निवर्तकः १ वक्तव्यमाह आहुरिति उर्वरितः अवशिष्टः येन कल्पांतेन ग्रस्तं कथं घटते इत्येकः प्रश्नः २ प्रलयाभावाद्घटते न घटत इत्याह स वा इति यतो भार्गवर्षभः कोऽपि प्राकृतो नैमित्तिको वा ३ अन्यदप्यघटितमोवेत्याह एक एवेति तोकं बालकं ४ कौतूहलं श्रोतुं संशयं न केवलं समहायोगी किंतु पुराणेष्वपि ज्ञातत्वेन संमतः ५ प्रश्नमभिनंदति हे महर्षे अयं प्रश्नः तत्र हेतुः नारायणेति

शौनक उवाच सूत जीव चिरं साधो वद नो वदतां वर तमस्यपारे भ्रमतां नृणां त्वं पारदर्शनः १ आहुश्चिरायुषमृषिं मृकंडुतनयं जनाः यः कल्पांते ह्युर्वरितो येन ग्रस्तमिदं जगत् २ स वा अस्मत्कुलोत्पन्नः कल्पेऽस्मिन्भार्गवर्षभः नैवाधुनापि भूतानां संप्लवः कोऽपि जायते ३ एक एवार्णवे भ्राम्यन्ददर्श पुरुषं किल वटपत्रपुटे तोकं शयानं त्वेकमद्भुतं ४ एष नः संशयो भूयान्सूत कौतूहलं यतः तं नश्छिंधि महायोगिन्पुराणेष्वपि संमतः ५ सूत उवाच प्रश्नस्त्वया महर्षेऽयं कृतो लोकभ्रमापहः नारायणकथा यत्र गीता कलिमलापहा ६ प्राप्तद्विजातिसंस्कारो मार्कंडेयः पितुः क्रमात् छंदांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ७ बृहद्व्रतधरः शांतो जटिलो वल्कलांबरः बिभ्रत्कमंडलुं दंडमुपवीतं समेखलं ८ कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमर्द्धये अग्न्यर्कगुरुविप्रात्मस्वर्चयन्संध्ययोर्हरिं ९

पंचमं भविष्ये ६ तत्र मार्कंडेयस्तपुसा तमनंतमाराध्य मायां दर्शितं तं च ततत्वते नैव सर्गं मायया प्रलयकल्पा दृष्टा नान्यैरित्युत्तरं च कृत्वा आदित आरभ्य तस्य चरितमाह प्राप्तेत्यादिना मार्कंडेयाय मृत्युंजय इति पंचमश्लोके नान्वयः मध्यमग्रंथे तत्सर्वं मैः कथ्यते प्राप्तो द्विजाति संस्कारः उपनयनाख्यो येन सः पितुः सकाशाद्गर्भाधानादि क्रमात् छंदांसि वेदान् ७ बृहद्व्रतधरो नैष्ठि

प्रा० दा०८

२१ ॥भैक्ष्यंगुर्वर्थमाहृत्यतेनानुज्ञातस्चेत्तर्हिबुभुजेनो चेत्सकृतकदाचित्उपोषितोभवति १०तेनमृत्युंजयेन१२ध्वस्ताःक्लेशाराग
द्वेषायस्यतेन अंतरात्मना प्रत्याहृतेनमनसा १३।१४ तस्यतपोलिप्सामिति हसेनवर्णयति एतदित्यादिना अस्मिंसप्तमेमन्वंतरेतपसामृत्स
दंग्रहीष्यतीति विशंकितः १५ मुनयेमुनिंभ्रंशयितुंरजसलोकंअतिप्रियमपश्यत्सःमदस्थतो१६।१७ तदाश्रमपदंप्रविशेवायुर्वंवा
विति तृतीयेनान्वयः पुण्यैर्द्रुमैर्लताभिश्चाचितंकूजितंपुण्यद्विजानामृषीणांकुलेराकीर्णंपुण्याअत्यमलाजलाशयायस्मि

सायंप्रातःसगुरवेभैक्ष्यमाहृत्यवाग्यतः बुभुजेगुर्वनुज्ञातःसकृन्नोचेदुपोषितः १०एवंतपःस्वाध्यायपरोवर्षाणां मृकता [illegible] युतं आ
राधयन्हृषीकेशंजिग्येमृत्युंसुदुर्जयं ११ ब्रह्माभृगुर्भवोदक्षोब्रह्मपुत्राश्चयेपरे नृदेवपितृभूतानितेनासंति न
विस्मिताः १२ तस्यैवंयुंजतश्चित्तंमहायोगेनयोगिनः व्यतीयायमहान्कालोमन्वंतरषडात्मकः १३।१४ दृत्तं
बृहद्व्रतधरस्तपःस्वाध्यायसंयमैः दध्यावधोक्षजंयोगीध्वस्तक्लेशांतरात्मना १३ ४।एतत्पुरंदरोज्ञात्वासप्तमेऽस्मिन्किलां २०
तरे तपोविशंकितोब्रह्मन्नारेभेतद्विघातनं १५ गंधर्वाप्सरसःकामंवसंतमलयानिलौ मुनयेप्रेषयामासरजस्तोकं
मदौतथा १६ तेवैतदाश्रमंजग्मुर्हिमाद्रेःपार्श्वउत्तरे पुष्पभद्रानदीयत्रचित्राख्याचशिला विभो १७ तैतदाश्रम
पदंपुण्यंपुण्यद्रुमलताचितं पुण्यद्विजकुलाकीर्णंपुण्यामलजलाशयं १८ मत्तभ्रमरसंगीतंमत्तकोकिलकूजि
तं कूजितं मत्तबर्हिनटाटोपंमत्तद्विजकुलाकुलं १९ वायुःप्रविष्टआदायहिमानिशीकरं सुमनोभिःपरिष्वक्तोववावनु
त २० मत्तभ्रमराणांसंगीतंयस्मिन्मत्तकोकिलानांकूजितंयस्मिन्मत्तबर्हिणएवनटास्तेषामाटोपःसंभ्रमोयस्मिन्मत्तद्वि २१
जानांपक्षिणांकुलेनाकुलंव्याप्तं १९ एवंभूतंतदाश्रमपदंप्रविष्टःसन्वायुर्मलयानिलोववौप्रसंस्मारउत्तंभयन्उद्दीपयन्

किंचउद्यंश्चंद्रोयस्मिन्तांनिशावक्त्रंरजनीमुखंयस्मिन्नःप्रवालस्तबकानामलयःश्रेण्योयेषुतेःगुच्छातिवटपैःसश्लिष्यंतीतिगोपद्रुमाः
लताश्चतेषांजालैःसमूहैःआविर्बभूव २१ किंचतदागीतवादित्रयूथिकैःगायकादिसमुदायिभिःगंधर्वैरन्वीयमानःतथास्वस्त्रियोऽस
रसस्तासांयूथस्यपतिःआत्तंचापमिषुश्चयेनससस्मरश्चतत्रादृश्यत॥२३॥दुराधर्षंअभिभावितुमशक्यं॥२२॥ २४॥शोषणादीप

उद्यच्चंद्रनिशावक्त्रःप्रवालस्तबकादिभिः॥ गोपद्रुमलताजालैस्तत्रासीत्कुसुमाकरः॥ २१॥अन्वीयमानोगंधर्वैर्गीत
वादित्रयूथिकैः॥अदृश्यतात्तचापेषुःस्वःस्त्रीयूथपतिःस्मरः॥ २२॥हुत्वाग्निंसमुपासीनंददृशुःशक्रकिंकराः॥मीलिताक्षं
दुराधर्षंमूर्तिमंतमिवानलं॥२३॥ननृतुस्तस्यपुरतःस्त्रियोऽथोगायकाजगुः॥मृदंगवीणापणवैर्वाद्यंचक्रुर्मनोरमं॥ २४॥सं
दधेऽस्त्रंस्वधनुषिकामःपंचमुखंतदा॥मधुर्मनोरजस्तोकइंद्रभृत्याव्यकंपयन्॥२५॥क्रीडंत्याःपुंजिकस्थल्याःकंदुकैःस्तनगौ
रवात्॥भृशमुद्विग्नमध्यायाःकेशविस्रंसितस्रजः॥ २६॥इतस्ततोभ्रमद्दृष्टेश्चलंत्याअनुकंदुकं॥वायुर्जहारतद्वा
सःसूक्ष्मंत्रुटितमेखलं॥२७॥विससर्जतदाबाणंमत्वातंस्वजितंस्मरः॥सर्वंतत्राभवन्मोघमनीशस्ययथोद्यमः॥२८
तइत्थमपकुर्वंतोमुनेस्तत्तेजसामुने॥दह्यमानानिवृत्तुःप्रबोध्याहिमिवार्भकाः॥२९॥श्रीमज्जगदंबायैनमः॥

नसंमोहनतापनोन्मादनाख्यानिपंचमुखानिमस्यतदस्त्रंसंदधेतदैवमधुर्वसंतःरजस्तोकश्चपुरस्तमार्पणअन्येचंद्रस्तत्त्यास्त
स्यमनोव्यकंपयन्॥२५॥२६॥किंचवायुर्मलयानिलःपुंजिकःस्थल्याःतत्सूक्ष्मंवासोजहार॥२७॥सर्वंतेषांकर्मतत्रास्मिन् ×तत्र
मोघमव्यर्थंअनीशस्यानिर्दैवस्य॥२८॥मुनेरयकुर्वंतःअतिक्रूरमाचरंतःहेमुने॥२९॥ नमोनारायणायवासुदेवा०

भा० द्वा० अहमः अहंकारस्यभावंविकारं ३० निस्तेजसंस्फूर्तनवरदं स्वताइदं ३१ नरनारायणत्रूपोहरिः ३२ तावनुवर्णयतिद्वाभ्यां
२२ गौरवंकृष्णाजिनवल्कलंचीवरंयपोत्तौपवित्रे पाण्योर्ययोस्तौ चित्रत्रिगुणंनवतंतुकमितिगत्रिवृद्धिः पवमानमित्या
दैनवकप्रयोगादितिनक्तंत्वाहिमयं ३३ वेदंयदर्धमुचिकिंवसाक्षात्तपएवतीतबहेतुः तपत्तडिद्वर्णैद्दिप्यमानविद्यत्संकाः
सकृणं
शौदानुचरैर्ब्रह्मर्षिर्वितोपिमहामुनिः यंनागात्क्रमोभावंननचित्रं महद्भुहि ३० दृष्ट्वानिस्तेजसंकामैर्भगवान्स्वराट् ।
श्रुत्वानुभावंब्रह्मर्षेर्विस्मयंसमगात्स्मरं ३१ तस्यैवंयुंजतश्चित्तंतपःस्वाध्यायसंयमैः अनुग्रहायाविरासीन्नरनारायणो
हरिः ३२ तौशुक्लकृष्णौनवकंजलोचनौ चतुर्भुजौरौरवल्कलांबरौ पवित्रपाणीउपवीतकंत्रिवृत्कमंडलुंदंडमृजु
चवैणवं ३३ पद्माक्षमालामुतजंतुमार्जनं वेदंचसाक्षात्तपएवरूपिणं तपत्तडिद्वर्णपिशंगरोचिषाप्रांशूदधानौविबुधर्षभा
र्चितौ ३४ तेवैभगवतोरूपेनरनारायणावृषी दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेनदंडवत् ३५ सतत्संदर्शनानंदनिर्वृ
तात्मेंद्रियाशयाः हृष्टरोमाश्रुपूर्णाक्षोनसेहेताबुदीक्षितुं ३६ उत्थायप्रांजलिःप्रह्व औत्सुक्यादाश्लिषन्निव नमोनम
नमईतीशानौबभाषेगद्गदाक्षरः ३७ तयोरासनमादायपादयोरवनिज्यच अर्हणेनानुलेपेनधूपमाल्यैरपूजयत्
३८ सुखमासीनआसीनौप्रसादाभिमुखौमुनिः पुनरानम्यपादाभ्यांगरिष्ठाविदमब्रवीत् ३९
शंयत्पिशंगरोचिस्तेनरूपिणोतादृक्जौयुक्तमूर्तीयौतपोमयत्वेनप्रकाशमानावित्यर्थः प्रांशूउन्नतौ ३४ उच्चैर्महता आदरेण ३५ २२
तयोःसंदर्शनेनयआनंदस्तेननिर्वृताउपशांताआत्मेंद्रियाशयादेहेंद्रियमनांसियस्यसः नसेहेनशशाकेति ३६ आश्लिषन्नुआ
श्लिष्यन्नुआलिंगयन्निव ३७ पादयोरवनिज्यपादौप्रक्षाल्य अर्हणेनअर्घेण ३८ पादाभ्यांपादावानम्यगरिष्ठौपूज्यतमौ

अंतर्यामिणस्तस्यैवप्रवर्त्तकत्वादात्मनस्तत्कृतावस्वातंत्र्यंपश्यन्नाह किमितिहेविभोतवत्वांकिमहंवर्णयेकथंस्तौमियत्प्रये
त्नयैवउदीरितःप्रेरितोसुःप्राणःसंस्पंदतेप्रवर्त्तते तमनुचवाचादयःस्पंदंति अत्रहेतुःवैअन्वयव्यतिरेकाभ्यां श्रोत्रस्य श्रोत्रमित्या
दिश्रुतिभिश्चतत्प्रसिद्धमित्यर्थः नकेवलंप्राकृतानांतनुभृतांकिंतुअजशर्वयोश्च अतःस्वस्यममापितथैवएवंयद्यपिनकस्यचि
दपिकस्यापिस्वातंत्र्यं अथापिदारुयंत्रवत्तत्प्रवर्तितेरपिवागादिभिर्भजतांपुंसांभवान्बंधुःआत्मबंधुरसिनतुपित्रादिवद्देहमा
×२×
मार्कंडेयउवाच किंवर्णयेतवविभोयदुदीरितोसुः संस्पंदतेतमनुवाङ्मनइंद्रियाणि स्पंदंतिवैतनुभृतामजशर्वयोश्चस्वस्या
प्यथापिभजतामसिभावबंधुः ४० मूर्तीइमेभगवतोभगवंस्त्रिलोक्याःक्षेमायतापविरमायचमृत्युजित्यै नानाबिभर्ष्यवि
तुमन्यतनूर्यथेदंसृष्ट्वापुनर्ग्रससिसर्वमिवोर्णनाभिः ४१ श्रीनारायणायनमोवासुदेवायनमःश्रीकृष्णायनमोबकभद्राय०४

त्रबंधुःअहोकृपालुतातवेत्यर्थः ४० ननुकथमावांवागादिप्रवर्तकौधर्मपुत्रत्वादावयोरितिचेत्तत्राह मूर्तीइतिहेभगवन्भगवतस्त
वमेइमेमूर्ती त्रिलोक्याःक्षेमायपालनायतापविरमयदुःखनिवृत्त्यैमृत्युजित्यैक्षेमाय्यच नतुत्वंकस्यापिपुत्रइत्यर्थः अत्रदृष्टांतः
यथेदंविश्वमवितुंअन्यास्तनूर्मत्स्यकूर्मादिलक्षणाःनानाअनेकप्रकाराबिभर्षि तद्वत् नकेवलंपालनादिमात्रंतवकर्मकिंतुसृष्टि
लयावपीत्याहसृष्ट्वेति तत्राप्यनन्यनिरपेक्षत्वेदृष्टांतःऊर्णनाभिरिवेति ४१ राम११

यस्मादेवं भूतस्त्वं तस्मात्तवांघ्रिमूलं भजामीत्याह तस्येति तस्याखिलः पालकस्य स्थावरजंगमानामीश्वरस्य भजामीति तृ
भा० द्वा० तीयश्लोकः स्यात्पुष्पाठ कथं भूतमंघ्रिमूलं यत्कर्म गुणकालानां रजोमलं अन्येषां च पदौ का सत्पादयोन स्पृशंति
२३ रुजशतिवा पाठः यतः वेदोदृष्टये येषां ते वेदृतात्पर्यविदो मुनयः यदेव वस्तु वंति नितरां नमंति तद्धतत्मा त्रेय एनस्त्वनादि कुर्वं
ति ४२ यतः अन्यः पुरुषार्थो नास्तीत्याह नान्यदिति अङ्घ्र्युपनयात् श्रीमच्चरण प्राप्ते अन्यत्क्षेमं न विद्मः परितः सर्वं चीयते
के पुभयि यस्य तस्य जनस्य तदेवाह द्विपरार्धधिष्ण्यं स्थानं यस्य सः ब्रह्मापि नेकालस्य तव ऊर्ध्वं जंमन् पाद कालादलं बिभेति अतः
तस्याखिलः स्थिर चरेशितुरंघ्रिमूलं यत्स्थं न कर्म गुण कालरजः स्पृशंति यद्वै स्तुवंति निनमंति यजंत्यभीक्ष्णं ध्यायंति वेदहृद
यामुनयस्तदाप्त्यै ४२ नान्यं तवांघ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितो भिय ईश विद्मः ॥ ब्रह्मा बिभेत्यलमतो द्विपरा
र्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानां ४३ तद्भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य ते
देहाद्यपार्थमसदंत्यमभिज्ञमात्रं विंदेत ते तर्हि सर्वमनीषितार्थं ४४ कृष्ण रामममनोरथसिद्ध्यै समस्तदेवाय नमः
किमुत वक्तव्यं तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ४३ यस्मादेवं तस्मात्तव पादमूलं भजामि कथं भूतस्य ऋ
तधियः सत्यज्ञानस्वरूपस्य यद्वा सत्याधीर्यस्य सम्यग्ज्ञानस्य आत्मगुरोः उच्चस्यानियंतुः अतः कारणात्परस्य किं कृत्वा रामाद
आत्मच्छदि स्वात्मावरके अपार्थं च निष्फलं असत् चतुच्छं अत्यंच नश्वरं इदं देहादि हित्वा देहादि भजनं त्यक्त्वा असत् चेत्कथं
प्रतीयते तत्राह अभिज्ञमात्रं न त्वत्यंतसमं किं त्वाभमात्रं न ततः पृथगस्तीत्यर्थः ननु अपवर्गाय भवतु भजनं फलांत २३
रार्थं त्वं न भजनं कामयमेव तत्राह तर्हीति यदि त्वां भजति पुरुषः तर्हि तेन तदेव सर्वं मनीषितमर्थं विंदतेति ४४ ॥

ननु ब्रह्मरुद्रावपि मम वन्मूर्ती अतो मामेव किमित्यस्यैदपि यद्यपि तवैव मायया कृतानां नानालीलाः त्वयैव कृताः तथापि सत्त्वमयी सेवत्र
शांत्यै मोक्षायन केवलं अस्य प्रशांत्यभावमात्रम् × तमाद्रियसे तत्राह सत्त्वमिति यत् × न्य भजने किं त्वं निष्टं च किं चिद्रन्यया त्वं भवादित्या
ह व्यवसनेति ४४ नदेव सदा वारणाद्दह्यति नु स्मादिति रूप गतनं तवमुक्तांतानं तुश्च नारायणा ख्यां अथ तावत्कानां च मुक्तांत
नुंनरारव्यायद्यस्मात्सात्वतः सत्त्वमेव पुरुषस्य परस्य रूपं मुरारीति मन्यंते न त्वन्यद्र जस्तमश्चेति अत्र हेतुः यतः सत्त्वात्लीको
सत्त्वं रजस्तमइतीशतवात्मबंधो मायामयाः स्थितिलयोदयहेतवोस्य लीलाधृता यदपि सत्त्वमयी प्रशांत्यै नान्ये नृणां व्यस
नमाह भिय आत्मया भ्यां ४५ तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयिता कुशला भजंति यत्सात्वताः पुरुषरूपमु
शांति सत्त्वं लोको यतोऽभयमुतात्मसुखं च नान्यत् ४६ तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदेवताय नारा
यणाय ऋषये च नराय हंसायसंयतगिरे निगमेश्वराय ४७ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः संतं स्वखेष्वसुषु हृद्यपि दृक्
पथेषु तन्मायया वृतमतिः स उ एव साक्षादाद्यस्तवाखिलगुरोरुपसाद्य वेदं ४८ रामरामरामरामरामरामरामरामराम
तस्मै एव
वैकुंठाख्यस्य लोकस्य सत्यस्य प्यानां सुखं च ४९ अतस्ते प्रणमतित स्मै नम इति हंसाय शुद्धाय संयत गिरे नि
यतवाचाय च निगमेश्वराय वेदमार्गप्रवर्तकाय ५० वेदार्थसंप्रदाय प्रवर्तनं कर्तुं त्वं न स्तौति यमिति कश्चिदिंद्रियमार्गभ्र
मद्धीः विक्षिप्त बुद्धिः पुमान् स्वखेंद्रियादिषु निर्यंतृत्वेन संतमपि यं त्वां न वेद कुतः पथेषु विषयेषु बुद्धि विक्षेपहेतुः तन्माययावृत
स्य न वेद मायया वृता मतिर्यस्य अतस्त्वाम निर्जित्य सम उसापि आद्य एव ब्रह्मणा तवैव अखिल गुरोस्तव त्वत्तो वेदमुपसाद्य
प्राप्य तत्त्वां साक्षादाद्य ४८ रामनामरामनामरामनामरामनामरामनामरामनामरामनामरामनामरामू
राम २७

भा० द्वा० ८ वेदैनैवत्वज्ज्ञानेभित्युपपादयन्प्रणमति यस्यवेतेदर्शनं निगमेभावति कथंभूतं आत्मनस्तवरहः रहस्यप्रकाशकं अन्यथा दुर्ज्ञेय
तामाह अजपराः ब्रह्ममुख्याः कस्योपिसांख्ययोगादिभिर्यतमानाः यत्त्वयिमुह्यंतिकुतइत्यतआह सर्वेषांसांख्यादिवाद
२४ नांविषयत्वेदादयस्तेषांप्रतिरूपंतत्तदनुसारिशीलंस्वभावोयस्यतं आत्मदेहादिसंघातेननिगूढोबोधोयस्यतएवभूतंमहा
पुरुषंवंदे ४९ इतिद्वादशेऽष्टमोध्यायः ८ नवमेभगवन्मायादृष्टोदर्शनमुक्तः मायाशिशोर्लयाब्धौचमुनेर्निर्गमनिर्ग

यद्दर्शनंआत्मैरहः प्रकाशंमुह्यंतियत्रकनयोऽजपराजतंतः तंसर्ववादविषयप्रतिरूपशीलं वंदेमहापुरुषमात्मनिगूढबोधं
४९ इतिश्रीभागवतेमहा० द्वादशस्कंधेऽष्टमोध्यायः ८ श्रीभगवानुवा० भोभोब्रह्मर्षिवर्यासिसिद्धआत्मसमाधि
ना मयिभक्त्यानपायिन्यातपःस्वाध्यायसंयमैः २८ सूतो० संस्तुतोभगवानित्थंमार्कंडेयेनधीमता नारायणोनरस
खःप्रीतआहभृगूद्वहं १४ वयंतेपरितुष्टाःस्मत्वदृहद्व्रतचर्यया वरंप्रतीच्छभद्रंतेवरदेशादभीप्सितं २ मार्कंडेय०
जितंतेदेवदेवेशप्रपन्नार्तिहराच्युत वरेणैतावतालंनोयद्भवान्समदृश्यत ४ गृहीत्वाऽजादयोयस्यश्रीमत्पाद
अदर्शनं मनसायोगपक्वेनसोभवान्मेक्षगोचरः ५ ॥ श्रीमत्सांबसदाशिवसप्तकोटीश्वरायनमः

मैः १ भगवतःपरिस्तोत्रपूर्वकंतदपेक्षितवरदानंकथयितुमाहसंस्तुतइत्यादिना १ आत्मसमाधिनाचित्तैका
ग्र्येण २ वयंतुष्टाःस्मेतिबहुवचनंसर्वदेवाभिप्रायेणावरदेशादित्येकवचनंद्वयोरैक्याभिप्रायेणप्रतीच्छगृह्
ण ३ वरेणाच्छद्यतावतयाजितंउत्कर्षोदर्शितःममतुवराकांक्षानास्तीत्यर्थःवरेणेति ४ तवश्रीमत्पादाब्जदर्श २४
नंमनसापिगृहीत्वाप्राप्यकृतार्थाअजादयोभवंतिसभवान्मेक्षगोचरोजातोस्तिकिमतःपरंवरेणत्यर्थः ५

दृष्टेदृष्टिमिच्छामिलोकपालेब्रह्मादिभिः सहितोयंलोकोजनःसद्भिःसातिवस्तुनिभिद्यतेयमेति ६ तथेतीडस्यसोतिईश्वरःस्मय
न्प्रागात्पाठांतरक्रियाविशेषणं ७ तमेवार्थमायादर्शनरूपंअभ्यादिभिःन्निपुट भावदृश्येमनोमयेईश्वेकचित्तद्दावितप्रेमप्रसर
संकुलः ९ मायादर्शनमाहतस्येत्यादिना १० तत्रवायुमनुवाहकामेघाअभवन्आविर्बभूवुः तेचतडिद्भिःसहिताउच्चैःस्वनंतोश
जेतःअक्षोरथांगतेद्धकंवितष्ठाअभितोवर्षधाराःमुमुचुः ११ चतुर्दिक्षुवर्तमानाःसमुद्राःसमीरवेगेनोर्मयस्तेःतलंग्रसंतउ

अथान्यंगुणपत्राक्षपुण्यश्लोकशिखामणे द्रक्ष्येमायांययालोकःसपालोवेदसद्भिदां ६ सूतः० इतीडितोर्चितःकामम्
पिणात्मगवान्मुने तथेतिसस्मयन्प्रागाद्बदर्याश्रममीश्वरः ७ तमेवचिंतयन्नर्थमृषिःस्वाश्रमएवसः वसन्नग्न्यर्कसोमांबु
